A-PDF Page Crop DEMO: Purchase from www.A-PDF.com to remove the watermark



# श्री गोकर्ण क्षेत्राचा नकाशा.

गोकर्णं सा महाकाशी विश्वनाथो महाबलः ॥ कोटितीर्थं तत्र गङ्गा समुद्रोऽयं विशिष्यते ॥ १॥ गुञ्जामात्राधिकं काश्या गोकर्णमभिधीयते ॥ गोकर्णसदृशं क्षेत्रं नास्ति नास्ति जगत्त्रये ॥ २॥ सर्वेषां शिवलिङ्गानां सार्वभौमो महाबलः ॥ महाबलसमं लिङ्गं न भूतं न भविष्यति ॥ ३ ॥ गङ्गादिसरितो यस्मात् सागरं प्रविशन्ति वै ॥ तस्मात् समुद्रो ह्यधिको गोकर्णे तद्विशिष्यते ॥ ४ ॥ आद्यं पशुपतेः स्थानं दर्शनादेव मुक्तिदं ॥ यत्र पापोऽपि मनुजः प्राप्नोत्यभयदं पदम् ॥ ५ ॥ पश्चिमाम्बुधितीरस्थं गोकर्णं क्षेत्रमुत्तमम् ॥ महाबलसमं लिङ्गं नास्ति ब्रह्माण्डगोलके ॥ ६ ॥ पूर्वे सिद्धेश्वरं लिङ्गं दक्षिणे ह्यघनाशिनी ॥ उत्तरे शाल्मलीगङ्गा पश्चिमे लवणाम्बुधिः ॥ ७ ॥




ಈ ನಕ್ಷೆಯನ್ನು ೧೯೧೫ ರಲ್ಲಿ ಶ್ರೀಯುತ ಶಿವರಾವ್ ನಾರಾಯಣ ಧಾರೇಶ್ವರ ಇವರು ಪ್ರಥಮವಾಗಿ ತಯಾರಿಸಿದರು.
ಅದನ್ನು ಆಧರಿಸಿ ಪ್ರಸ್ತುತ ನಕ್ಷೆಯನ್ನು ಕಂಪ್ಯೂಟರ್‌ಸಹಾಯದಿಂದ ರಚಿಸಲಾಗಿದೆ.

ಈ ನಕ್ಷೆಯಲ್ಲಿ

1) ಗೋಕರ್ಣಪುರಾಣವನ್ನು ಸೂಕ್ಷ್ಮವಾಗಿ ಪರಿಶೀಲಿಸಿ ಮೂಲನಕ್ಷೆಯಲ್ಲಿ ಅನೇಕ ಬದಲಾವಣೆಗಳನ್ನು ಮಾಡಲಾಗಿದೆ.

2) ಅನೇಕ ಹೊಸದಾರಿಗಳನ್ನು ಗುರುತಿಸಲಾಗಿದೆ.

ಗಣಪತಿ ಶಿವರಾಮ
ಭಟ್ಟ ಹಿರೇ.
೨೦೦೫ ನೇ ಎಪ್ರಿಲ್

[****]

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १ ॥  NEXT>>  श्लोकसंख्या–६२

॥ शतानीकेन पृष्टेन सूतेन गोकर्णक्षेत्रवर्णनप्रारम्भः ॥

श्रीगणेशाय नमः ॥ श्रीमहाबलेश्वराय नमः ॥

वन्दे विघ्नेश्वरं देवं सर्वविघ्नाधिदैवतम् ॥ अन्तरायनिवृत्यर्थं तन्नमामि गजाननम् ॥१॥

गोकर्णक्षेत्रनिलयं द्विभुजं वरदं सताम् ॥ सर्वकार्यार्थसिध्यर्थं प्रणमामि गजाननम् ॥२॥

त्वङ्गत्तुङ्गतरङ्गभङ्गविलसद्गङ्गाप्रवाहावलीसंसिक्तोरुजटालकोत्थकुसुमाकारेन्दुभृन्मस्तकः॥

कैलासापरनामधेयविलसद्गोकर्णवासी सदा पायादेषमहाबलः सुरवरस्तुत्यो भवानीपतिः ॥३॥

गोकर्णनामपुरुषो जगतिप्रतीतो यो विघ्नराजयुगनेत्रयुगाभिपन्नः ॥

शालूकिनीत्यघहरश्च भुजद्वयं यो श्रीकोटितीर्थशिख एष महीविभूषः ॥४॥

माङ्गल्यं च त्रिवर्गश्च निःश्रेयसमतः परम् ॥ शृण्वतां पठतां भूयाद्गोकर्णं खण्डमुत्तमम् ॥५॥

ॐ ॥

कुरूणामन्वये जातो राजा परमधार्मिकः ॥ आस्ते कृताभिषेकोऽथ सन्यासाय कृतक्षणः ॥६॥

ऋषिभिः सहितश्चापि शतानीको महामतिः ॥ शौनकाद्यैर्मुनिवरैः कृतसंप्रश्नसत्कथः ॥ ७॥

अथाजगाम धर्मात्मा व्यासशिष्यो महामतिः ॥ तीर्थयात्रां परिचरन् सूतः पौराणिकोऽर्थवित् ॥८॥

उग्रश्रवाः शतानीकं जयाशीर्भिरवर्धयत् ॥ अभिवाद्य मुनीन् सर्वान् शौनकादीन् तपोधनान् ॥९॥

पप्रच्छ कुशलं सर्वं तपःस्वाध्यायकर्मसु ॥ ततः स राजा धर्मात्मा युधिष्ठिरकुलोद्भवः ॥१०॥

सूतमाह महाप्राज्ञमास्यतामिति सादरम् ॥ आसनं कल्पयामास तदा सूताय भारतः ॥११॥

अनुज्ञां प्राप्य सूतस्तु मुनीनां भावितात्मनाम् ॥ उपविष्टः सभामध्ये कृतातिथ्यो महामतिः ॥१२॥

विश्रान्तोऽभूच्चिरं तस्यां सभायां सूतनन्दनः ॥ ततोऽब्रवीदिदं सूतं शौनको मुनिसंसदि ॥१३॥

कुत आगम्यते तात साम्प्रतं सूतनन्दन ॥ भवता गम्यते कुत्र किमिहास्ति प्रयोजनम् ॥१४॥

सूत उवाच ॥

तीर्थयात्रां गतो ब्रह्मन् त्रिः परीत्य धरामिमाम् ॥ भवतो दृष्टुमायातः शतानीकं च पार्थिवम् ॥१५॥

परीक्षितं च राजर्षिं सन्यासाय कृतक्षणम् ॥ सहासित्वा द्विजवरैर्गोकर्णे सुचिरं द्विज ॥१६॥
इहागतोऽस्मि विप्रर्षे किं करोमि प्रशाधि माम् ॥

शौनक उवाच ॥

तीर्थानां दर्शने पुण्यं स्नाने दाने च यत्फलम् ॥ उपवासे जपे होमे तीर्थे देवार्चने च यत् ॥१७॥
तीर्थानामपि चोत्पत्तिं पुण्यापुण्यफलं च यत् ॥ तत्सर्वं कथयास्माकं परं कौतूहलं हि नः ॥१८॥
अतीतानागते चोभे साम्प्रतं यच्च वर्तते ॥ तत्सर्वं विदितं सूत त्वया नान्येन केनचित् ॥१९॥
प्रष्टव्योऽसि मुनीनां त्वं धर्मकामार्थमोक्षणे ॥ तस्मात्त्वं ब्रूहि नः सूत तीर्थानामुत्तमोत्तमम् ॥२०॥
इत्युक्ते मुनिना राजा शतानीको महामतिः ॥ पप्रच्छेदं सभामध्ये सूतं वै रोमहर्षणिम् ॥२१॥

शतानीक उवाच ॥

गोकर्णादागतमिति श्रुतं ते वदतोऽनघ ॥ कस्मिन् देशे स गोकर्णस्तीर्थराजः प्रशस्यते ॥२२॥
किमर्थं वासितं तत्र त्वया वै सूतनन्दन ॥ के के विप्रास्त्वया सार्धं गोकर्णे प्रावसंस्तदा ॥२३॥
ब्रूह्यशेषेण वै सूत यस्मात् प्रत्यागतो ह्यसि ॥ ततः क्रमेण त्वं ब्रूहि तीर्थानि वदतां वर ॥२४॥

सूत उवाच ॥

श्रूयतां राजशार्दूल सहैभिर्मुनिपुङ्गवैः ॥ व्यासप्रसादाद्वक्ष्यामि सर्वं प्रत्यक्षदर्शिवत् ॥२५॥
सिद्धिक्षेत्राणि त्रीण्याहुः रहस्यानि सुरैरपि ॥ अहं ते वर्णयिष्यामि निबोध नृपपुङ्गव ॥२६॥
शालग्रामं पुष्करं च तथा गोकर्णमुत्तमम् ॥ सत्वं रजस्तमश्चैव गुणाः संकीर्तितास्त्रयः ॥२७॥
विष्णुर्ब्रह्माऽथ रुद्रश्च गुणानामधिदेवताः ॥ ऋग्वेदश्च यजुर्वेदः सामवेदस्तथैव च ॥२८॥
त्रिधा भूतं जगत्सर्वं तथा सम्परिवर्तते ॥ सिद्धिक्षेत्राणि राजेन्द्र त्रीणि तानि निबोध मे ॥२९॥
ब्राह्मं च वैष्णवं चैव शैवं चैव नराधिप ॥ अष्टादशपुराणानि सिद्धेर्द्वाराणि पुत्रक ॥३०।
तानि ते सम्प्रवक्ष्यामि शृणुष्वैकमना नृप ॥ आद्यं सर्वपुराणानां पुराणं ब्राह्ममुच्यते ॥३१॥
पाद्मं च वैष्णवं चैव शैवं भागवतं तथा ॥ तथान्यं नारदीयं च मार्कण्डेयं च सप्तमम् ॥३२॥
आग्नेयमष्टमं चैव भविष्यं नवमं स्मृतम् ॥ दशमं ब्रह्मवैवर्तं लैंग्यमेकादशं तथा ॥३३॥
वाराहं द्वादशं प्रोक्तं स्कान्दं चैव त्रयोदशम् ॥ चतुर्दशं वामनकं कौर्मं पञ्चदशं स्मृतम् ॥३४॥
मात्स्यं च गारुडं चैव ब्रह्माण्डं च ततः परम् ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥३५॥
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥ सर्वेष्वेतेषु कथ्यन्ते लक्षणानि तु पञ्च वै ॥३६॥
तेषु षड् वैष्णवीं सिद्धिमाहुः सात्विकलक्षणाम् ॥ षड् ब्राह्मीं सिद्धिमाहुर्हि राजसीं राजसत्तम ॥३७॥

आहुः शैवीं शिवमयीं षडन्यानि च पार्थिव ॥

शतानीक उवाच ॥

सिद्धिक्षेत्रमिति प्रोक्तं त्वयेदानीं महामते ॥३८॥

किमुच्यते सिद्धिरिति सिद्धः को वा महामते ॥ सिद्धेस्तु लक्षणं ब्रूहि ब्रूहि सिद्धेः प्रयोजनम् ॥३९॥

सिद्धिक्षेत्रेषु ये सिद्धिं प्राप्तास्तान् ब्रूहि सत्तम ॥

सूत उवाच ॥

संवर्तको नाम मुनिरग्निपुत्रो महातपाः ॥४०॥

अवसत् सुचिरं कालं गोकर्णे तीर्थसत्तमे ॥ तपो घोरं समास्थाय त्रेतायां नृपसत्तम ॥४१॥

निर्द्वन्द्वो निरहङ्कारो सिद्धिमिच्छन् परां द्विजः ॥ अथाजगाम भगवान्नारदो नाम वै मुनिः ॥४२॥

यदृच्छया तत्सकाशं सर्वत्र समदर्शनः ॥ तमागतमभिप्रेक्ष्य नारदं मुनिसत्तमम् ॥४३॥

अभ्युत्थायार्घ्यमादाय शिरसा तमवन्दत ॥ आसनं च ददौ तस्मै मुनये पावकात्मजः ॥४४॥

कुशलं परिपप्रच्छ भगवान्नारदो मुनिः ॥ संवर्तकं महात्मानं योगानामीश्वरं प्रभुम् ॥४५॥

सुखासीनो ब्रह्मपुत्रो नारदस्तपसां निधिः ॥ आस्यतामिति चोवाच संवर्तकमुदारधीः ॥४६॥

संवर्तोऽपि महाराजन् प्राप्तोऽनुज्ञामुपाविशत् ॥ विश्रान्तमुनिमासीनमिदमाहाऽथ पावकिः ॥४७॥

संवर्त उवाच ॥

अद्य मे सफलं जन्म कृतार्थोऽस्मि महामुने ॥ तव सन्दर्शनादद्य सुप्रीतश्च महामते ॥४८॥

देवा अपि हि काङ्क्षन्ते मुनयश्च तपोधनाः ॥ तव सन्दर्शनं यस्मादपुण्यानामसम्भवम् ॥४९॥

तपसा सिद्धमात्मानं मन्येहं तव दर्शनात् ॥ कर्मक्षयाय भवति सङ्गमो हि भवद्विधैः ॥५०॥

सूत उवाच ॥

इति सम्पूजितो राजन् संवर्तेन स नारदः ॥ प्रीतिमानब्रवीद्वाक्यं संवर्तकमिदं पुनः ॥५१॥

सिद्धोऽसि वै मुनिश्रेष्ठ तपसा च दमेन च ॥ भक्त्या च देवदेवस्य रुद्रस्य परमेष्ठिनः ॥५२॥

क्षेत्रस्यास्य प्रभावेण गुरुशुश्रूषणेन च ॥ किं तेऽभीष्टं द्विजवर ब्रूहि तद्वितराम्यहम् ॥५३॥

अमोघं दर्शनं सिद्धं मदीयं ब्राह्मणोत्तम ॥ न ह्यशक्यं मया दातुं त्रैलोक्यैश्वर्यमप्युत ॥५४॥

संवर्त उवाच ॥

दर्शनादेव ते स्वामिन् कृतार्थोऽस्मि न संशयः ॥ तथाऽपि यन्मे मनसि वर्तते सुचिरं द्विज ॥५५॥

तत्तेऽहं सम्प्रवक्ष्यामि प्रसन्नो वक्तुमर्हसि ॥ अस्मिन् क्षेत्रवरे सिद्धा विप्राः कति महामते ॥५६॥
सिद्धिरप्यभिधीयेत किं तद्वद ममानघ ॥ गोकर्णमिति यन्नाम तस्य निर्वचनं वद ॥५७॥
अत्र के मुनयः सिद्धाः केनोपायेन सत्तम ॥

नारद उवाच ॥

शैवं तन्त्रमिदं प्रोक्तं शम्भुना लोकशम्भुना ॥५८॥
कुमाराय पुरा विप्र योगयोग्याय पृच्छते ॥ तत्तेऽहं सम्प्रवक्ष्यामि नमस्कृत्वा शिवाय वै ॥५९॥
ब्रह्मविष्णुस्वरूपाय शङ्कराय नमो नमः ॥ भक्तानुकम्पिने नित्यं देवदेवाय शम्भवे ॥६०॥
यस्मात् प्रवर्तते विश्वं यस्मिंश्च परिवर्तते ॥ यस्मिन् विलीयते चान्ते नमस्ते लिङ्गमूर्तये ॥६१॥
सिद्धिं वदन्ति मुनयः परमेश्वराप्तिं सिद्धान् वदन्ति शिवतत्वविदो मुनीन्द्रान् ॥
क्षेत्राणि चाहुरमलानि शिवालयानि क्षेत्रेषु सिद्धिमधिकां प्रवदन्ति शैवीम् ॥६२॥?

इति श्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डे प्रथमोध्यामः ॥ १ ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः २ ॥  NEXT>>  श्लोक संख्या–२७

॥ षडाननेन पृष्टेन शिवेन स्वरूपकथनम् ॥

श्रीनारद उवाच ॥

कैलासशिखरे रम्ये समासीनं वृषध्वजम् ॥ पार्वत्या प्रियया सार्धं विश्वगर्भधरं हरम् ॥१॥
नन्दीशप्रमुखैः सिद्धैः शिवज्ञानविशारदैः ॥ संसेव्यामानं निखिलैः पार्षदैश्च सहामरैः ॥२॥
भक्त्योपगम्य पितरं ववन्दे षण्मुखस्तदा ॥ मातरं चाभिवाद्याथ सूपविष्टस्तदन्तिके ॥३॥
तमुवाच महादेवः स्मितपूर्वमिदं वचः ॥ संहरामि जगत् सर्वं इदानीमेव पुत्रक ॥४॥
नात्र स्थेयं त्वया वत्स क्षेत्रं सिद्धिप्रदं व्रज ॥ त्रिरात्राभ्यन्तरे सर्वं जगत् स्थावरजङ्गमम् ॥५॥
विलयं याति यस्मात् त्वं गच्छ गोकर्णमाशु वै ॥ मम क्षेत्रे महाभाग गोकर्णे तीर्थसतमे ॥६॥
मयोक्तेन विधानेन स्थित्वा सिद्धिमवाप्स्यसि ।

कुमार उवाच ॥

किमर्थं देवदेवेश संहारः क्रियते त्वया ।।७।।
सृष्टिं किमर्थं कुरुषे सृष्टौ वा वर्तसे कथम् ।। सृष्ट्वा भूतानि भूतेश न युक्तं पुरुषोत्तम ।।८।।
इदानीमुपसंहारस्तवायं न प्रशस्यते ।। द्वेषो वा सर्वभूतेषु प्रीतिर्वा वद शङ्कर ।।९।।
समो वा शर्व सर्वत्र किमेतत्ते विचेष्टितम् ।। गोकर्णस्य प्रभावं त्वं सिद्धिक्षेत्रस्य शंस मे ।।१०।।
श्रुत्वैतत् सकलं देव गमिष्यामि यथासुखम् ।

शङ्कर उवाच ।।

शृणु पुत्र परं गुह्यं समासात् कथायामि ते ।।११।।
अहमेव जगत् सर्वं नान्योऽस्ति सुरसत्तम ।। आदावहं तथा मध्मे अन्ते चाहं न संशयः ।।१२।।
मम नास्त्यादिरन्तश्च तथा मध्यश्च पुत्रक ।। आदिमध्यावसानानि मत्कृतानि निबोध मे ।।१३।।
आदौ सृष्टिं करिष्यामि मध्ये रक्षामि पुत्रक ।। अन्ते चान्तं करिष्मामि दृश्यादृश्यस्य सत्तम ।।१४।।
सत्वं रजस्तमश्चेति गुणा मद्देहसम्भवाः ।। सात्विकं राजसं चैव तामसं च त्रिधा जगत् ।।१५।।
त्रिविधां सिद्धिमिच्छन्ति स्वभावाद्देवसत्तम ।

कुमार उवाच ।।

सृष्टिं मे देव देवेश श्रोतुमिच्छा प्रवर्तते ।।१६।।
सिद्धिं च त्रिविधां देव सिद्धिक्षेत्राणि च प्रभो ।।

शङ्कर उवाच ।।

अहमादिर्हि भूतानां मध्यं च सुरसत्तम ।।१७।।
अन्तश्च सर्वभूतानां आत्मा चाहं न संशयः ।। न मे प्रीतिर्न मे द्वेषः सर्वत्र समदर्शिनः ।।१८।।
गुणत्रयविभागेन सृष्टिं वृत्तामि सुव्रत ।। श्रूयतां पुत्र वक्ष्यामि सृष्टेर्लक्षणमादृतः ।।१९।।
अक्षयोऽहमजेयोऽहमनादिरहमच्युतः ।। अनन्तोऽहं कार्तिकेय न मां जानाति कश्चन ।।२०।।
मामेकं बहुधा पुत्र यजन्ति ज्ञानचोदिताः ।। तथाऽपि मां न जानन्ति मद्विना नास्ति किञ्चन ।।२१।।
अरूपत्वाददेहत्वाद्वाङ्मनोऽगोचरो ह्यहम् ।। न शब्दगोचरश्चाहं योगिध्येयोऽहमच्युतः ।।२२।।
निष्कलः सकलश्चाहं निर्गुणोहं गुणात्मकः ।। कथितं ते सुबहुधा नावगन्तासि पुत्रक ।।२३।।
आत्माऽहं सर्वभूतस्य क्षेत्रे क्षेत्रज्ञसंज्ञकः ।। त्रैलेक्यं मदधिष्ठानं मच्चेष्टं परिवर्तते ।।२४ ।।
न मे प्रियोस्ति न द्वेष्यो न चोदासीनवृत्तयः ।। मय्येव जातं मय्येव वर्तते सचराचरम् ।।२५।।
मामुपैष्यति चान्ते वै मायया मम मोहिताः ।। शिव आदौ तथा मध्ये शिवोऽन्ते जगतस्तथा ।।२६

॥
शिव एव जगत् कृत्स्नं बहिरन्तश्च सर्वतः ॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्ण खण्डे द्वितीयोऽध्यायः ॥२॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ३ ॥  NEXT>>  श्लोक संख्या–५०

## ॥ शिवस्य स्वरूपम्–सृष्टिक्रमः ॥

### ॥ शिवेन स्वरूपकथनम् ॥

शिव उवाच ॥

शृणु पुत्र यथावृत्तं संक्षेपाद्वदतो मम ॥ श्रोतव्यं यत्त्वयैवेदं न वक्तव्यमनर्हते ॥१॥
एकोऽहमन्ते भुवनानि पुत्र निक्षिप्य तोये सचराचराणि ॥
तमोगुणं मानयानो भवामि संहृत्य भूतानि जलात्मकोऽहम् ॥२॥
जलस्वरूपं मम दिव्यमाहुः सिद्धाः सदा निर्मलनिष्कलङ्कम् ॥
नित्यं निरुक्तं निरपेक्ष्यमाहुरात्मानमेकं परमं वदन्ति ॥३॥
ततः शनैरहममलो जलात्मा क्रमेण संयम्य विवृद्धचेतनः ॥
सत्वात्मकं गुणमहं प्रतिपद्य पुत्र नारायणेति जगति प्रथितो भवामि ॥४॥
ततो गुणः सात्विकः सम्बभूव रजोगुणो ब्रह्मसंज्ञो बभूव ॥
ततश्च रुद्रत्वमवाप्य रौद्रं भावं धृत्वा तामसं संहरामि ॥५॥

स्कन्द उवाच ॥

किमर्थं सात्विकं तात तामसं किं प्रयोजनम् ॥ राजसं च सुरश्रेष्ठ श्रोतुमिच्छा प्रवर्तते ॥६॥

शङ्कर उवाच ॥

सत्वेनाहं वेदगर्भो देवान् सर्वान् सृजामि च ॥ तामसेनासुरान् मूढान् स्थावरान् पशुयोनिजान्
॥७॥
शेषान्राजसभावेन त्रिधा त्रैलोक्यसम्भवः ॥ ब्रह्मविष्णुशिवाख्योऽहं गुणानां प्रविभागतः ॥८॥

## शिवेन सृष्टिक्रमकथनम्

कुमार उवाच ।।

त्वमेकः सर्वभूतेषु साक्षिवत् परिवर्तसे ।। बहुत्वस्य च को हेतुरेकत्वस्य च शंस मे ।।९।।
भूतानामत्र देवेश सृष्टिं च पुरुषोत्तम ।।

शङ्कर उवाच ।।

शृणु पुत्र परं गुह्यं सृष्टिं वैकारिकात्मिकाम् ।।१०।।
सात्विकोऽहं पुरा पुत्र जलरूपी जगन्मयः ।। क्षोभं सञ्जनयामास कालेन कमलेक्षण ।।११।।
ततो मत्क्षोभसम्भूतं दिव्यं रूपं चतुर्भुजम् ।। सात्विकं परमार्थं च प्रसिद्धं विष्णुसंज्ञया ।।१२।।
व्याप्य सर्वेषु भूतेषु विष्णुत्वमुपजग्मिवान् ।। अच्युतानन्तगोविन्दविष्णुनारायणादिभिः ।।१३।।
नामभिः कीर्तितो लोके पुराणेषु च सर्वशः ।। वैकारिकः स विज्ञेयो दध्नि हय्यङ्गवीनवत् ।।१४।।
मम शक्तिरिति ख्यातो ह्यादिदेवः सनातनः ।। अनादिरादिः सर्वस्याप्यमध्यो मध्यवर्तकः ।।१५।।
अनङ्गश्चान्तकश्चैव स एव जगतः प्रभुः ।। कर्ता कारयिता चैव संहर्ता चैव पुत्रक ।।१६।।
शेते पद्मेक्षणो विष्णुरात्मन्येवात्ममायया ।। स्वपतस्तस्य कुक्षौ तु सम्बभूवाब्जमुत्तमम् ।।१७।।
विकासमगमत् पुत्र तस्माद्ब्रह्मा बभूव ह ।। पद्मयोनिः पद्मगर्भो स्वयम्भूः प्रपितामहः ।।१८।।
अव्यक्तजनको वीरो विरिञ्चिः स प्रजापतिः ।। चतुर्मुखश्चतुर्मूर्तिश्चतुर्वेदविभूषणः ।।१९।।
निरीक्ष्य विश्वं विश्वात्मा निरालम्बं जलात्मकम् ।। चिन्ता समभवत्तस्य किं कर्तव्यं मयेति वै ।।२०।।
ततः शब्दो महानासीद्ब्रह्मा ब्रह्मन्निति स्फुटम् ।। सृष्टिं कुरुष्व भगवन्नचिन्तां कर्तुमर्हसि ।।२१।।
इत्युक्तान्तर्दधे वाणी श्रुत्वा तां प्रपितामहः ।। पुनश्चिन्तां जगामाथ कथं स्रक्ष्यामि वै प्रजाः ।।२२।।
ततः कोपः समभवन्महांस्तस्य महात्मनः ।। क्रोधाभिभूतस्य विभोर्ललाटात् सम्बभूव ह ।।२३।।
अङ्गुष्ठमात्रः पुरुषस्तामसो रुद्रसंज्ञकः ।। रुरोद सुस्वरं बालो ब्रह्मा प्राह विकारजम् ।।२४।।
विभजात्मानमनघ मा रुदेति पुनः पुनः ।। अथाविभजदात्मानमेकधा दशधा च सः ।।२५।।
एकादशात्मा भगवानीशानः परमेश्वरः ।। शङ्करः सर्वभक्तानां देवादीनां च सुव्रत ।।२६।।
ब्रह्मा तमाह वरदं रुद्रं लोकगुरुः स्वयम् ।। सृजस्व भूतसङ्घातं सस्वेदाण्डजरायुजम् ।।२७।।
औद्भिदस्थावरादींश्च स्थाणुस्त्वं स्थविरो ह्यसि ।। इत्युक्तो ब्रह्मणा रुद्रो ममज्ज सलिले तदा ।।२८।।
ततश्चिन्ता च ववृधे पद्मयोनेः सिसृक्षतः ।। चिन्ताभिभूतस्य ततो चिरिञ्चेस्तु महात्मनः।।२९।।
दशपुत्रा बभूवुर्हि मनसः पद्मजन्मनः ।। सनत्कुमारप्रमुखाः सिद्धा योगाधिकारिणः ।।३०।।

तानाह भगवान् ब्रह्मा सृष्टिं कुरुत पुत्रकाः ॥ कर्तव्यं भो महाभागा मन्नियोगादसंशयम् ॥३१॥
ते तमाहुरिदं सिद्धा निरपेक्षा वयं प्रभो ॥ अशक्ताः सर्गकरणे गमिष्यामो यथेप्सितम् ॥३२॥
इत्युक्त्वाऽन्तर्दधुः सर्वे पद्मयोनेरकामतः ॥ ततः पुनरमेयात्मा ध्यानं सुचिरमास्थितः ॥३३॥
ध्यायतस्तस्य सुचिरमङ्गुष्ठाद्दक्षिणात् पुनः ॥ बभूव दक्षो धर्मात्मा वामाङ्गुष्ठात् ततः पुनः ॥३४॥
तस्य पत्नी महाभागा जाता कमललोचना ॥ तयोर्विवाहमकरोत् भगवान् लोकपावनः ॥३५॥
तस्यामस्मात्ततो जाताः कन्याः षष्टिः सुशोभनाः ॥ तासां प्रसूत्या त्रैलोक्यमवर्धत परस्परम् ॥३६॥

कुमार उवाच ॥

भूयस्त्वं हि ममाचक्ष्व यथा सृष्टं स्वयम्भुवा ॥ येभ्यो दत्ता दक्षकन्यास्तन्मे शंसितुमर्हसि ॥३७॥

शङ्कर उवाच ॥

प्रधानाद्ब्रह्मणस्तात महानुत्पद्यते ततः ॥ प्रधानतत्वेन महान् त्वचा बीजमिवावृतम् ॥३८॥
वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ॥ त्रिविधोयमहङ्कारो महत्तत्वादजायत ॥३९॥
भूतेन्द्रियाणां हेतुः स त्रिगुणात्मा सुरोत्तम ॥ यथा प्रधानेन महान् महता स तथाऽऽवृतः ॥४०॥
भूतादिस्तु विकुर्वाणः शब्दतन्मात्रतां गतः ॥ ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम् ॥४१॥
शब्दमात्रमथाकाशं भूतादिस्तं समावृणोत् ॥ ततस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृता ॥४२॥
ततो वायुरभूत्तत्र तस्य स्पर्शगुणो मतः ॥ ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह ॥४३॥
ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते ॥ स्पर्शमात्रस्तु वै वायू रूपमात्रं समावृणोत् ॥४४॥
ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह ॥ रसमात्राणि चाम्भांसि रसाधाराणि तानि तु ॥४५॥
विकुर्वाणानि चाम्भांसि गन्धमात्रं ससर्जिरे ॥ सङ्घतो जायते तस्मात्तस्य गन्धो गुणो मतः ॥४६॥
तन्मात्रेण विशेषाणि आविशेषात् ततो हि वै ॥ भूततन्मात्रसर्गोऽयमहङ्कारात् तु तामसात् ॥४७॥
तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश ॥ एकादशं मनश्चात्र शृणु चैतानि पुत्रक ॥४८॥
त्वक्चक्षुर्नासिका जिह्वा श्रोत्रं वै पञ्चमं स्मृतम् ॥ शब्दस्पर्शरूपरसगन्धाश्च विषया मताः ॥४९॥
पायूपस्थौ करौ पादौ वाक्च वै पञ्चमी स्मृता ॥ विसर्गशिल्पगत्युक्तिकर्म चैषां च कीर्त्यते ॥५०॥

इति श्री स्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे तृतीयोऽध्यायः ॥ ३ ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ४ ॥  NEXT>>  लोकसंख्या-८५

॥ ब्रह्मसृष्टिविवेचनम् ॥

॥ ब्रह्मसृष्टिविवेचनम् ॥

शङ्कर उवाच ॥

नानावीर्याः पृथग्भूतास्त्र ते संहतिं विना ॥ अशक्तास्ताः प्रजाः स्त्रष्टुमसमागम्य कृत्स्नशः ॥१॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयात् ॥ एकसङ्घातलक्षाश्च संप्राप्यैक्यमशेषतः ॥२॥
पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च ॥ महदादयो विशेषांतान्त्संघमुत्पादयन्ति ते ॥३॥
तत्कर्मणो विवृद्धं तु जलं बुद्बुदवत्समम् ॥ भूतेभ्योऽण्डमभूत्तत्र बृहत् तदुदकेशयम् ॥४॥
तस्मिन्नण्डेऽभवत्तत्र सदेवासुरमानुषम् ॥ पावकाद्यनिलाकाशैस्ततो भूतादिना बहिः ॥५॥
वृतो दशगणैरण्डो भूतादि महता यथा ॥ अव्यक्तेनावृतः पुत्र तैः सर्वैः सहितो महान् ॥६॥
एभिरावरणैरण्डः सप्तभिर्विकृतैर्वृतम् ॥ नालिकेरदलस्यान्तर्बीजं बाह्यदलैरिव ॥७॥
जुष्टं रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ॥ सृष्टिस्थित्यन्तकरणा ब्रह्मविष्णुमहेश्वराः ॥८॥
स्वसंज्ञया वपुस्तत्र एकस्तत्राहमच्युतः ॥ मद्भयात् सृजते ब्रह्मा पाति विष्णुर्ममाज्ञया ॥९॥
उपसंह्रियते चान्ते मया वत्स यदृच्छया ॥ पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥१०॥
सर्वान्तःकरणं तैस्तु पुरुषस्य च यज्जगत् ॥ स एव सर्वभूतेशो यः सर्वजगति स्थितः ॥११॥
सर्गादिकं मया प्रोक्तं भूतादिश्चैव सत्तम ॥ शृणु येषां दक्षकन्याः प्रदत्ता ब्रह्मणा पुरा ॥ १२॥
सृष्टिं चिन्तयतस्तस्य ब्रह्मणोऽव्यक्तजन्मनः ॥ अबुद्धिपूर्वतः सर्गः प्रागभूत् स तमोमयः ॥१३॥
तमोमयो महामोहतामिस्रो ह्यन्धसंज्ञकः ॥ अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः ॥१४॥
पञ्चधाऽवस्थितः सर्गो ध्यायतः समबुद्धितः ॥ बहिरन्तश्चाप्रकाशं संवृतात्मानमव्ययम् ॥१५॥
तं दृष्ट्वा बद्धिजं सर्गं सर्गमन्यं चकार ह ॥ ध्यायतस्तस्य वै सर्गं तिर्यक् स्त्रोतो ह्यवर्तत ॥१६॥
यतस्तिर्यक् प्रवृत्तस्य तिर्यक् स्त्रोतस्तथा स्मृताः ॥ मृगादयस्ते विख्यातास्तमोप्राया ह्यवेदिनः ॥१७॥
उत्पथग्राहिणश्चैव ज्ञानेन ज्ञानमानिनः ॥ अन्तः प्रकाशास्ते सर्वे ह्यावृताश्च परस्परम् ॥१८॥ ऐ
तमप्यसाधकं मत्वा ध्यायतोन्यं तपो महत् ॥ ऊर्ध्वस्त्रोतस्तृतीयस्तु साम्बिकोर्ध्वं ह्यवर्तत ॥१९॥
ते समे प्रीतिबहुला बहिरन्तश्च नावृताः ॥ प्रकाशाद्बहिरन्तश्च ऊर्ध्वस्त्रोतः सुत स्मृतः ॥२०॥

देवसर्गस्तृतीयस्तु सात्विकस्समवर्तत ॥ तत्रान्यं मनसा दध्यौ साधकं सर्गमुतमम् ॥२१॥
तं ध्यात्वा साधकं देवः आदिसर्गादनुक्रमात् ॥ अन्तश्च ध्यायतस्तस्य सत्यसन्धस्य वै मुने ॥२२॥
प्रादुर्बभूव सर्गोन्यो अर्वाक्स्रोतश्चतुर्थकः ॥ यस्मादर्वाक् प्रवर्तन्ते ततोर्वाक्स्रोतसस्तु ते ॥२३॥
ते वै प्रकाशबहुला रजोद्रिक्तास्तमोवृताः ॥ तस्मात्ते दुःखबहुला भूयो भूयश्च चारिणः ॥२४॥
प्रकाशो बहिरन्तश्च मनुष्याः साधकास्तु ते ॥ इत्येते कथिताः पुत्र पञ्चधा सर्गलक्षणाः ॥२५॥
महान्वै प्रथमः सर्गो विज्ञेयो ब्रह्मणस्तु सः ॥ तस्मात्तेषु द्वितीयश्च भूतानां सर्ग उच्यते ॥२६॥
वैकारिकस्तृतीयस्तु सर्ग ऐंद्रियकः स्मृतः ॥ तिर्यक्स्रोतश्च यः प्रोक्तो तैरन्यः स तु उच्यते ॥२७॥
ततोर्वाक्स्रोतसः षष्ठो देवसर्गस्तु संस्मृतः ॥ ततोर्ध्वस्रोतसादर्वाक् मानुषः सप्तमःस्मृतः ॥२९॥
अनुग्रहोष्टमः सर्गः सात्विकस्तामसश्च यः ॥ पुण्ये ते वै कृताः सर्गाः प्रकृतास्तत्र ये स्मृताः ॥२९॥

प्राकृता वैकृतश्चैव कौमारो नवमः स्मृतः ॥ इत्येते समवाख्याता नवधा च प्रजापतेः ॥३०॥
प्राकृतो वैकृतश्चैव हेतूनि जगतश्च तौ ॥ स्पृजतो जगदीशस्य श्रुणु यैर्वर्धिताः प्रजाः ॥३१॥
तापिताः कर्मभिः पौर्वैर्यथा वा दर्शनं गताः ॥ ख्यात्या स्मृत्या ह्यनीवृत्या संहारैरुपसंहृताः ॥३२॥
सुराद्याः स्थावरान्ताश्च प्रजाः पुत्र चतुर्विधाः ॥ कुर्वतो ब्रह्मणः सृष्टिं जज्ञिरे मानसाः प्रजाः ॥३३॥
सिसृक्षो र्जघनात् पूर्वमसुरा जज्ञिरे ततः ॥ तामुत्ससर्ज वैराग्यात्तमोमात्रात्मिकां तनुम् ॥३४॥
सा त्यक्ता ब्रह्मणा पुत्र रात्रिसंज्ञामवाप च ॥ ततोन्यं देहमास्थाय स्रष्टुकामः पुनः प्रजाः ॥३५॥
सत्वोद्रिक्तात् समुद्भूता मुखतः पद्मजन्मनः ॥ पावकप्रमुखा विप्रा देवाश्च सुरसत्तमाः ॥३६॥
उत्ससर्ज तनुं तां च पुनर्धर्मेच्छया विभुः ॥ सा त्यक्ता ब्रह्मणा वत्स दिवासंज्ञामवाप च ॥३७॥
ततो वै बलिनो रात्रौ राक्षसाः कामचारिणः ॥ देवा दिवा वै बलिनः सत्वोद्रिक्तास्ततस्तु ते ॥३८॥
पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे । उत्ससर्ज पितॄन् सृष्ट्वा ततस्तामपि स प्रभुः ॥३९॥
सा चोत्सृष्टा भवत्सन्ध्या दिननक्तान्तरस्थिता ॥ रजो मात्रात्मिकामन्यां जगृहे स तनुं पुनः ॥४०॥

रजोमात्रात्मिका जाता मनुष्या देवसत्तम ॥ आशु तत्याज तां देवः तनुं ब्रह्मा प्रजापतिः ॥४१॥
ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याभिधीयते ॥ ज्योत्स्नागमे ते बलिनो मनुष्याः पितरस्तथा ॥४२॥
रजोमात्रात्मिकां देवस्तनुमन्यां प्रजापतिः ॥ जगृहे विबुधश्रेष्ठ पुनः सर्गेच्छया प्रभुः ॥४३॥

अन्धकारे दुराचारा व्यसृजद्विविधाः प्रजाः ॥ विरूपाः श्मश्रुला जाता पापकर्मरतास्तु ते ॥४४॥
मैव नो रक्षिता मैव इत्युक्ता राक्षसाश्च ते ॥ ऊचुः खादाम इत्यन्ये यतो यक्षास्तु तत्क्षणात् ॥४५॥
तान् दृष्ट्वा ब्रह्मणो जातान् धिक्धिगित्यभवन्मनः ॥ धिक्कारेणास्य तेषां हि जगतः परमेष्ठिनः ॥४६॥

केहिता शिरसो भूयोप्युपारोहां त वै शिरः ॥ अहयस्तेन विख्याता दंदशूकास्तु तामसाः ॥४७॥
सर्पणात्तेऽभवन् सर्पाः क्रूरा विषबलोद्धताः ॥ ततः क्रुद्धो जगत्सृष्टा क्रोधाद्भूतान् विनिर्ममे ॥४८॥
उग्राः कपिशवर्णेन भूतास्ते पिशिताशिनः ॥ वामाङ्गतस्ततो जाता गन्धर्वाः परमेष्ठिनः ॥४९॥
पिबन्तो जज्ञिरे वाचं गन्धर्वास्तेन तेऽभवन् ॥ एतान् हि सृष्ट्वा भगवान् ब्रह्मा तच्छक्तिचोदितः ॥५०॥
ततः स्वच्छन्दतोऽन्यानि वयांसि वयसोत्सृजत् ॥ अवयो वक्षसो जाता मुखतोऽजान् स सृष्टवान् ॥५१॥
ततोङ्गनाश्च पार्श्वाभ्यां सृष्टवांश्च प्रजापतिः ॥ पद्भ्यामश्वाः समुत्पन्ना रासभा गवया मृगाः ॥५२॥
उष्ट्राश्चाश्वतराश्चैव पशवोन्याश्च जातयः ॥ ओषध्यः फलमूलानि रोमभ्यस्तस्य जज्ञिरे ॥५३॥
त्रेतायुगमुखे ब्रह्मा कल्पस्यादौ सुरोत्तम ॥ सृष्ट्वा च त्वोषधीः सम्यग्युयोज स तदाध्वरे ॥५४॥
गौरजो महिषी मेषः श्वाऽश्वाश्वतरगर्दभाः ॥ एतान् ग्राम्यपशूनाह आरण्यांश्च निबोध मे ॥५५॥
श्वापदो द्विखुरो हस्ती वानरः पञ्चमाः स्मृताः ॥ औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः ॥५६॥

गायत्रीं च ऋचं चैव त्रिवृत्साम रथंतरम् ॥ अग्निष्टोमादियज्ञांश्च निर्ममे प्राग्भवान्मुखात् ॥५७॥
यजूंषि त्रैष्टुभं छन्दः स्तोमं पञ्चदशं तथा ॥ ब्रहत्साम तथोक्थ्यं च दक्षिणादभवन् मुखात् ॥५८॥
सामानि जगतीछन्दः स्तोमं सप्तदशं तु वै ॥ वैरूप्यमतिरात्रं च पश्चिमादसृजन्मुखात् ॥५९॥
एकविंशमथ ब्रह्मा ह्याप्तोर्यामं तथैव च । अनुष्टुभं च वैराजानुत्तरादसृजन्मुखात् ॥६०॥
उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे ॥ देवासुरपितॄन् सृष्ट्वा मनुष्यांश्च प्रजापतिः ॥६१॥
ततः पुनः ससर्जादौ ससङ्कल्पः प्रजापतिः ॥ यक्षान् पिशाचान् गंधर्वान् तथैवाप्सरसां गणान् ॥६२॥ नरान् किन्नररक्षांसि पयः पशुमृगोरगान् ॥ सव्ययं चाव्ययं चैव यदिदं स्थाणुजङ्गमम् ॥६३॥

तत्ससर्ज तदा ब्रह्मा भगवान् विश्वकृत् प्रभुः ॥ तेषां यानीह कर्माणि प्राक्सृष्टानि प्रपेदिरे ॥६४॥

तान्येव प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः ॥ हिंस्राहिंस्त्रैर्मृदुःक्रूरैर्धर्माधर्मौ ऋतानृते ॥६५॥
तद्भाविस्ततत्प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥ इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः ॥६६॥
नानात्वं विनियोगं च धातैवं विसृजत् स्वयम् ॥ नामरूपं च भूतानां कृत्यानां च प्रवर्तनम् ॥६७॥
यावदब्देभ्य एवादौ देवादीनां चकार सः ॥ ऋषीणां नामधेयानि यथा वेदश्रुतानि वै ॥६८॥
यथा यथा नियोगानि अन्येषामपि सोऽकरोत् ॥ यथार्थवृत्तलिङ्गानि नानारूपाणि पर्ययात् ॥६९॥
दृश्यंते तानि तान्येव यथा भावादिषु क्रमात् ॥ करोत्येवं विधां सृष्टिं कल्पादौ स पितामहः ॥७०॥
सिसृक्षाशक्तियुक्तोऽसौ सृज्यशक्तिप्रचोदितः ॥ सत्याभिध्यायिनः पूर्वं सिसृक्षोर्ब्रह्मणो गतिम् ॥७१॥ ततोऽभिध्यायतस्तस्य जज्ञिरे मानसाः प्रजाः ॥ तच्छरीरं समुत्पन्नं कार्यैस्तैः कारणैः सह ॥७२॥
क्षेत्रज्ञाः समवर्तन्त गात्रेभ्यस्तस्य धीमतः ॥ सर्वे ते समवर्तंत ये मया प्रागुदाहृताः ॥७३॥
देवाद्याः स्थावरान्ताश्च त्रैगुण्यविषयाः स्मृताः ॥ एवं भूतानि सृष्ट्वाऽथ स्थावराणि चराणि च ॥७४॥

यदास्य ताः प्रजाः सर्वाः न व्यवर्धन्त धीमतः ॥ ततोन्यान् मानसान् पुत्रान् सदृशानात्मनोऽसृजत् ॥७५॥
भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा ॥ मरीचिमत्रिं दक्षं च वसिष्ठं चैव मानसान् ॥७६॥
नवब्रह्माण इत्येते पुराणे निश्चयं गताः ॥ सनन्दनादयो ये च पूर्वं सृष्टाः स्वयंभुवा ॥७७॥
ते हि लोकेष्वसर्जंत निरपेक्षाः प्रजाकृतौ ॥ सर्वे ते ह्यागतज्ञाना वीतरागा विमत्सराः ॥७८॥
तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः ॥ ब्रह्मणोऽभून्महाक्रोधो त्रैलोक्यदहनक्षमः ॥७९॥
तस्य क्रोधसमुद्भूतज्वालामालो विदीपितः ॥ मदंशभूतो भगवान् क्रोधजः पद्मजन्मनः ॥८०॥
रुद्रोऽभूद्भगवान् देवो मध्याह्नार्कसमप्रभः ॥ अर्धनारीश्वरवपुः प्रचण्डोग्रशरीरवान् ॥८१॥
विभजात्मानमित्युक्त्वा ब्रह्मा चान्तर्दधे तदा ॥ तथा द्विधाऽकरोत् स्त्रीत्वं पुरुषत्वं च सत्तमः ॥८२॥

बिभेद पुरुषत्वं च दशधा चैकधा पुनः ॥ सौम्यासौम्ये तथा शान्ताशान्ते स्त्रीत्वं चकार ह ॥८३॥
बिभेद बहुधा देवः स्वरूपैरसितैः सितैः ॥ ततो ब्रह्मात्मसंभूतं सर्वं स्वायम्भुवं प्रभुः ॥८४॥
आत्मानमेव कृतवान् प्राजापत्ये मनुं ततः ॥८५॥
इति श्रीस्कान्देसनत्कुमारसंहितायांगोकर्णखंण्डेसृष्टि क्रमोनामचतुर्थोऽध्यायः ॥४॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ५ ॥ NEXT>> श्लोक संख्या–४७

## ॥ स्वायंभुवमनोरुत्पत्तिः–तेन स्वप्रजाद्वारा सृष्टिः ॥

॥ कुमार उवाच ॥

मनोस्तु सम्भवं तात ममाचक्ष्व स्वयम्भुवः ॥ कुर्वतो मनुदेवांश्च क्रमादाचक्ष्व तान्मम ॥१॥

॥ शङ्कर उवाच ॥

प्रजाभिध्यायिनस्तस्य ब्रह्मणोऽव्यक्तजन्मनः ॥ प्राजापत्ये कृता बुद्धिस्तस्माज्जज्ञे मनुः स्वयम् ॥२॥

शतरूपां च तां नारीं कृत्वा स भगवान् पुनः ॥ स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे पितुः ॥२॥
तस्माच्च पुरुषाद्देवी शतरूपा ह्यसूत च ॥ प्रियव्रतोत्तानपादौ प्रसूत्याकूतिशंसितम् ॥३॥
कन्याद्वयं च कौमार्यरूपौदार्यगुणान्वितम् ॥ ददौ प्रसूतिं दक्षाय आकूतिं रुचये ददौ ॥४॥
प्रजापतिः स जगृहे तस्मिन् जज्ञे च दक्षिणा ॥ पुत्रो यज्ञो महाभाग दम्पत्योर्मिथुनं ततः ॥५॥
यज्ञस्य दक्षिणायां तु पुत्रा द्वादश जज्ञिरे ॥ यमा इति समाख्याताः पुत्राः स्वायम्भुवान्तरे ॥६॥
प्रसूत्यां च तथा दक्षश्चतस्रो विंशतिं तथा ॥ ससर्ज कन्याः क्रमशो तासां नामानि मे श्रुणु ॥७॥
श्रद्धा लक्ष्मीर्धृतिः पुष्टिस्तुष्टिर्मेधा क्रिया तथा ॥ बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदशी ॥८॥
अपत्यहेतोर्जगृहे धर्मो दाक्षायणीः प्रभुः ॥ ताभ्यः शिष्टा यवीयस्यः एकादश सुलोचनाः ॥९॥
सती ख्यातिश्च सम्भूतिः स्मृतिः प्रीतिः क्षमा तथा ॥ सन्नतिश्चानसूयोर्जा स्वाहा चैव स्वधा परा ॥१०॥
भवो भृगुर्मरीचिश्च तथा चैवाङ्गिरा मुनिः ॥ पुलस्त्यः पुलहश्चैव क्रतुर्ऋषिवरस्तथा ॥११॥
अत्रिर्वसिष्ठो वह्निश्च पितरश्च यथाक्रमम् ॥ ख्याता ह्याजगृहुः कन्या मुनयो देवसत्तम ॥१२॥
श्रद्धा कामं च श्रीर्दर्पं नियमं धृतिरात्मजम् ॥ सन्तोषं च तथा पुष्टिः क्षमां तुष्टिरसूयत ॥१३॥_
सुखं सिद्धिर्यशः कीर्तिरित्येते धर्मसूनवः ॥ कामो नन्दीसुतो हर्षः ताभ्यां हिंसा ह्यजायत ॥१४॥_

अधर्मश्चैव सञ्जातः सर्वेषामपकारकः ॥ हिंसा भार्यात्वधर्मस्य सुतं जज्ञे तथाऽनृतम् ॥१५॥_
तथा च निकृतिं ताभ्यां भयं नरकमेव च ॥ वेदना चैव मिथुनं तयोर्जज्ञे च वै प्रभो ॥१६॥_
माया मृत्युस्तथाभूतं सर्वभूतापकारकम् ॥ वेदनाथ सुतं चापि दुःखं जज्ञेऽथ रौरवम् ॥१७॥_
मृत्युं व्याधिर्जरा शोकं तृष्णा क्रोधमसूयत ॥ दुःखोत्तराः स्मृताः ह्येते सर्वे चाधर्मलक्षणाः ॥१८॥
स्त्री पुत्रो वा न तेषां हि सर्वे ते ऊर्ध्वरेतसः ॥ रौद्राण्येतानि रूपाणि मदीयानि महामते ॥१९॥
नित्यप्रलयहेतुत्वात् ज्ञातव्यानि मनीषिभिः ॥ मरीचिरत्रिर्दक्षश्च भृग्वाद्याश्च प्रजेश्वराः ॥२०॥
जगत्यस्मिन् महात्मानो नित्यसर्गस्य हेतवः ॥ मनवो मनुपुत्राश्च भूपा वीर्यधनाश्च ये ॥२१॥
सन्मार्गाभिरता शूरास्ते नित्यं स्थितिहेतवः ॥ सर्गस्थितिविनाशांश्च कुर्वन्ति स्वेच्छया विभो ॥२२॥
तैस्तैरुपायैः पुत्राहं स्वेच्छयाऽजादिरूपभाक् ॥ नैमित्तिकः प्राकृतिकस्तथा चात्यन्तिको मतः ॥२३॥
तथा नित्यश्च भूतानां प्रलयोयं चतुर्विधः ॥ ब्रह्मा नैमित्तिकस्तत्र जायते जगतीपतिः ॥२४॥
प्रयाते प्रकृतौ नाशः ब्रह्माण्डे प्राकृतो लयः ॥ ज्ञानादात्यन्तिकः प्रोक्तो योगिनां परमात्मनि ॥२५॥
नित्यः सदैव जातानां यो विनाशो दिवानिशम् ॥ प्रसूतिः प्रकृतेर्या तु सा सृष्टिः प्राकृता मता ॥२६॥
देवादीनां तथा प्रोक्ता या सृष्टिः प्रलयादनु ॥ सा तु नैमित्तिको बोधो निमित्तं ब्रह्मणो यतः ॥२७॥।

भूतान्यनुदिनं यत्र जायन्ते देवसत्तम ॥ नित्यसर्गो हि यः प्रोक्तो पुराणार्थविशारदैः ॥२८॥
ईक्षया ब्रह्मणो यस्तु विकारः प्रकृतेर्मतः ॥ सर्ग आत्यन्तिकः प्रोक्तो विद्वद्भिः सुरसत्तम ॥२९॥
एवं सर्वशरीरेषु भगवान् भूतभावनः ॥ करोति सततं देव उत्पत्तिस्थितिसंहृतिं ॥३०॥
उत्पत्तिस्थितिनाशानां शक्तयः सर्वदेहिषु ॥ वैष्णव्यः परिवर्तन्ते विष्णुः शक्तिः शिवस्य हि ॥३१॥
गुणत्रयमयं ह्येतत् ब्रह्मशक्तित्रयं मतम् ॥ यस्यैतस्य स यात्येव परं नावर्तते यतः ॥३२॥

कुमार उवाच ॥

अष्टमूर्तिर्भवान् देव तत्वविद्भिरुदीर्यते ॥ अथवैष्वष्टधा देव बहुरूपः प्रशस्यते ॥३३॥

शङ्कर उवाच ॥

कथितं तव वै वत्स ब्रह्मणस्तामसः पुराः ॥ ममाष्टभेदं श्रुणु वै यथातत्वेन पुत्रक ॥३४॥
आत्मनः सदृशं पुत्रः अच्युतः परमेष्ठिनः ॥ प्रादुरासीत् प्रभोरंकात् कुमारो नीललोहितः ॥३५॥
रुरोद सुस्वरं सोऽथ ररास च पुनः पुनः ॥ किमर्थं रोदिषि विभो इति ब्रह्मा ह्यचोदयत् ॥३६॥

नाम देहीति तं प्राह प्रत्युवाच प्रजापतिम् ॥ ततः प्रजापतिः प्राह नाम्ना रुद्रस्त्वमीश्वर ॥३७॥
इत्युक्त्वा च पुनस्तं वै सापेक्षं कमलासनः ॥ ततोन्यानि ददौ तस्मै अष्टनामानि स प्रभुः ॥३८॥
अष्टनामानि चैवैषां पत्नीं पुत्रांश्च स प्रभुः ॥ शर्वं भवं तथेशानं तथा पशुपतिं प्रभुम् ॥३९॥
भीममुग्रं महादेवमुवाच च पितामहः ॥ एतेषां मम देवानां ददौ स्थानानि भागशः ॥४०॥
वह्निः सूर्यो जलं भूमिर् वायुराकाश एव च ॥ दीक्षिता ब्राह्मणाः सोमः स्थानान्येतान्यनुक्रमात् ॥४१॥
उषा सुवर्चला चैव सुकेशी चापरा शिवा ॥ स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम् ॥४२॥

सूर्यादीनां सुरश्रेष्ठ रुद्राद्यैर्नामभिः सह ॥ पुत्र तेषां महाभाग पुत्रनामनि मे श्रुणु ॥४३॥
तेषां मूर्तिप्रसूत्या च इदमापूरितं जगत् ॥ शनैश्चरस्तथा शुक्रो लोहिताङ्गो महाजवः ॥४४॥
स्कन्दः सर्गोऽथ सन्तानो बुधश्चानुक्रमात् सुताः ॥ एवं प्रकारो रुद्रोऽसौ भार्या तस्य महात्मनः ॥४५॥
क्रोधात् पितुर्वरारोहा तत्याज स्वतनुं पुरा ॥ हिमवद्दुहिता चाभूत्तव माता महाव्रता ॥४६॥
मेनायां पितृकन्यायां बभूवेयमनिन्दिता ॥ मामुवोढ सती बाला स्मरन्ती पौर्विकां तनुम् ॥४७॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे स्वायम्भुवमनोरुत्पत्तिकथनंनाम पञ्चमोऽध्यायः ॥ ५ ॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ६ ॥ NEXT>> श्लोक संख्या–६०

## ॥ युगादिकालव्यवस्था ॥

कुमार उवाच ॥
धर्मस्य सम्भवस्तात नाख्यातो भवता पुरा ॥ कथं धर्मो हि भगवान् बभूव पुरुषोत्तम ॥१॥
शङ्कर उवाच ॥
सत्याभिध्यायिनस्तस्य ऊर्ध्वस्रोतो यदाऽभवत् ॥ तदाऽसौ भगवान् ब्रह्मा जगन्मूलमचिन्तयत् ॥२॥
धर्मोऽथ जगतामादिरक्षयः सम्बभूव ह । चतुष्पान्मनसस्तस्य समुत्तस्थौ जगन्मयः ॥३॥
तस्य सूतिः प्रसूतिश्च कथिता ते सुरोत्तम ॥ देवौ धातृविधातारौ भृगोः ख्यातिरसूयत ॥४॥

श्रियं च देवदेवस्य पत्नी नारायणस्य या ॥ अत्रेः सोमो मरिचेस्तु काश्यपः सम्बभूव ह ॥५॥
काश्यपं परिणिन्युर्वै दाक्षायण्यस्त्रयोदश ॥ तासु जाताः सुरश्रेष्ठाः मानवा दैत्यसत्तमाः ॥६॥
पक्षिणश्चासुराश्चैव पशवः स्थावराश्च ये ॥ नागा यक्षाः पिशाचाश्च सर्वं स्थावरजङ्गमम् ॥७॥
तैश्च जातैः प्रजातैश्च इदमापूरितं जगत् ॥ सोमाय दत्ताः कन्यास्ताः सप्तविंशति पुत्रक ॥८॥
कालस्य नयने युक्ता नक्षत्राख्याः सुरोत्तम ॥

कुमार उवाच ॥

कालमाख्याहि भगवन् कालेनाक्षिप्यते जगत् ॥९॥
कोऽसौ काल इति प्रोक्तो योऽक्षयानां क्षयङ्करः ॥

शङ्कर उवाच ॥

कालो ममांशो भगवान् तामसो ब्रह्मसम्भवः ॥१०॥
तेन सर्वमिदं तात ह्रियते च पुनः पुनः॥ सृज्यते तेन वै तात बलवान् परिवर्तते ॥११॥
देवाद्या स्थावरान्ताश्च कालेनार्जन्ति वै स्थितिम् ॥ नातिक्रमति वै कालं कश्चिदत्र सुरोत्तम ॥१२॥
सृष्टिरेषा जगद्धातुः कालेन परिवर्तते ॥ कालश्चाहं स्वयं विष्णुर् ब्रह्मा च कमलासनः ॥१३॥
कालो हि भगवांल्लोके येन त्वमपि लीयसे ॥ आयुर्वै ब्रह्मणस्तात तस्य वर्षशतं स्मृतम् ॥१४॥
तत्पराख्यं तदर्धं च परार्धमिति गीयते ॥ कालस्वरूपं रुद्रस्य तन्मयोक्तं तवानघ ॥१५॥
तेन तस्य निबोध त्वं परिणामोपपादकम् ॥ अन्येषां चैव जन्तूनां चराश्च न चराश्च ये ॥१६॥
भूम्यद्रिसागरादीनामशेषाणां च सत्तम ॥ अष्टादशनिमेषैस्तु काष्ठा भवति पुत्रक ॥१७॥
काष्ठात्रिंशत्तु या ज्ञेया कलाकालस्तु सूरिभिः ॥ तावतीभिः कलाभिस्तु क्षणकाल उदाहृतः ॥१८॥
द्वादशक्षणकालैस्तु मुहूर्तः समुदाहृतः ॥ त्रिंशन्मुहूर्तयोगे च कालोऽहोरात्रमुच्यते ॥१९॥
तैश्च त्रिंशदहोरात्रैमासः पार्वतिनन्दन ॥ अयनं दक्षिणं मासाः षण्मासा उत्तरायणम् ॥२०॥
अयनद्वितयाख्यश्च कालः संवत्सरः स्मृतः ॥ दक्षिणं चायनं रात्रिर्देवानामुत्तरं दिनम् ॥२१॥
संवत्सरं नृणां चैव देवानां दिनमुच्यते । शतत्रयेण वर्षाणां षष्ट्या च सुरसत्तम ॥२२॥
मनुष्यसंख्यया वर्षं देवानामिह गण्यते ॥ इति दिव्येन मानेन चतुर्युगविकल्पना ॥२३॥
वर्ण्यमानं मया पुत्र यथावच्छ्रोतुमर्हसि ॥ चत्वारि च सहस्राणि वर्षाणां कृतमुच्यते ॥२४॥
तस्य तावच्छती सन्ध्या संध्यांशश्च तथाविधः ॥ त्रीणि वर्षसहस्राणि त्रेतं युगमुदाहृतम् ॥२५॥
दिव्यवर्षसहस्रे द्वे द्वापरं युगमुच्यते ॥ दिव्यवर्षसहस्रन्तु कलेश्चैव प्रमाणकम् ॥२६॥

कृतं नाम युगं पूर्वं यत्र धर्मः सनातनः ॥ कृतमेव च कर्तव्यं तस्मिन् काले सुरोत्तम ॥२७॥
न तत्र धर्माः सीदन्ति न च क्षीयन्ति वै प्रजाः ॥ ततः कृतयुगं नाम गुणतः प्रोच्यते बुधैः ॥२८॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ परस्परं न बाध्यन्ते युगशक्त्या कुमारक ॥२९॥
कृते धर्मश्चतुष्पादश्चातुर्वर्णेषु शाश्वतः ॥ एतत् कृतयुगं नाम त्रैगुण्यफलवर्जितम् ॥३०॥
अपि त्रेतं निबोध त्वं यादृग्रूपं प्रवर्तते ॥ पादेन ग्रसते धर्मो युगे त्रेते च पुत्रक ॥३१॥
ततो यज्ञाः प्रवतन्ते धर्माश्च विविधाः क्रियाः ॥ त्रेतायां भावसङ्कल्पाः क्रियादानफलोदयाः ॥३२॥
द्वापरेपि युगे धर्मो द्विपादेन प्रवर्तते ॥ धर्माश्चतुर्धा वर्धन्ते वर्णाश्रमसंज्ञिकाः ॥३३॥
एवं शास्त्रेषु भिन्नेषु क्रियन्ते बहुधा क्रियाः ॥ तपोदानप्रवृद्धा च राजसी भवति प्रजा ॥३४॥
अल्पायुषो नराश्चैव वेदाश्चातीव दुस्तराः ॥ करोति बहुधा वेदान् व्यासरूपी तदा हरिः ॥३५॥
सत्यस्य वाच्यभिज्ञानात् सत्ये कश्चिद्व्यवस्थितः ॥ सत्यात् प्रच्यवमानानां व्याधयो भबहुधाऽभवन् ॥३६॥
कामाश्चोपद्रवाश्चैव तथा दैवतकारिताः ॥ पादेनैकेन वै वत्स धर्मः कलियुगे मतः ॥३७॥
तामसं गुणमासाद्य नश्यंन्ति स्मृतयस्तदा ॥ वृथाचाराः प्रवर्तन्ते धर्मयज्ञक्रियास्तथा ॥३८॥
आधयो व्याधयस्तन्द्री दोषाः क्रोधादयोऽपि च ॥ उपद्रवाश्च वर्तन्ते मनस्तापाश्च सङ्घशः ॥३९॥
युगेष्वावर्तमानेषु लोको व्यावर्तते पुनः ॥ लोके क्षीणे क्षयं यान्ति देवा लोकप्रवर्तकाः ॥४०॥
दिव्यया सङ्ख्यया पुत्र चतुर्युगमुदाहृतम् ॥ प्रोच्यते तत्सहस्रं च ब्रह्मणो दिनसम्मतम् ॥४१॥
ब्रह्मणो दिवसे पुत्र मनवस्तु चतुर्दश ॥ भवन्ति परिमाणं च तेषां कालकृतं शृणु ॥४२॥
सप्तर्षयः सुराः शक्रो मनुस्तत्सूनवो नृप ॥ एककाले हि सृज्यन्ते संह्रियन्ते च पूर्ववत् ॥४३॥
मन्वन्तरं मनोः कालः सुरादीनां च सत्तम ॥ [[अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतम् ॥४४॥
द्विपञ्चाशत्तथान्यानि सहस्राण्यधिकानि च ॥ त्रिंशत्कोट्यस्तु सम्पूर्णं संख्यातं संख्यया द्विज ॥४५॥
सप्तषष्टि तथान्यानि नियुतानि महामते ॥ विंशतिस्तु सहस्राणि कालोयं साधकं विना ॥४६॥
मन्वन्तरस्य संख्येयं मानुषैर्वत्सरैरिह ॥]] चतुर्दशगुणो ह्येषः कालो ब्राह्मो महान् स्मृतः ॥४७॥
ब्राह्मस्तु निमिषो नाम तस्यान्ते प्रतिसत्वरम् ॥ तदा हि दह्यते सर्वं त्र्यैलोक्यं भूर्भुवादिकम् ॥४८॥
जनाः प्रयान्ति तापार्ता महर्लोकनिवासिनः ॥ एकार्णवे हि त्र्यैलोक्ये ब्रह्मा नारायणात्मकः ॥४९॥
भोगिशय्यां ततः शेते त्र्यैलोक्यज्ञानबृंहितः ॥ ज्ञानस्थैर्योगिभिर्देवश्चिंत्यमानोऽब्जसंभवः ॥५०॥
तत्प्रमाणा ततो रात्रिस्तदन्ते सृज्यते पुनः ॥ एवं तु ब्रह्मणो वर्षमेकं वर्षशतं च यत् ॥५१॥

तदीयमायुस्तस्यार्धं परार्धमभिधीयते ॥ द्विपरार्धात्मकः काल आयुः पङ्कजजन्मनः ॥५२॥
[[एकमेवं द्वितीयं तु परार्धं ब्रह्मणोनघ ॥ तस्यान्तेऽभून्महाकालः पाद्म इत्यभिधीयते ॥५३॥]]
द्वितीयस्य परार्धस्य वर्तमानस्य वै प्रभो ॥ वाराह इति कल्पोयं प्रथमः परिकल्पितः॥५४॥

कुमार उवाच ॥

मन्वन्तराण्यशेषाणि श्रोतुमिच्छामि वै विभो ॥ मन्वन्तरेषु देवेश देवान् सप्तऋषींस्तथा ॥५५॥

शङ्कर उवाच ॥

संक्षेपाद्वदतः पुत्र विदितं पूर्वमेव ते ॥ अतीतानागतानीह मनुमन्वन्तराणि च ॥५६॥
तान्यहं क्रमशः सम्यक् कीर्तयिष्यामि तच्छ्रुणु ॥ स्वायम्भुवो मनुः पूर्वं ततः स्वारोचिषस्तथा ॥५७॥
तामसस्तापसश्चैव रैवतश्चाक्षुषस्तथा ॥ षडेते मनवोऽतीताः साम्प्रतं सूर्यनन्दनः ॥५८॥
वैवस्वतोऽयं यस्यैतत् सप्तमं वर्ततेऽन्तरम् ॥ स्वायम्भुवं तु कथितं कल्पादावन्तरं पुरा ॥५९॥
देवाः सप्तर्षयश्चैव यथावत् कथिता मया ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे युग कालधर्म कल्पादिवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ७ ॥  NEXT>>  श्लोक संख्या–१०८

॥ मन्वन्तर वर्णनम् ॥

॥ चतुर्दशमन्वन्तरवर्णनम् ॥

शङ्कर उवाच ॥

स्वारोचिष

अत ऊर्ध्वं प्रवक्ष्यामि मनोः स्वारोचिषस्य हि ॥ मन्वन्तराधिपांश्चैव देवर्षींस्तत्सुतानपि ॥१॥
पारावताः सतुषिता देवाः स्वारोचिषान्तरे ॥ विपश्चिदत्रदेवेन्द्रो बलवानरिमर्दनः ॥ ॥२॥
ऊर्जस्तम्बस्तथा प्राणो दत्ताग्निर्वरुणस्तथा ॥ निर्वैरशाश्वरीयश्च तत्र सप्तर्षयोभवन् ॥३॥
चैत्रकिंपुरुषाद्यास्तु सुताः स्वारोचिषस्य तु ॥ अपालय तदापृथ्वीं यावत्तस्य व्यवस्थितिः ॥४॥

तामस (औत्तम )

तृतीयेऽप्यन्तरे पुत्र औत्तमो नाम वै मनुः ॥ सुशान्तिर्नाम तत्रेन्द्रो देवराज्यमपालयत् ॥५॥
सुधमोनस्तथासत्य शिशिरश्चप्रतर्दनः ॥ वंशायतश्च पञ्चैते गणा द्वादशकाः स्मृताः ॥६॥
वसिष्ठस्य सुताः सप्त तपोबलसमन्विताः ॥ वसिष्ठानाम ते तस्मिन्नन्तरे मुनयोभवन् ॥७॥
जयः परशुदिव्यस्तु धान्यादस्तु तथौजसः ॥ मनुपुत्राश्च पञ्चैते सर्वे देवपराक्रमाः ॥८॥

---

## तापस

तापसस्यान्तरे देवाः सुरापाहरयस्तथा ॥ सत्याश्च सुधियश्चैव सप्तविंशतिका गणाः ॥ ॥९॥
शिबिरिन्द्रश्च तत्रासीच्छतयज्ञस्य लक्षणः ॥ सप्तर्षयश्च ये चासन् तेषां नामानि मे शृणु ॥१०॥
ज्योतिरापः पृथुः कार्यः शैत्योग्निर्वहकस्तथा ॥ पुरुषश्चर्षयो ह्येते सप्त तत्रापि पुत्रक ॥११॥
सुरःख्यातिः शान्तहयो जानुजङ्घदयस्तथा ॥ पुत्रास्ते तापसस्यासन् राजानः सुमहाबलाः ॥१२॥

---

## रैवत

पञ्चमे चान्तरे वापि रैवतो नाम वै मनुः ॥ विभुश्च तत्र देवेन्द्रो देवांस्तत्रान्तरे श्रुणु ॥१३॥
अमृताशा भूतरया वैकुण्ठास्तु सुमेधसः ॥ चत्वारस्ते गुणास्तत्र चतुर्दश चतुर्दश ॥१४॥
हिरण्यरोमा वेदश्रीरूर्ध्वबाहुस्तथा मुनिः ॥ वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥१५॥
एते सप्तर्षयस्तत्र मनुपुत्रानपि शृणु ॥ बलबन्धुः सुसम्भाव्यः सत्यकश्च तथापरः ॥१६॥
जितारिर्जितरोधश्च बहुयज्ञस्तथापरः ॥ नरेन्द्रः सुमहावीर्यो बभूवुर्मुनिसत्तम ॥१७॥

---

स्वारोचिषश्चोत्तमश्च तापसो रैवतस्तथा ॥ प्रियव्रतान्वया ह्येते चत्वारो मनवस्तथा ॥१८॥
विष्णुमाराध्य वै तपसा महता स प्रियव्रतः ॥ मन्वन्तराधिपानेतान् लब्धवान्पुरुषोत्तमान् ॥१९॥

---

## चाक्षुष

षष्ठे मन्वन्तरे चासीच्चाक्षुषाख्यस्तथा मनुः ॥ मनोहरस्तथैवेन्द्रो देवानपि निबोध मे ॥२०॥
आप्याः प्रसूता भाव्याश्च प्रधानाश्च दिवौकसः ॥ महानुभावा लेख्याश्च पंञ्चैते ह्यष्टका गणाः ॥२१॥
सुमेधा विरजश्चैव हविष्मानुत्तमो मधुः ॥ अतिधामा सहिष्णुश्च सप्तैते ऋषयोभवन् ॥२२॥
ऊरुः पूरुः शतद्युम्नप्रमुखाः सुमहाबलाः ॥ चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोभवन् ॥२३॥

---

## वैवस्वत

सप्तमे चान्तरे प्राप्ते विवस्वत्तनयो मनुः ॥ आदित्या वसवो रुद्रा अश्विनौ च महामते ॥२४॥

त्रयस्त्रिंशदमी देवाः शक्रश्चापि पुरंन्दरः ॥ वसिष्ठः कश्यपश्चात्रिर्जमदग्निस्तु गौतमः ॥२५॥
विश्वामित्रो भरद्वाजः सप्त ब्रह्मर्षयोऽत्र च ॥ इक्ष्वाकुश्चैव नाभागो धृष्टः शंयातिरेव च ॥२६॥
हरिष्मन्तश्च धृष्णुश्च कुरुषो वसुमांस्तथा ॥ वृषघ्नश्चैव विख्याता नवपुत्रास्तु धार्मिकाः ॥२७॥
एतेषामन्वये वीरा जाताः पार्थिवसत्तमाः ॥ ये हि ते सन्ति चाद्यापि द्विवंशप्रभवा नृपाः ॥२८॥
शिवशक्तिरनौपम्या सत्वोद्रिक्ता सदास्थितौ ॥ मन्वन्तरेष्वशेषेषु देवत्वेनाधितिष्ठति ॥२९॥
अंशेन तस्य जज्ञे वै देवः स्वायम्भुवान्तरे ॥ आकूत्यां मनवोदेवा उत्पन्नाः प्रथमान्तरे ॥३०॥
ततः स्वारोचिषे प्राप्ते भगवान् भूतभावनः ॥ तुषिकायां समुत्पन्नो ह्यजितस्तुषितैः सह ॥३१॥
औत्तमेचान्तरे देवः तुषितस्तु पुरः स वै ॥ सत्यायामभवत् सह्यः सत्यैः सह सुरोत्तमैः ॥३२॥
तापसस्यान्तरे चैव सम्प्राप्ते पुनरेव हि ॥ भार्यायां हरिभिः सार्धं हरिरेव बभूव ह ॥३३॥
रैवते चान्तरे चैव संस्कृत्यां मानसैर्भवत् ॥ सम्भूतो राजतैः सार्धं देवैर्देवपरोऽभवत् ॥३४॥
चाक्षुषे चान्तरे देवो वैकुण्ठपुरुषोत्तमः ॥ विकुण्ठायामसौ जज्ञे वैकुण्ठैर्देवतैः सह ॥३५॥
मन्वन्तरे च सम्प्राप्ते तथा वैवस्वतस्य तु ॥ वामनः काश्यपाद्विष्णुरदित्यां सम्बभूव ह ॥३६॥
त्रिभिः क्रमैरिमांल्लोकान् जित्वा येन महात्मना ॥ पुरन्दराय त्रैलोक्यं दत्तं निहतकण्टकम् ॥३७॥
इत्येतत्तु समाख्यातं सप्तमन्वन्तरं तव ॥ यस्माद्विश्वमिदं सर्वं मम शक्त्या समन्वितम् ॥३८॥
तस्मात् सम्प्रोच्यते विष्णुर्विश्वस्यान्तः प्रवेशनात् ॥

---

## सावर्णेरुत्पत्तिः

कुमार उवाच ॥

अतीतान् देवदेवेश मनून् छ्रुत्वा मम प्रभो ॥३९॥
न तृप्तिरभवत् तस्माद्भावि मन्वन्तरं वद ॥ भाविमन्वन्तरे चापि ये चासन् मनवस्तथा ॥४०॥
तान् ममाचक्ष्व देवेश श्रोतुमिच्छा प्रवर्तते ॥

शङ्कर उवाच ॥

भाविमन्वन्तरे चापि ये चासन् मनवस्तव ॥४१॥
मनून् तान् सम्प्रवक्ष्यामि श्रुणुष्वैकमना गुह ॥ सूर्यस्य पत्नी संज्ञाभूत्तनया विश्वकर्मणः ॥४२॥
अनुर्यमो यमी चैव संज्ञायाः सूनवोऽभवन् ॥ ततः संज्ञा भर्तृतापमसहन्ती च सा तदा ॥४३॥
भर्तृशुश्रूषणे छायामात्मनः कमलेक्षण ॥ पातिव्रत्येन तपसा नियोज्यात्मस्वरूपिणीम् ॥४४॥

तपसे कृतसङ्कल्पा तपोवनमियात् तदा ॥ जज्ञेऽथार्काच्च तस्यां वै छायायामात्मजत्रयम् ॥४५॥
शनैश्चरं मनुं कन्यां तपतीं चाप्यजीजनत् ॥ सा स्वपुत्रेषु वै छाया यथास्नेहादवर्तत ॥४६॥
न तथा तेषु बालेषु पूर्वजेषु त्रिषु द्विज ॥ यमो रोषाच्च बाल्याच्च भाव्यत्वाच्च न चक्षमे ॥४७॥
ततः कोपसमाविष्टो यमः सूर्यसुतस्तदा ॥ पादेन ताडयामास सवर्णां मातरं किल ॥४८॥
छाया तदा ददौ शापं यमाय कुपिता च सा ॥ चरणः पततामेषस्तवेति भृशदुःखितः ॥४९॥
यमस्तदा पितुः सर्वं प्राञ्जलिः प्रत्यवेदयत् ॥ यमस्य वचनं श्रुत्वा किमेतदित्यचिन्तयत् ॥५०॥
ततो विवस्वान् ध्यानेन ज्ञात्वा तत्कारणं विभुः ॥ समाधिदृष्ट्या ददृशे तां वने तपसि स्थिताम्
॥५१॥
उत्थाय प्रययौ वेगात् कुरून् काश्यपनंन्दनः ॥ अश्वरूपेण सा यत्र तपस्यन्ती पतिव्रता ॥५२॥
अरण्ये विजने नित्यं भर्तृसौम्यत्वमिच्छती ॥ तदा रविर्वाजिरूपं धृत्वाऽगच्छत्तु तां प्रियाम् ॥५३॥
तस्यां देवावश्विनौ च सञ्जातौ भिषजां वरौ ॥ ततश्च बहुकालस्य विरहेण दिवाकरः ॥५४॥
अयुङ्क्त योनौ तुरगस्तुरगीं पिङ्गलद्युतिः ॥ रेमे ततः सुतो जज्ञे रैवतो वाजिनायकः ॥५५॥
तस्य सम्पूजनाल्लोके व्याधिताः स्युर्निरामयाः ॥ आनिन्ये च तदा संज्ञां यथास्थानं तदा रविः
॥५६॥
तेजसः शमनं चास्य विश्वकर्मा चकार वै ॥ भ्रमिमारोप्य सूर्यं च तस्य तेजः प्रतापनम् ॥५७॥
वैष्णवं चाष्टमं तेजः शासितं विश्वकर्मणा ॥ जाज्वल्यमानमपतद्भूमौ तत्सुरसत्तम ॥५८॥
त्वष्टैव तेजसा तेन विष्णोश्चक्रमकारयत् ॥ त्रिशूलं मम चैवैतद्ब्रह्मणो दंण्डमेव च ॥५९॥
ततो दृष्ट्वा स्वजननीं पुत्रा मुमुदिरे गुह ॥ तदा यमः स्वमात्रे च शापकारणमात्मनः ॥६०॥
आदितः कथयामास छायया विकृतोस्म्यहम् ॥ श्रुत्वा छायाकृतं सर्वं छायायै क्रोधमूर्च्छिता ॥६१॥
रहस्यकथनाच्चापि ददौ शापं पतिव्रता ॥ छायामात्रा भव त्वं वै सर्वेषां हि शरीरिणाम् ॥६२॥
तव पुत्रोऽपि पङ्गुः स्यात् द्वितीयो मम शापतः ॥ एको ज्यायान् तपस्तप्त्वा मनुत्वमधिगच्छतु
॥६३॥
तपनी तव कन्या तु मानुषं वृणुयात् पतिम् ॥ इत्युक्त्वा सा तदा संज्ञा भर्तृसेवापराऽभवत् ॥६४॥
सा छाया प्राणिनां देहे छायारूपा ह्यतिष्ठत ॥ यमस्तु धर्मतो लोकान् धर्मराजस्तु पालनात् ॥६५॥
स लेभे कर्मणा स्वेन लोकपालत्वमेव च ॥ मनुः प्रजापतिश्चासीत् ज्येष्ठो भ्राता यमस्य सः
॥६६॥

तयोर्यवीयसी कन्या नद्यभूद्यमुना शुभा ॥ छाया पुत्रो द्वितीयोऽभूच्छनैश्वर इति ग्रहः ॥६७॥
तयोर्यवीयसी या तु तपतीनामकन्यका ॥ साक्षं संवरणं नाम लेभे नरपतिं पतिम् ॥६८॥
यस्तु प्रथमजस्तस्यां सवर्णायां महामतिः ॥ समानवर्णः सूर्यस्य सावर्णिस्तेन कथ्यते ॥६९॥

---

## सावर्णिः

तस्यान्तरं मनोर्भावि सावर्णेरष्टमस्य तु ॥ तच्छृणुष्व महाभाग भविष्यत्कथयामि ते ॥७०॥
सुतपश्चामिताभाश्च सुमुखश्च तदा सुराः ॥ गणास्तु तेषां देवानामेकैकं विंशति स्मृतम् ॥७१॥
सप्तर्षीनपि वक्ष्यामि भविष्यान् मुनिसत्तम ॥ दीप्तिमान् गालवो रामः कृपो द्रौणिस्तथापरः ॥७२॥
व्यासश्चापि महाभागो ऋष्यशृङ्गश्च सत्तमः ॥ विरोचनसुतो दैत्यो बलिरिन्द्रो भविष्यति ॥७३॥
चित्रसेनो विचित्रश्च तथान्यो विरजश्च सः ॥ चिरजः शार्वरीयश्च समन्तो धृतिमांश्च सः ॥७४॥
स विष्णुराद्यो धृष्णुश्च भोजः सुमतिरेव च ॥ सावर्णस्य मनोः पुत्राःभविष्यन्ति नरेश्वराः ॥७५॥

---

## दक्षसावर्णिः

नवमो दक्षसावर्णि संज्ञको भविता मनुः ॥ परो मरीचिगर्भश्च सुधर्मश्च तथा त्रिधा ॥७६॥
भविष्यन्ति तदा पुत्र एकैका द्वादशा गणाः ॥ तेषामिन्द्रोऽद्भुतो नाम महावीर्यपराक्रमः ॥७७॥
सवनो द्युतिमांश्चैव वसुर्मेधातिथिस्तथा ॥ ज्योतिष्ठः सत्यको भव्यस्तत्रसप्तमहर्षयः ॥७८॥
धूमकेतुश्चित्रकेतुः पञ्चहस्तनिरामयौ ॥ पृथुश्रवस्तथा चान्ये दक्षसावर्णिकात्मजाः ॥७९॥

---

## ब्रह्मसावर्णिः

शामा ब्रह्मसावर्णिर्भविष्यति मनुर्विभो ॥ सुधामानोनिरुद्धाश्च शतसङ्ख्यास्तथासुराः ॥८०॥
यज्ञभागभुजो भव्या पूर्वदेवाधिकागणैः ॥ तेषामिन्द्रश्च भविता सुशान्ति हि शतक्रतुः ॥८१॥
सप्तर्षयो भविष्यन्ति ये तदा तान्निबोध मे ॥ हविष्मान्त्सत्कृतिः सत्य आपोमूर्तिरनन्तरम् ॥८२॥
नाभागो प्रतिमाक्षश्च सत्यकेतुमहर्षयः ॥ सुक्षेत्रश्चोत्तमौजाश्च भूरिषेणादयो दश ॥८३॥
ब्रह्मसावर्णितनया तदा रक्षन्ति चावनिम् ॥

---

## धर्मसावर्णिः

एकादशस्तु भविता धर्मसावर्णिको मनुः ॥८४॥

विहङ्गमाः कामगमा निर्वाणरुचकास्तथा ॥ गणाश्च देवमुख्याश्च तस्मिन् मन्वन्तरे मताः ॥८५॥
एकैकं त्रिंशकास्तेषां गणाश्चेन्द्रस्तथा वृषः ॥ हेमतेजोऽग्नितेजाश्च वपुष्मान् धृष्णिरारुणिः ॥८६॥
हविष्माननघश्चैव भव्याः सप्तर्षयस्तदा ॥ धर्मश्रवाः सुधर्मश्च देवानीकस्तथापरः ॥८७॥
भविष्यन्ति मनोः पुत्राः पृथिवीपतयस्तदा ॥

---

## रुद्रसावर्णिः

रुद्रपूर्वस्तु सावर्णिर्भविता द्वादशो मनुः ॥८८॥
ऋतुधामा च तत्रेन्द्रो र्भविता श्रुणु मे सुरान् ॥ हरिता रोहिताश्चैव तथा सुमनसो द्विज ॥८९॥
सुधर्माणः सुवादाश्च दशकाः पञ्च वै गणाः ॥ तपस्वी सुतपाश्चैव तपोमूर्तिस्तपोधनः ॥९०॥
तपोधृतिर्द्युतिः कीर्तिस्तत्र सप्ततपोधनाः ॥ देववानुपदेवश्च देवश्रेष्ठस्तथापरः ॥९१॥
मनोः पुत्रा महावीर्या भविष्यन्ति नरेश्वराः ॥ पञ्चमन्वन्तराण्येव मनुर्भूत्वा शिवाज्ञया ॥९२॥
सावर्णस्तपसा युक्तस्ततो मुक्तिमुपेष्यति ॥

---

## रौच्यः

त्रयोदशोपि भविता रौच्यो नाममनुर्द्विज ॥९३॥
रुचेः प्रजापतिः पुत्रो ज्ञानवानमितप्रभः ॥ सुत्रामाणः सुधर्माणः सुकर्माणस्तथापरे ॥९४॥
त्रयस्त्रिंशद्विभेदास्ते देवतानामिमे गणाः ॥ दिवस्पतिर्महावीर्यस्तेषामिन्द्रो भविष्यति ॥९५॥
निर्मोहस्तत्वदर्शी च निष्प्रकम्पो निरुत्सुकः ॥ धृतिमानव्ययश्चान्यः सप्तमः सुतपा मुनिः ॥९६॥
सप्तर्षयस्त्विमे पुत्र मनुपुत्रांश्च बोध मे । चित्रसेनविचित्राद्यो भविष्यन्ति महीक्षितः ॥९७॥

---

## भौतिकः

भौत्यश्चतुर्दशस्तत्र भविष्यति मनुस्तदा ॥ श्रितिरिन्द्रः सुरगणाः तत्र पंञ्च श्रुणुष्व तान् ॥९८॥
चाक्षुषाश्च पवित्राश्च कनिष्ठा भ्राजिरास्तथा ॥ वाचाध्रुवास्त्विमे देवा सप्तर्षीनपि मे श्रुणु ॥९९॥
अग्निबाहुः शुचिः शुक्रो मागधोग्नीध्र एव च ॥ युक्तव्रतो रजश्चैव सप्तैते मुनयः स्मृताः ॥१००॥
ऊरुर्गभस्तिर्ब्रध्नश्च तथैवान्ये महाबला: ॥ भौतिकस्य मनोः पुत्रा भविष्यन्ति नरेश्वराः ॥१०१॥

---

शङ्कर उवाच ॥

कथितं ते समासेन मनूनामन्तरं मया ॥ सृष्टेस्तु लक्षणं पुत्र समासात् कथितं तव ॥१०२॥
बहुशः कथितं पूर्वं मया चैव महामते ॥ इदानीमपि संक्षेपात् कथितं ते सुरोत्तम ॥१०३॥
उद्देशतस्तु सङ्ख्यातं इदानीं ज्ञानगोचरम् ॥ मत्प्रसादादतः शेषं ज्ञास्यसे भुवनत्रयम् ॥१०४॥
मद्भक्तिवासितमतिर्जातोसि मम पुत्रक ॥ किमिच्छस्यपरं श्रोतुं ब्रूहि तत् कथयामि ते ॥१०५॥
ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ किं पुनः स्वात्मपुत्राणां पितरः पितृवत्सलाः ॥१०६॥
तस्माद्विज्ञेयमखिलं ब्रूहि मत्तः सुरोत्तम ॥ कथयिष्यामि ते सर्वं किमिच्छसि महामते ॥१०७॥
मन्वन्तराणां कथनं द्विजेन्द्राः शृण्वन्ति ये वा मनुजाः पठन्ति ॥
ते धूतपापा शिवसन्निधानं सम्प्राप्य नित्यं सुखिनो वसन्ति ॥१०८॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे मन्वन्तरवर्णनंनाम सप्तमोऽध्यायः ॥७॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ८ ॥  NEXT>>  श्लोक संख्या–६६

## ॥ गोकर्णोत्पत्तिः, रुद्रयोनिः(गोकर्णतीर्थं) ॥

### ॥ गोकर्णक्षेत्रस्य उत्पत्तिः ॥

कुमार उवाच ॥

भगवन् देव देवेश सर्वज्ञ परमेश्वर ॥ भक्तानुकम्पिन् देवेश श्रुतं वै सृष्टिलक्षणम् ॥१॥
श्रोतव्यमपरं किञ्चित् तन्मे ब्रूहि जगद्गुरो ॥ गोकर्णं गच्छ पुत्र त्वं यदाह च भवान् मम ॥२॥
मम क्षेत्रमितीदं तच्छ्रुतं ते वदतोऽनघ ॥ सर्वक्षेत्राणि भवतः सर्वक्षेत्रमयो ह्यसि ॥३॥
त्वमेकः सर्वभूतेषु क्षेत्रक्षेत्रज्ञसंज्ञितः ॥ तत्कथं मम वै क्षेत्रमिति गोकर्णमात्थ मे ॥४॥
तन्मम ब्रूहि भगवन् गोकर्णस्य प्रधानताम् ॥

शङ्कर उवाच ॥

ममांशो ब्रह्मणस्तात ह्युत्पन्नो रुद्रसंज्ञकः॥५॥
ललाटात्तस्य देवस्य सृष्टिं चिन्तयतः पुरा ॥ दृष्ट्वोत्पन्नं रुद्रमथ इदमाह प्रजापतिः ॥६॥
सृष्टिं कुरु महाभाग समर्थस्त्वं हि मे मतः ॥ तच्छ्रुत्वा ब्रह्मणो वाक्यं न किञ्चित् प्रत्यभाषत
॥७॥

ततो ममज्ज सलिले रुद्रो ध्यानसमन्वितः ॥ सृष्टेर्विधानमन्विच्छन् निधिं वै धनिको यथा ॥८॥
अनश्वरा निरातङ्का भवेयुः सर्वदेहिनः ॥ सत्वैकगुणसम्पन्नाः सर्वे नाधममध्यमाः ॥९॥
तपसा साधयाम्येवं इति लोकहितेच्छया ॥ निश्चित्य तपसा तत्र तपश्चर्तुं प्रचक्रमे ॥१०॥
निमग्नः सलिले रुद्रस्तपसा द्योतितप्रभः ॥ सन्नियम्य मनो देवं संस्थाप्य हृदयाम्बुजे ॥११॥
परं ज्योतिश्चिदात्मानमद्वयं तमसः परम् ॥ जगतः परमं ध्यायन् समाधावध्यतिष्ठत ॥१२॥
एवं तपस्यतस्तस्य कोटिसूर्यसमद्युतेः ॥ युगत्रयावधिः कालः सुमहानत्ययात् किल ॥१३॥
ततो विलम्बितं दृष्ट्वा रुद्रसर्गं प्रजापतिः ॥ तत्र कारणमन्विच्छन् चिन्तयामास चाकुलः ॥१४॥
अनश्वराणि भूतानि करिष्यामीति यत्नतः ॥ साम्प्रतं स तपस्यास्ते परमेण समाधिना ॥१५॥
एवं तत्कारणं ब्रह्मा विदित्वा च मनोगतम् ॥ अग्रे साहसमाश्रित्य रुद्रस्तपसि वर्तते ॥१६॥
देवासुरमनुष्यादौ विशेषो न भवेद्यदि ॥ भवेच्च सर्वसामान्यं नीचोत्कृष्टाविभागि च ॥१७॥
शुद्धैकसत्वसृष्टिश्च त्रिगुणालम्बनं विना ॥ सजातीयविजातीयकल्पनाज्ञानजस्तथा ॥१८॥
सङ्कराख्यो महादोषः सम्भविष्यति वै चिरम् ॥ तस्मादेतन्न कर्तव्यमिति निश्चितमानसः ॥१९॥
ततो रजस्तमोभ्यां वै चोदितः पद्मसम्भवः ॥ अन्यथा भगवान् पुत्र मम शक्त्या प्रचोदितः ॥२०॥
चकार सृष्टिं त्रिगुणां यथापूर्वमकल्पयत् ॥ ततो रुद्रं तपस्यन्तं समाधिरतमात्मनि ॥२१॥
तं तदा तु समाभाष्य वागुवाचाशरीरिणी ॥ उत्तिष्ठोत्तिष्ठ देवेश निर्वृत्तं चिन्तितं तव ॥२२॥
अन्यथा ब्रह्मणा सर्वं सृष्टं स्थावरजङ्गमम् ॥ चतुर्विधानि भूतानि प्राक्सृष्टानि कुमारक ॥२३॥
तानि सर्वाणि सृष्टानि देवाद्याश्चैव पूर्ववत् ॥ तस्माच्छ्रमेण किं देव किमर्थं तव भो तपः ॥२४॥
तच्छ्रुत्वा भगवान्रुद्रस्त्वयेहागम्यतामिति ॥ ततस्तं देशमागत्य नारी दिव्यस्वरूपिणी ॥२५॥
सात्विकी प्रकृतिः सा वै स्थिता रुद्रस्य सन्निधौ ॥ तामाह भगवान् शम्भुः क्रोधपर्याकुलेक्षणः॥२६॥
काऽसि भद्रे कुतश्चासि कस्यासि तनया वद ॥ तच्छ्रुत्वा वचनं शम्भोर्माया दिव्यस्वरूपिणी ॥२७॥
सा तमाह महाभागा शङ्करं कमलेक्षणा ॥ ज्ञानेनावेहि भगवन् मद्वृत्तान्तं सुरोत्तम ॥२८॥
श्रुत्वा तु प्रकृतेर्वाक्यं चिरं दध्यौ स्वमात्मनि ॥ ततोवगम्य तां देवः सात्विकीं प्रकृतिं स्वकाम् ॥२९॥ रजस्तमोभ्यां सृष्टं वै दृष्ट्वा क्रोधसमन्वितः ॥ उत्प्लुत्योर्ध्वं तया सार्धं प्रकृत्या पुरुषोत्तमः ॥३०॥
ततोऽतिरौद्रः पुरुषो द्वादशादित्यसन्निभः ॥ आगत्य दृष्ट्वा तां पुत्र मेदिनीं चक्रसंस्थिताम् ॥३१॥
क्रुद्धोऽहमब्रवं तात देहि पन्थानमित्युत ॥ ततो मामाह सा देवी धरा विश्वम्भरा सती ॥३२॥

कृताञ्जलिपुटा भूत्वा वेपन्ती कदली यथा ॥ विह्वला भूतभरणा दृष्ट्वा मां कुपितं तदा ॥३३॥

धरण्युवाच ॥

भव त्वां शरणं देव भक्तानामभयङ्कर ॥ रौद्रमूर्ते सुरश्रेष्ठ नित्योऽनित्यप्रवर्तक ॥३४॥

त्रैलोक्यकान्त कामारे धर्मप्रिय सुरेश्वर ॥ विश्वमूर्ते विश्वकर्मन् विष्णुमूर्ते सुरेश्वर ॥३५॥

ब्रह्ममूर्ते जगन्नाथ विश्वमूर्ते सदाशिव ॥ ज्ञानाऽज्ञानविभागाय ज्ञानेशाय महात्मने ॥३६॥

सूर्येन्दुवह्निनयन मनसैव प्रसाधक ॥ सर्वज्ञ सर्वभूतेश सदानंन्द निरामय ॥३७॥

एकमूर्ते द्विमूर्ते च त्रिमूर्ते शतमूर्तिक ॥ यज्ञमूर्ते यज्ञभव यज्ञेशाय नमो नमः ॥३८॥

कर्त्रे भर्त्रे च संहर्त्रे हरिनेत्राय वेधसे ॥ परमात्मन् परन्धाम पवित्रं परमं भवान् ॥३९॥

त्वमादिः सर्वभूतानामनादिस्त्वं सुरोत्तम ॥ त्वं यज्ञस्त्वं वषट्कारस्त्वं हविस्त्वं हुताशनः ॥४०॥

त्वमोंकारः सुरश्रेष्ठ त्वं ब्रह्मा विष्णुरेव हि ॥ त्वं रुद्रस्त्वं रविर्वायुर्यमस्त्वं वरुणस्तथा ॥४१॥

आदित्या वसवो रुद्रा मरुतः पितरस्तथा ॥ आकाशस्त्वं तथा पृथ्वी विश्वेदेवास्तथाश्विनौ ॥४२॥

नागा यक्षाः पिशाचाश्च मनुष्याः पशवस्तथा ॥ पक्षिणो राक्षसाश्चैव गन्धर्वाप्सरसस्तथा ॥४३॥

समुद्रा गिरयो नद्यो नदाः स्थावरजङ्गमाः ॥ ददर्श भूतं देवेशो दृश्याऽदृश्यं हि यद्भवेत् ॥४४॥

शिरस्तथा ते गगनं सुरेश त्वष्टौ दिशश्चैव तु बाहवस्ते ॥

त्वदीयमाहुर्नयनत्रयं च सूर्यानलौ सोमममिति क्रमेण ॥४५॥

पादौ तवाहं शिव दिव्यमूर्ते गुल्फ़ौ तवेमे गिरयः समस्ताः ॥

रोमाणि ते भूरुह देवदेव सप्ताब्धयो ते जठरं वदन्ति ॥४६॥

इति स्तुतोऽथ भगवान् भूम्या भूतपतिस्तथा ॥ प्रीत्येदमाह धरणिं किमिच्छसि शुभे वद ॥४७॥

धरण्युवाच ॥

स्त्री चाहं विह्वला देव स्वभावाद्भयपीडिता ॥ तवोर्ध्वगमनाद्भीता मां भेत्तुं नार्हसि प्रभो ॥४८॥

न मे रुजं् देवदेव कर्तुमर्हसि शङ्कर ॥ कर्णच्छिद्रेण मे देव ह्रस्वो भूत्वोर्ध्वमुत्पत ॥४९॥

रुद्र उवाच ॥

तथा भद्रे करिष्यामि यथा नावेषि वेदनाम् ॥ इत्युक्त्वा धरणीं देवो दयालुः परमेश्वरः ॥५०॥

उत्लुत्योर्ध्वं तया सार्धं प्रकृत्या पुरुषोत्तमः ॥ अङ्गुष्ठमात्रः पुरुषो द्वादशादित्यसन्निभः ॥५१॥

ऊर्ध्वमुत्प्लुत्य वेगेन कर्णच्छिद्रेण निःसृतः ॥ निर्गत्य भूमेर्भगवान् धरणीमाह शङ्करः ॥५२॥

रुद्र उवाच ॥

मत्संयोगादिह शुभे भविष्यति सुतस्तव ॥ ग्रहाणामधिपश्चण्डः सोऽङ्गारक इति श्रुतः ॥५३॥
भविष्यतीदं भद्रं ते क्षेत्रं त्रैलोक्यविश्रुतम् ॥ गोशब्दः प्रथमं देवि त्वयि सम्परिवर्तते ॥५४॥
कर्णश्चायं तव शुभे देवि शब्दग्रहो यतः ॥ तस्माद्गोकर्णमिति च ख्यातिं लोके गमिष्यति ॥५५॥
रुद्रयोनीति नाम्ना च त्रैलोक्ये परिगीयते ॥ पातलादूर्ध्वगमने मम योनिरभूद्यतः ॥५६॥
वरुणावर्तनाम्ना च त्रैलोक्ये विश्रुतं भवेत् ॥ एकार्णवे जगत्यस्मिन्नावर्तो वरुणस्य यत् ॥५७॥
आपातालात् सत्यलोकम् आवर्तमिव सागरे ॥ विनाशो नैव विलयो वरुणावर्तकं ततः ॥ ५८॥
ये स्मरिष्यन्ति गोकर्णं प्रातरुत्थाय नित्यशः ॥ तेषां रात्रिकृतं पापं नश्यते नात्र संशयः ॥५९॥
तथा दिवाकृतं पापमपराह्णे विनश्यति ॥ ये स्मरिष्यन्ति गोकर्णं वर्णत्रयविभूषितम् ॥६०॥
तेषां वाचा कृतं पापं मत्प्रसादाद्विनश्यति ॥ ये द्रक्ष्यन्ति मम क्षेत्रं गोकर्णं सुरपूजितम् ॥६१॥
जन्मप्रभृति तेषां वै कृतं पापं प्रणश्यति ॥

---

### रुद्रयोनिः(आदिगोकर्णम्)

स्नानं कुर्वन्ति ये त्वत्र रुद्रयोन्यां द्विजोत्तमाः ॥६२॥
तेषां त्रिजन्मचरितं स्वल्पं वा यदि वा बहु ॥ विनश्यत्यचले देवि मत्प्रसादान्न संशयः ॥६३॥
अश्वमेधक्रतुकृता पुण्यं सम्पाद्यते च यत् ॥ विधिना च मयोक्तेन स्नानमत्र प्रशस्यते ॥६४॥
इत्युक्त्वा धरणीं देवो ब्रह्मणा तु कृतां शुभाम् ॥ दृष्टुं सृष्टिं ययौ देवो भगवान् भूतभावनः ॥६५॥
ततोपि धरणी देवी निरुजा चाभवत्तदा ॥
आख्यानमेतत् पठति श्रुणोति यो लिखेच्च यो भक्तियुतो द्विजेन्द्रः ॥
स सर्वभोगान् भुवि चानुभूय चान्ते पुरं व्रजति वै परमेश्वरस्य ॥६६॥ (आदिगोकर्णेश्वरः)
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे गोकर्णोत्पत्ति वर्णनं नाम अष्टमोऽध्यायः॥८॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ९ ॥ NEXT>> श्लोक संख्या–८२

॥ रुद्रभूमिः–सिद्धयः–सिद्धाः ॥

### रुद्रभूमिः

शङ्कर उवाच ॥

भूमेर्दत्वा वरं पुत्र दृष्ट्वा तु भुवनत्रयम् ॥ तदा मे मन्युरभवत् कल्पान्ते च यथा पुरा ॥१॥

तया प्रकृत्या सङ्गम्य गोकर्णाच्छिखिवाहन ॥ किञ्चिदीशान्यदिग्भागे शरपाते शुभे स्थले ॥२॥
दग्धुकामः प्रजाः सर्वाः स्थितवान् क्रोधविह्वलः ॥ संहरामीति मनसा त्रैलोक्यं सचराचरम् ॥३॥
ततो नानाविधाकारा भूताः सृष्टा मया सुत ॥ उग्रायुधधरा घोराः प्रचण्डा ह्युग्रविक्रमाः ॥४॥
सप्तकोटिमहावीराः पार्षदाः पुत्र वै क्षणात् ॥ आत्मनः सदृशा वीर्ये नानाभूषाविभूषिताः ॥५॥
त्रिशूलकार्मुकधराः खड्गशक्तिधराः पराः ॥ जातमात्रेण ते सर्वे प्रबद्धकरसम्पुटाः ॥६॥
मामूचुः प्रणताः सर्वे वयं सृष्टास्त्वया कुतः ॥ अनुज्ञां देहि चास्माकं करिष्यामो वचस्तव ॥७॥
इत्युक्ते भूतनाथैस्तु रुद्रस्तान् प्राह कोपवान् ॥ इमान् ब्रह्मकृतान् लोकान् दग्ध्वा स्थावरजङ्गमान् ॥८॥
यूयमायात मां भूयो व्यादिशं प्रमथानिति ॥ ततो हरिस्तद्विदित्वा लोको नश्येदिति त्वरः ॥९॥
क्षिप्रमासाद्य गोकर्णं मामुवाच हरिस्तदा ॥ अपराधं क्षमस्वाद्य ब्रह्मणा यत्कृतं हर ॥१०॥
इदानीमुपसंहारो नोचितः शङ्कर त्वया ॥ अन्ते संहारकर्ता च त्वमेव परमेश्वर ॥११॥
इति विष्णूदितं श्रुत्वा शान्तकोपः कृपान्वितः ॥ तं प्राह शङ्करो विष्णुं यथापूर्वं कृतं जगत् ॥१२॥
लोकास्तथैव तिष्ठन्तु तव वाक्याज्जनार्दन ॥ इत्युदीर्य हरिं पुत्र भूतेशानब्रवीत्तदा ॥१३॥
यस्मात् संहारकरणे यूयं सृष्टा मया ततः ॥ प्रमथा इति लोकेस्मिन् ख्याता भवत पुत्रकाः ॥१४॥
मदाज्ञाकारिणो यूयं सकाशे मम तिष्ठत ॥ इत्यादिश्य गणान् विष्णुं अब्रुवं प्रचरन्तदा ॥१५॥
अहं लोकान् दग्धुकामः स्थितवान् यत्र तत्ततः ॥ रुद्रभूमिरिति ख्याता दहनान्मुक्तिदा नृणाम् ॥१६॥

प्रकृत्या पार्षदैः सार्धमत्र विष्णो वसाम्यहम् ॥ इत्युक्ते शम्भुना विष्णुस्तथास्त्विति ययौ दिवम् ॥१७॥

सूत उवाच ॥

गोकर्णे सर्वदा वासं मरणं मुक्तिमण्टपे ॥ रुद्रभूम्यां तु दहनं कांक्षन्ते विबुधा अपि ॥१८॥

---

## मृगरूपेण सर्वेषां सत्वहरणम्

ततो रुद्रश्चिन्तयित्वा भविष्यत्कार्यगौरवम् ॥ स्वप्रतिज्ञा वृथा माभूदिति व्याकुलमानसः ॥१९॥
ब्रह्मादिस्थावरान्तेषु अणुमात्रेषु वा सुत ॥ जीवराशिषु यत्सत्वं वर्तते तत्प्रगृह्य च ॥२०॥
ततो मया स्वर्णदेहो निर्मितो मृग उत्तमः ॥ ऋते नारायणाद्देवात् अज्ञातं केनचित् क्वचित् ॥२१॥

तमहं मृगमादाय पार्षदैः सह पुत्रक ॥ कैलासमगमं पश्चात् क्रीडन्नास यथासुखम् ॥२२॥ श्

---

## सिद्धयः

एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ।

कुमार उवाच ॥

श्रुतं तव मुखाम्भोजात् क्षेत्रसञ्जन्म चादितः ॥२३॥

न तृप्तिमधिगच्छामि पुनर्वक्तुं त्वमर्हसि ॥ तस्मिन् क्षेत्रेऽमरगुरो सिद्धान् मे शंस शङ्कर ॥२४॥

सिद्धेर्लक्षणमाख्याहि सिद्धानां चरितं च मे ॥

## सात्विकीसिद्धिः

शङ्कर उवाच ॥

शृणु पुत्र प्रवक्ष्यामि मत्क्षेत्रे मामनुस्मरन् ॥२५॥

इन्द्रियाणीन्द्रियार्थेभ्यो निगृह्यात्मनि बुद्धिमान् ॥ कामक्रोधविनिर्मुक्तो निःसङ्गो मुक्तसंशयः ॥२६॥

निर्द्वन्द्वो निरहङ्कारो मद्याजी मत्परायणः ॥ मामेवैष्यति सिद्धः स पुनरावृत्तिवर्जितः ॥२७॥

मां गत्वा न निवर्तेत यत्र गत्वा न शोचति ॥ आत्मन्येव जगत्सर्वं ज्ञानेनावेहि पुत्रक ॥२८॥

एक एवाद्वितीयोऽहमिति यो मन्यते यदा ॥ तदा स सिद्धः पुरुषः सिद्धिं तां वेद पुत्रक ॥२९॥

तत्र प्राप्यं सुरश्रेष्ठ इन्द्रियाकर्षिभिर्नरैः ॥ जन्मायुतैरप्यशक्यं इन्द्रियाकर्षिभिर्नृभिः ॥३०॥

तस्मान्निःसङ्गचित्तेन निर्द्वन्द्वो हि निरामयः ॥ शुद्धं बुद्धं शिवं शान्तं निर्वाणमधिगम्यते ॥३१॥

तां सिद्धिमाहुर्मुनयः सात्विकीं सद्भिरीप्सितम् ॥

---

## राजसीसिद्धिः

राजसीं चापरां सिद्धिं श्रुणु वक्ष्यामि पुत्रक ॥३२॥

स्वर्गापवर्गमन्विच्छन् देवत्वं वा यथेप्सितम् ॥ अणिमादिमहासिद्धिं गन्धर्वत्वमथापि वा ॥३३॥

यक्षसिद्धिं तथैवान्ये केचित् स्वर्लोकवासनाम् ॥ यान्यानिच्छति वै कामान् तान्तानाप्नोति नान्यथा ॥३४॥

दानैर्होमैस्तथा जाप्यैः सुक्षेत्रमरणैरपि ॥ इष्टापूर्तैश्च विविधैः पुण्यतीर्थावगाहनैः ॥३५॥

तां राजसीं सिद्धिमाहुः पुनरावृत्तिलक्षणाम् ॥ कालेन पुनरागत्य उच्चं प्राप्नोत्यनन्तकम् ॥३६॥

---

## तामसीसिद्धिः

तामसीं च शृणुष्वेमामज्ञानकृतलक्षणाम् ॥ इदं शरीरमेवास्ति न चान्यदिति चिन्तयन् ॥३७॥
न ददात्युदिते काले न जुहोति यथोचितम् ॥ दातव्यमिति यो दद्यान्नाचारेण स मानवः ॥३८॥
श्रुतिस्मृत्युदितं त्यक्त्वा गुरुशुश्रूषणं तथा ॥ अष्टादशपुराणोक्तधर्मं संन्त्यज्य निन्दया ॥३९॥
करोत्यधर्मं धर्मज्ञः स्वेच्छया कूटयुक्तिभिः ॥ अशास्त्रेणाप्यनाचारो ददाति च जुहोति च ॥४०॥
एतेन तामसीं सिद्धिं प्राप्नोत्यज्ञानलक्षणाम् ॥ पश्चादयस्ते विख्याता मृगपक्षिसरीसृपाः ॥४१॥
स्थावराश्च भविष्यन्ति तामसा मूढचेतनाः ॥ न किञ्चिदवगच्छन्ति मग्नास्तमसि दारुणे ॥४२॥
चन्द्रवत् परिवतन्ते तिर्यग्योनिष्वनेकशः ॥ भवाम्भोधौ चिरं पुत्र वर्तन्ते शास्त्रवर्जिताः ॥४३॥

---

## सिद्धेः साधनम्

आचार्यं प्रथमं सिद्धेः साधनं कवयो विदुः ॥ तिष्ठाम्याचार्यरूपेण शिष्याणां हितकाम्यया ॥४४॥
आचार्यं मां विजानीहि विष्णुराचार्य उच्यते ॥ आचार्यो हि स्वयं ब्रह्मा पुराणार्थविचक्षणः ॥४५॥
सिद्धेर्द्वाराणि चत्वारि तानि मे शृणु पुत्रक ॥ पुराणं मानवो धर्मः क्षेत्रमाचार्य एव च ॥४६॥
क्षेत्राणामुत्तमं पुण्यं गोकर्णमभिधीयते ॥ तस्मात्त्वं गच्छ गोकर्णं क्षिप्रं सिद्धिकरं नृणाम् ॥४७॥
रहस्यं सर्वदेवानां ऋषीणामपि सत्तम ॥ सिद्धिमिच्छन् परां तात आत्मन्येव व्यवस्थितः ॥४८॥
मयोक्तेन विधानेन तिष्ठन् सिद्धिमवाप्स्यसि ॥ गोकर्णस्य प्रभावश्च प्रोक्तः सङ्क्षेपतस्तव ॥४९॥
सिद्धित्रयं च कथितं किमन्यच्छ्रोतुमिच्छसि ॥

---

## सिद्धाः

कुमार उवाच ॥

तस्मिन् क्षेत्रवरे तात सिद्धान् मे वक्तुमर्हसि ॥५०॥
तव क्षेत्रे महाभाग गोकर्णे वृषभध्वज ॥

शङ्कर उवाच ॥

शृणु पुत्र मम क्षेत्रे मामिष्ट्वाऽसुरसूदन ॥५१॥

---

## स्वायम्भुवमन्वन्तरे सिद्धाः

स्वायम्भुवान्तरे पुत्र चतुर्विंशतिसत्तमे ॥ परां सिद्धिं गतास्तान् वै शृणुष्व गदतो मम ॥५२॥
सनत्कुमारः सनकः सनन्दः समरः समः ॥ नारदो रोमसश्चेति सप्त वै मुनिपङ्गवाः ॥५३॥
दूर्वासा वै मुनिश्रेष्ठो मार्कण्डेयो महामुनिः ॥ लज्जा कृतिः स्मृतिर्मेधा सावित्री च सरस्वती ॥५४॥

धर्मश्च भगवांश्चैव नव वै सिद्धिमागताः ॥ वेदानामुत्तमं साम क्रोधः कामश्च सुव्रत ॥५५॥
असूया मत्सरी चण्डी द्वेषश्चेर्ष्या तथाष्टमी ॥ एते चतुर्विंशतिका मुक्तिं प्राप्तास्तु षण्मुख ॥५६॥
मन्वन्तरेषु सर्वेषु शृणु मुक्तिमुपागतान् ॥

---

## स्वारोचिषमन्वन्तरे सिद्धाः

स्वारोचिषान्तरे पुत्र गता मुक्तिं तु विंशतिः ॥५७॥
मम क्षेत्रे महापुण्ये गोकर्णे पुरुषोत्तम ॥ वसुर्वरेण्यो वरदो नरो नारायणस्तथा ॥५८॥
ध्रुवो नलः कुरुश्चैव कालः कर्मकरः क्रिया ॥ रम्भा तिलोत्तमा जन्या सुरभिर्मेनका तथा ॥५९॥
रोमपादः पृथुग्रीवः कण्डुः सत्यतपास्तथा ॥ एते विंशतिकाः पुत्र सिद्धाः स्वारोचिषांन्तरे ॥६०॥

---

## औत्तममन्वन्तरे सिद्धाः

औत्तमे चापि मत्क्षेत्रे सिद्धानपि निबोध मे ॥ क्षमा सत्यं दमः कीर्तिरहिंसानन्द एव च ॥६१॥
लक्ष्मीर्लक्ष्मीधरश्चैव बुद्धिः सर्जन एव च ॥ पूर्वा च पश्चिमा चैव दक्षिणा चोत्तरा दिशः ॥६२॥
अधश्चोर्ध्वं च तिर्यक्च औत्तमे मुक्तिमागताः ॥

---

## तापसमन्वन्तरे सिद्धाः

तापसे चान्तरे पुत्र शृणु मुक्तिमुपागतान् ॥६३॥
देवानन्दः सुहोत्रश्च कहोळः कनकः कषः ॥ हिरण्यरोमा दीर्धतमाः सुहोत्रश्चापरायणिः ॥६४॥
गौरी गणाधिपश्चण्डो मेरुः कनकभूषणः ॥ सुभद्रा च सुशर्मा च सार्वभौमस्तथापरः ॥६५॥
देवलो वासुकी दक्षो ह्यनन्तोऽरुण एव च ॥ द्वाविंशति महाभागा गोकर्णे मुक्तिमागताः ॥६६॥

---

## रैवतमन्वन्तरे सिद्धाः

रैवते चान्तरे पुत्र शृणु निर्वाणमागतान् ॥ वीरधर्मा महानन्दः शम्भुः शान्तभवस्तथा ॥६७॥
रम्यो रमरणकश्चैव पर्णादस्तृणकस्तथा ॥ अंशुमान्नालजङ्घश्च अकूबारोऽङ्ग एव च ॥६८॥
रोचमानः शिवः शान्तः समुद्रो विघसस्तथा ॥ विश्वाजिरवराजिश्च कलिर्द्वापर एव च ॥६९॥
उलूकलो हिडिम्बा च रोदसी नर्मदा तथा ॥ सिद्धिं पञ्चदश ह्येते मत्क्षेत्रे रैवते गताः ॥७०॥

---

## चाक्षुषमन्वन्तरे सिद्धाः

चाक्षुषे चान्तरे वत्स निबोधानन्दमागतान् ॥ सुरुचिः सुमतिर्जह्नुर्बुधः शुक्रः प्रतर्दनः ॥७१॥

राहुः क्राथक्रमः क्रान्तः सन्ध्या सिन्धुः प्रजापतिः ।। अङ्गिरा मधुपर्कश्च सन्ध्या रात्रिर्विमोहनः ।।७२।।

एते पुत्रा मम क्षेत्रे गोकर्णे मुक्तिमागताः ।।

---

## वैवस्वतमन्वन्तरे सिद्धाः

वैवस्वतान्तरे पुत्र शृणु निर्वाणमागतान् ।।७३।।

इक्ष्वाकुरम्बरीषश्च नाभागो नहुषस्तथा ।। विश्वामित्रः सुहोत्रश्च ययातिश्च महायशाः ।।७४।।

जनकः कम्बलाश्वश्च गोविन्दो गोपतिस्तथा ।। प्रह्लादो विनता चापि बाणश्चापि बलेः सुतः ।।७५।।

सुरूपी हव्यवाहश्च वरुणो दारुणस्तथा ।। वाल्मीकिरथहर्यश्वो गरुडो विनतासुतः ।।७६।।

नन्दी च विज्वलिश्चैव रघुरामः समस्तथा ।। सुधर्माणः पृथुश्रेष्ठो व्यासः सत्यवतीसुतः ।।७७।।

यमः कालः कालरात्रिर्मृत्युर्नीलस्तथैव च ।। निमिषोऽनिमिषश्चैव मानहा मधुरः शमः ।।७८।।

सावर्णिर्गौतमश्चैव गङ्गा च सरितां वरा ।। चन्द्रभागा नदी चैव सिन्धुर्गौरी मरीचिजः ।।७९।।

जमदग्निसुतो रामः साध्या रुद्रा मरुद्गणाः ।। विश्वे च मरुतश्चैव आदित्याश्च सुरोत्तमाः ।।८०।।

मन्वन्तरेऽस्मिन्नभवन् किमन्यच्छ्रोतुमिच्छसि ।।८१।।

सिद्धित्रयाणां कथनं द्विजेन्द्राः शृण्वन्ति नित्यं भुवि ये पठन्ति ।।

ते धूतपापाः शिवलोकमेत्य शिवेन सार्धं विहरन्ति चान्ते ।।८२।।

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे सिद्धिसिद्धवर्णनं नाम नवमोऽध्यायः।।९।।

 अध्यायाः अकारादि <<BACK  || अध्यायः १० ||  NEXT>>  श्लोक संख्या–६५

|| भूलोके जम्बुद्वीपवर्णनम् ||

## जम्बुद्वीपवर्णनम्

कुमार उवाच ।।

प्रियव्रतस्य मे शंस पुत्रपौत्रादिसन्ततिम् ।। श्रोतुमिच्छामि च विभो सकलं मण्डलं भुवः ।।१।।

कियन्तः सागरा द्वीपास्तथा वर्षाणि पर्वताः ।। वनानि सरितश्चैव यथा सृष्टा स्वयम्भुना ।।२।।

आदित्यादिग्रहाश्चैव पातलाश्च ममानघ ॥ यत्प्रमाणमिदं सर्वं यथावद्वक्तुमर्हसि ॥३॥
धिष्ण्यानि शंस मे तात देवादीनां महामते ॥

## सप्तद्वीपाः

शङ्कर उवाच ॥

शृणुष्वैकमनाः पुत्र सङ्क्षेपाद्वदतो मम ॥४॥
अशक्यं विस्तराद्वक्तुं वर्षाणान्तु सहस्रकैः ॥ जम्बुः प्लक्षः शाल्मलश्च कुशः क्रौञ्चः सुरोत्तम ॥५॥
शाकद्वीपः पुष्करश्च सप्तद्वीपा इमे स्मृताः ॥ समुद्रैः सप्तभिश्चैते आवृताः सुरसत्तम ॥६॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलात्मकैः ॥

---

## महामेरुः

तेषां मध्ये स्थितो जम्बुस्तन्मध्ये मेरुरास्थितः ॥७॥
स लक्षयोजनमितश्चतुरश्रो महागिरिः ॥ चतुरशीतिसाहस्रं क्षितेरुपरि संस्थितः ॥८॥
षोडशासौ सहस्राणि भूमेरन्तर्व्यवस्थितः ॥ वृतः षोडश मध्ये तु द्वात्रिंशन्मूर्ध्निविस्तृतः ॥९॥
भूपद्मकर्णिकाकारो भूमौ नौकूपकाकृतिः ॥

---

## मेरुवत् प्रधानपर्वताः

हिमवान् हेमकूटश्च निषधश्चास्य दक्षिणे ॥१०॥
नीलश्वेतस्त्रिशृङ्गस्तु उत्तरे वर्षपर्वताः ॥ माल्यवान् पर्वतः पूर्वे केतुमालश्च पश्चिमे ॥११॥

---

## मेरुं परितः नववर्षाः

भारतं प्रथमं वर्षं ततः किंपुरुषं परम् ॥ हरिवर्षं तथैवान्यत् मेरोर्दक्षिणतो नृप ॥१२॥
रम्यो हिरण्मयश्चैव उत्तराः कुरवस्तथा ॥ मेरोरुत्तरतः सन्ति भद्राश्वः पूर्वतः स्थितः ॥१३॥
केतुमालो प्रतीच्यान्तु मेरुमावृत्य संस्थितः ॥ मितान्येतानि राजेन्द्र नवसाहस्रयोजनैः ॥१४॥
इळावृत्तश्च भद्रन्ते तेषां मध्ये व्यवस्थितः ॥ तन्मध्ये मेरुरचलः स्थितः काञ्चनपर्वतः ॥१५॥

---

## मेरुं परितः चत्वारः पर्वताः

मेरोश्चतुर्दिशं राजन्नवसाहस्रविस्तृतः ॥ इळावृत्तस्तथा सन्ति चत्वारश्चात्र पर्वताः ॥१६॥
विष्कम्भशैलास्ते मेरोर्योजनाऽयुतमुच्छ्रिताः ॥ वनैः सरोभिश्च समं दिक्ष्वेते केसराचलाः ॥१७॥

पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः ॥ विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्थितः ॥१८॥

## जंबुतरुजंबुनद्योर्वर्णनं

गन्धमादनशैलाग्रे दिव्यो जम्बुतरुर्महान् ॥ अन्येषु पर्वताग्रेषु पिप्पलो वट एव च ॥१९॥
कदम्बपादपश्चैव फलपुष्पैर्विराजितः ॥ एकादशसहस्राणि योजनानां समुच्छ्रितः ॥२०॥
जम्बुद्वीपे तु यो जम्बु नामहेतुरभूत् सुत ॥ महागजप्रमाणानि तरोस्तस्य फलानि वै ॥२१॥
पतन्ति भूभृतः पृष्ठे शीर्यमाणानि सर्वतः ॥ जम्बूफलरसेनैव जायते जम्बुसंज्ञिता ॥२२॥
नदी दिव्यमयी पुत्र पीयते तत्र वासिभिः ॥ तद्रसस्पर्शमात्रेण मृत्स्ना काञ्चनतां व्रजेत् ॥२३॥
तद्रसः पीतमात्रेण मनुष्याणां सुरोत्तम ॥ न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षयः ॥२४॥
वपुषा यौवनेनैव तत्र सन्ति जनाः सुत ॥ मेरुं प्रदक्षिणीकृत्य सागरं याति सा नदी ॥२५॥

## इलावृत्ते चत्वारि वनानि

यौ केतुमालभद्राश्वौ तयोर्मध्ये इळावृतः ॥ वनं चैत्ररथं पूर्वं दक्षिणे नन्दनं स्मृतम् ॥२६॥
विभ्राजकं पश्चिमतः सावित्रं चोत्तरे स्मृतम् ॥

## मेरुं परितः चत्वारि सरांसि

अरुणोदं सरो दिव्यं मन्दरे पर्वतोत्तमे ॥२७॥
मानसं दक्षिणे चास्ति गन्धमादनपर्वते ॥ शीतोदं विपुले प्रोक्तं मेरोः पश्चिमतः स्थितम् ॥२८॥
सुपार्श्वे तु महाभद्रं सरो विपुलपङ्कजम् ॥ सरांस्येतानि चत्वारि देवभोग्यानि सत्तम ॥२९॥

## मेरुं परितः दिक्पालानां पुरः सभे च

मेरोश्चतुर्दिक्षु सुत बहवः केसराचलाः ॥ वर्तन्ते गिरयो दिव्या उछ्रयाः शृणु पुत्रक ॥३०॥
तेषां सप्ततिसाहस्रयोजनानां प्रमाणकम् ॥ इन्द्रादिलोकपालानामस्ति तत्र पुरः सुत ॥३१॥
दिक्ष्वष्टसु सुरश्रेष्ठ पुरीन्द्रस्यामरावती ॥ अग्नेस्तेजोवती नाम याम्या संयमिनी स्मृता ॥३२॥
कृष्णा नाम पुरी रक्षोऽधिपतेः सम्प्रकीर्तिता ॥ पुरी भोगवती नाम वरुणस्य महात्मनः ॥३३॥
पुरी गन्धवती नाम अनिलस्य महामतेः ॥ कुबेरस्यालकाख्या तु कैलासाख्यमुमापतेः ॥३४॥
तस्याः पृष्ठे सभा दिव्या विरिञ्चेस्तु महात्मनः ॥ मनोन्मना नाम नृप मनोज्ञा सुरपूजिता ॥३५॥
अगम्या सर्वभूतानां ब्रह्माधिवसतिः सुत ॥ तस्याः पूर्वोत्तरा राजन्सभा दिव्या पिनाकिनः॥३६॥

नाम्ना ज्योतिष्मती राजन् रुद्रलोकः स उच्यते ॥

## गङ्गानदीवर्णनम्

तस्यां सभायां पतिता गङ्गा त्रिपथगा पुरा ॥३७॥

कमण्डलौ विरिञ्चेस्तु जाता पूर्वमनिन्दिता ॥ पश्चात्पादाम्बुजतलं प्राप्ता विष्णोर्महात्मनः ॥३८॥

पश्चाज्जगाम रुद्रस्य जटां मालेव मल्लिका ॥ भगीरथप्रयत्नेन स्वपितॄन्तारणाय च ॥३९॥

पश्चाज्जगाम रुद्रस्य जटां गङ्गा विधेः सभाम् ॥ सभां प्रदक्षिणीकृत्य विरिञ्चेस्तु महात्मनः ॥४०॥

चतुर्विभज्य चात्मानं सा पपात महानदी ॥ विष्कम्भशैलशिखरे धारा भूत्वा विनिर्गता ॥४१॥

सीता चालकनन्देति सुभद्रा च मनीषिभिः ॥ भद्रसोमेति च ख्यातं तस्या भागचतुष्टयम् ॥४२॥

पूर्वेण सीता गत्वा तु भित्वा शैलाननेकशः ॥ भद्राश्वेन महाभागा समुद्रं प्रविवेश ह ॥४३॥

तथैवाऽलकनन्दा च मेरोर्दक्षिणतो नृप ॥ भित्वा गिरीननेकांश्च सागरं प्रविवेश ह ॥४४॥

सुभद्रा चापि राजेन्द्र गिरीन्सर्वानतीत्य च ॥ पश्चिमे केतुमालाख्यं वर्षं गत्वा महानदी ॥४५॥

द्वीपान्सर्वानतीत्याशु पूरयन्ती तथोदधीन् ॥ भद्रसोमापि भद्रन्तु उत्तरेण गता नृप ॥४६॥

शैलान्गुरूनतीत्यैवं समुद्रं प्रविवेश ह ॥

## पर्वतानामन्तरद्रोण्यः

आनीलनिषधायामौ माल्यवान्गन्धमादनौ ॥४७॥

तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः ॥ भारतः केतुमालश्च भद्राश्वः कुरवस्तथा ॥४८॥

पत्राणि लोकपद्मस्य मर्यादाशैलबाह्यतः ॥ जठरो देवकूटश्च मर्यादापर्वतावुभौ ॥४९॥

तौ दक्षिणोत्तरायामावानीलनिषधावुभौ ॥ गन्धमादनकैलासौ पूर्वपश्चायतावुभौ ॥५०॥

अशीतियोजनायामौ वनस्यान्तव्यवस्थितौ ॥ मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्वताः ॥५१॥

एतेषामन्तरद्रोण्यः सिद्धचारण सेविताः ॥ सुरम्याणि तथा तासु काननानि पुराणि च ॥५२॥

लक्ष्मीविष्ण्वग्निसूर्यादि देवानां राजसत्तम ॥ तत्र देवाश्च गन्धर्वाः यक्षराक्षसकिन्नराः ॥५३॥

क्रीडन्ति तासु राजेन्द्र शैलद्रोणीमहर्निशम् ॥ मया ह्येताः स्मृताः स्वर्गधर्मिणामालया नृप ॥५४॥

नैतेषु पापकर्तारो यान्ति जन्मशतैरपि ॥

## अवतारस्थलानि

भद्राश्वे भगवान्विष्णुरास्ते हयशिरा नृप ॥५५॥

वराहः केतुमाले तु भारते कूर्मरूपधृक् ॥ मत्स्यरूपेण गोविन्दो कुरुष्वास्ते जनार्दनः ॥५६॥
विश्वरूपेण सर्वत्र स एव भगवान्हरिः ॥ सर्वस्याधारभूतोसौ भगवान् पुरुषोत्तमः ॥५७॥

## भरतवर्षादिवर्णनोपक्रमः

यानि किम्पुरुषाद्यानि वर्षाण्यष्टौ कुरूद्वह ॥ न तेषु शोको नायासो न जराव्याधयस्तथा ॥५८॥
स्वस्थाः प्रजा निरातङ्काः सर्वदुःखविवर्जिताः ॥ दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः ॥५९॥
न तेषु वर्ष्यते देवो भौमान्यम्भांसि तेषु वै ॥ कृतत्रेतादिकास्तेषां न हि सन्ति सुरोत्तम ॥६०॥
तेषु सर्वेषु वर्षेषु सप्तसप्तकुलाचलाः ॥ नद्यश्च शतशस्तेभ्यो निःसृता लोकमातरः ॥६१॥
आग्नीध्रस्य सुता राजन्सनाथानि महान्ति च ॥६२॥
नदैर्नदीभिः शिखरैर्वनैश्च क्षेत्रैः सुपुण्यैर्विमलैः सरोभिः ॥
देवर्षिगन्धर्वमनुष्ययक्षैर्जुष्टं जनानां सुकृतैकपात्रम् ॥६३॥
एतादृशं जम्बुसंज्ञं सुरेश द्वीपं जनानां सुकृतैकलभ्यम् ॥६४॥
एतत्पवित्रं परमं सुपुण्यमध्यायमेवं पठति शृणोति यः ॥
स सर्वभोगाननुभूय भूमावन्ते व्रजेच्छिवपुरं सुरवृन्दसेव्यम् ॥६५॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे जम्बुद्वीपवर्णनंनाम दशमोऽध्यायः॥१०॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ११ ॥  NEXT>>  श्लोक संख्या–३२

## ॥ भूलोके जम्बुद्वीपे भरतवर्षवर्णनम् ॥

### भरतवर्षवर्णनम्

शङ्कर उवाच ॥

स्वायम्भुवस्य तनयो मनोः पुत्रः प्रतापवान् ॥ प्रियव्रतो नाम नृपः सप्तद्वीपाधिपोभवत् ॥१॥
तस्य पुत्रा बभूवुर्हि चत्वारो ब्रह्मवादिनः ॥ अग्निशीर्षश्चाग्निबाहुः क्रिमेधाश्च महातपाः ॥२॥
पुरुर्नामा चतुर्थस्तु मुक्तिमैच्छन् सुरोत्तम ॥ सप्तद्वीपवतीं लक्ष्मीं त्यक्त्वा गोकर्णमाविशन् ॥३॥
तत्राश्रमपदं कृत्वा शतशृङ्गस्य मूर्धनि ॥ जितेन्द्रिया निराहारास्तपस्तेपुः सुदुश्चरम् ॥४॥

पुनः सप्त सुतास्तस्य बभूवुः पुरुषोत्तमाः ॥ आग्नीध्रश्च महातेजा तथा मेधातिथिर्नृप ॥५॥
ज्योतिष्मान् द्युतिमान् भव्यो वपुष्मान् सवनस्तथा ॥ सप्तद्वीपानवाहुस्ते पित्रा दत्तान् कुरूद्वह ॥६॥
अग्नीध्रस्याऽभवद्वीपो जम्बुसंज्ञो महान् सुत ॥ बभूवुस्तस्य राजर्षेर्नव पुत्रा महात्मनः ॥७॥
वक्ष्यामि तेषां नामानि शृणुष्वैकमनाः सुत ॥ नाभिः किंपुरुषश्चैव हरिश्च पुरुषोत्तम ॥८॥
इळावृतो हिरण्यश्च मणयः कुरुरेव च ॥ भद्राश्वः केतुमालश्च जम्बुद्वीपाधिपाश्च ते ॥९॥
विभज्य जम्बुद्वीपं सः नवधा राजकुञ्जरः ॥ ददौ तेषां महाराजः पुत्राणां पुत्रवत्सलः ॥१०॥

## भरतवर्षवर्णनम्

ज्येष्ठभागमिदं वर्षं नाभेः कुरुकुलोद्भव ॥ तस्य पुत्रो महानासीदृषभो नाम वीर्यवान् ॥११॥
तस्याप्यभून्महातेजा भरतः कुरुनन्दन ॥ इदं नामाभवत्तस्य भारतं खण्डमित्युत ॥१२॥
नाम्ना किंपुरुषादीनां प्राच्यः खण्डा महाद्युते ॥ उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ॥१३॥
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥ सहस्रैर्नवभिश्चैव योजनैरभिसंवृतम् ॥१४॥
कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् ॥ महेन्द्रो मलयश्चैव शुक्तिमान्वृषपर्वतः ॥१५॥
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥ यत्र सम्प्राप्यते स्वर्गो मुक्तिश्च भरतर्षभ ॥१६॥
नरकं यान्ति पापिष्ठा यतो मानससत्तमाः ॥ तस्मादन्यत्र खण्डेषु न सिध्येत्कर्म पुत्रक ॥१७॥
शुभं शुभेतरं वापि नात्र कार्या विचारणा ॥ कर्मभूमिस्ततो लोके प्रोच्यते ब्रह्मवादिभिः ॥१८॥
भारतस्य च वर्षस्य नव भेदान्निशामय ॥ द्वीपा नवाऽभवन् राजन्खण्डिताः सगरात्मजैः ॥१९॥
सागरावेष्टितास्ते हि सप्तद्वीपाः सुरोत्तम ॥ तेषां नामानि वक्ष्यामि शृणुष्व गदतो मम ॥२०॥
नागद्वीपश्च सौम्यश्च वारुणश्च कुमारिकः ॥ इन्द्रद्वीपः कशेरुश्च ताम्रद्वीपश्च सत्तम ॥२१॥
गान्धर्वोथ गभस्तिश्च सहस्रैर्योजनैर्मिताः ॥ इदं कुमारिकाद्वीपं कन्या बिन्दुसरस्तथा ॥२२॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेति चतुर्विधाः ॥ वर्णाश्रमाः प्रवर्तन्ते भुक्त्वा कृष्यादिकं फलम् ॥२३॥
अत्र दत्तं हुतं चैव पितरः सह दैवतैः ॥ भुञ्जन्ति सुरशार्दूल नान्यस्मिन्निति निश्चयः ॥२४॥
अङ्गद्वीपो यवद्वीपो मलयद्वीप एव च ॥ शङ्खश्च कुमुदश्चैव वाराहश्च सुरोत्तम ॥२५॥
भारताख्यस्य वर्षस्य उपद्वीपा इमे स्मृताः ॥ मलये मलयो नाम पर्वतो महदुच्छ्रितः ॥२६॥
तस्य मूर्ध्नि सुरश्रेष्ठ लङ्का नाम महापुरी ॥ युगाश्चैवात्र चत्वारस्तेषु धर्माः पृथक् पृथक् ॥२७॥

आयुः कर्म यशो वीर्यं भिद्यन्ते युगभेदतः ॥ अत्रैव कुरुशार्दूल नान्यत्र भरतर्षभ ॥२८॥
गङ्गा सरस्वती सिन्धुः यमुना नर्मदा तथा ॥ गोदावरी च कावेरी वेत्रा च विमलोदका ॥२९॥
विपाशा च शतद्रुश्च विशिखा ताम्रपर्णिका ॥ एताः पुण्यतमा राजन्नद्यश्चात्र वसन्ति वै ॥३०॥
गायन्ति देवाः किल गीतिकानि धन्याश्च ये भारतभूमिभागे ॥
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वम् ॥३१॥
कर्मण्यसङ्कल्प्य च तत्फलानि सन्यस्य विष्णौ परमात्मरूपे ॥
अवाप्य तां कर्मभूमिं यतन्ते तत्क्लेशहानिं त्वमलाः प्रयान्ति ॥३२॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे जम्बुद्वीप द्वीपान्तरवर्णनं नाम एकादशोऽध्यायः ॥११॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १२ ॥  NEXT>>  श्लोक संख्या– ४६

## ॥ भूलोके जम्बुद्वीपे किम्पुरुषादिवर्षवर्णनम् ॥

### जम्बुद्वीपे किम्पुरुषादिवर्षवर्णनम्

सूत उवाच ॥

### किंपुरुषम्

अतः परं किंपुरुषं वर्षं शृणु नरेश्वर ॥ योजनैर्नवसाहस्रैर्मितं तत् खण्डमुत्तमम् ॥१॥
कलधौतसुवर्णाश्च पुरुषास्तत्र भारत ॥ स्वादून्यमृतकल्पानि प्लक्षवृक्षफलानि भो ॥२॥
भुञ्जानाः पुरुषास्तत्र दिव्यरूपधरा नृप ॥ जीवन्त्ययुतवर्षाणि न जरां विन्दते जनः ॥३॥

---

### हरिवर्षं

ततः परं शृणु सुत हरिवर्षं सुरोत्तम ॥ कुन्देन्दुशङ्खसदृशाः पुरुषास्तत्र भारत ॥४॥
रमन्ते सहितास्त्रीभिर्निरातङ्का निरामयाः ॥ कौशेयवसनं तत्र वसानाः पुरुषाः सुत ॥५॥
इक्षोरसां हि भुञ्जाना देवकल्पा महाबलाः ॥ सार्धद्वादशसाहस्रवर्षं जीवन्ति निर्जराः ॥६॥

---

### भद्राश्वम्

भद्राश्वस्य महाभाग खण्डं शृणु ततः परम् ॥ मेरोश्च पूर्वदिग्भागे माल्यवान्नाम पर्वतः ॥७॥
अर्धचन्द्राकृतिरसौ दक्षिणोत्तरमायतः ॥ देशस्तस्मात् समभवत्तं नाम्ना भरतर्षभ ॥८॥
आपूर्वसागरं तस्माद्भागो भद्राश्व उच्यते ॥ तत्राप्ययुतमेवायुः नृणां भरतसत्तम ॥९॥
फलाशनाभितृप्ताश्च स्वपन्ति च रमन्ति च ॥ स्त्रीभिः सह सुरश्रेष्ठ दिव्यरूपाभिरप्युत ॥१०॥
योजनैर्नवसाहस्त्रैर्मितं तदपि भारत ॥

## इळावृत्तं

मेरोः पश्चिमदिग्भागे पर्वतो गन्धमादनः ॥११॥
अर्धचन्द्राकृतिः सोपि दक्षिणोत्तरमायतः ॥ तस्मात्पश्चिमतो राजन्नासमुद्रान्महागिरिः ॥१२॥
न पादगोचरो राजन् स्त्रीभिस्तत्खण्डवासिभिः ॥ मेरोरूत्तरदिग्भागे नीलो नाम महागिरिः ॥१३॥
स पूर्वपश्चिमायामो यथैव निषधस्तथा ॥ तेषां मध्ये स्थितो मेरुरालवाल इवांघ्रिपः ॥१४॥
कुलालचक्रवद्राजन्मेरुं कृत्वा प्रदक्षिणम् ॥ तेषां चतुर्णामद्रीणां मध्ये स्थित इळावृतः ॥१५॥
इळावृतस्य तत्क्षेत्रं तस्मात्तद्धि प्रजायते ॥ योजनैर्नवसाहस्त्रैः स्थितं मेरोश्चतुर्दिशम् ॥१६॥
त्रयोदशसहस्त्रायुस्तत्र पञ्चशताधिकम् ॥ जीवन्ति ते सुखं पुत्र जम्बूफलकृताशनाः ॥१७॥
जम्बूफलस्य तोयानि पीत्वा तु मधुराणि ते ॥ रमन्ति योषित्सहिता अप्सरोभिरिवामराः ॥१८॥
वर्णकाः पङ्कजविभा नृत्तगीतविशारदाः ॥ न व्याधिर्नजरा तत्र न मनोदुःखमेव च ॥१९॥
न तत्र पादाः सूर्यस्य गोचराः शशिनस्तथा ॥ सूर्यकान्तस्य रत्नानि शशिना दीपितानि वै ॥२०॥
चन्द्रकान्तस्य च निशि दीपितं तन्नृपोत्तम ॥ नीलाद्रिविराद्राजन्नुत्तरेष्वजरामरम् ॥२१॥

## रमणकम् (रम्यम्)

रमणस्य हि तद्भागं तन्नाम्ना तु प्रथीयते ॥ तत्राप्ययुतमेवायुः द्विसहस्त्राधिकं सुत ॥२२॥
न्यग्रोधपादपफलैः कुर्वन्तो देहसंस्थितिम् ॥ शुक्लवर्णाः सुवर्णाभा निरातङ्का निरामयाः ॥२३॥
देवैः सिद्धैः समुनिभिर्गीर्वाणास्तत्र सन्ति हि ॥ तैस्तैः सीमाचलैराजन् श्वेतो नाम महागिरिः ॥२४॥
पूर्वपश्चायतो राजन् विगाह्याम्भोनिधिं स्थितः ॥

## हिरण्मयम्

ततः परं हिरण्यस्य क्षेत्रं राजन् शृणुष्व भो ॥२५॥
वर्षं हिरण्मयं तद्धि सर्वभोगसमन्वितम् ॥ तद्देवलोकादधिकं मन्यन्ते देवतागणाः ॥२६॥

भुक्त्वा ह्यमृतकल्पानि पक्वानि कुटजस्य च ॥ पीत्वा गवां तु तोयानि रसवन्ति महान्ति च ॥२७॥
कौशेयवसनास्ते वै रमन्ते सप्रिया नृप ॥ अब्दं त्रयोदशन्ते हि सहस्रं सुखजीविनः ॥२८॥
अग्नेः सदृशवर्णा हि स्त्रीपुंसाः पुरुषोत्तम ॥ सस्त्रीकास्तेषु रम्येषु वनेषु ससुगन्धिषु ॥२९॥
क्रीडाभिस्ते मनोज्ञाभि रमन्ति रमयन्ति च ॥ ततः सीम्नि त्रिशृङ्गाख्यः पर्वतो विबुधालयः॥३०॥
सोप्यम्बुधिं विगाह्यैव स्थितः पूर्वपरायतः ॥

---

## उत्तरकुरवः

ततः परं कुरोः खण्डं तन्नाम्ना तदुदीर्यते ॥३१॥
जीवन्ति तत्र हे राजन्सहस्राणि चतुर्दश ॥ वर्षाणि कुरुशार्दूल उत्तरे कुरुसंज्ञके ॥३२॥

---

## केतुमालम्

केतुमालाभिधः खण्डस्तस्माद्दक्षिणतः स्थितः ॥ केतुमान्नाम भद्रन्ते यवीयो भ्रातृवत्सलः ॥३३॥
तन्नाम्ना तदभूत्खण्डं केतुमाल इति प्रभो ॥ भागं तस्य महाभाग ह्यासमुद्रमिहोच्यते ॥३४॥
नीलवर्णास्तु पुरुषास्तत्रस्था सुरसत्तम ॥ रमन्ति नीलवर्णाभिः स्त्रीभिर्नित्यं मुदान्विताः ॥३५॥
जीवन्ति तत्राप्ययुतवर्षाणि मानुषाशनाः ॥ मेरोर्दक्षिणतो राजन्निषधो नामपर्वतः ॥३६॥
पूर्वापरायतः श्रीमानासमुद्रान्महागिरिः ॥ खण्डानामभवत् सीमा गिरीणामुत्तमः स्मृतः ॥३७॥
नीलाचलान् शृणु नृप सङ्क्षेपाद्वदतो मम ॥ हिमवान् हेमकूटश्च निषधो माल्यवांस्तथा ॥३८॥
गन्धमादननीलौ च श्वेतः शिखरिणां वरः ॥ त्रिशृङ्गश्च महाराज अष्टौ नीलाचला इमे ॥३९॥
अस्यद्वीपस्य राजेन्द्र मेरुर्मध्ये स्थितो महान् ॥ यथा हि माधवस्यैव नाभिपद्ममभून्नृप ॥४०॥
तथा द्वीपस्य मध्येऽसौ महामेरुर्विराजते ॥ स्वर्गो हि तत्र राजेन्द्र देवानामालयानि च ॥४१॥
देवास्तत्रैव तिष्ठन्ति गन्धर्वाप्सरसस्तथा ॥ सिद्धा ब्रह्मर्षयस्तत्र तथा सुकृतिनो नृप ॥४२॥
अनित्यानीतराण्याहुः सुरर्षीणां सुरोत्तम ॥ एतत्ते कथितं राजन् जम्बूद्वीपं समासतः ॥४३॥
मितमेतल्लक्षसंख्यैर्योजनैर्भरतर्षभ ॥ द्वीपेष्विदं महापुण्यं तत्रापीदं हि भारतम् ॥४४॥
भारते तु सुरश्रेष्ठ क्षेत्राणि त्रीणि पुत्रक ॥ पूजितानीह गोकर्ण काशी रामेश्वरस्तथा ॥४५॥
अतः परं प्रवक्ष्यामि समुद्रं लावणं शृणु ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे किम्पुरुषादिवर्णनं नाम द्वादशोऽध्यायः॥१२॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १३ ॥  NEXT>>  श्लोक संख्या– ८८

## ॥ भूलोके प्लक्षद्वीपादि वर्णनम् ॥

### भूलोके इतरेषां द्वीपानां सागराणां च वर्णनम्

शङ्कर उवाच ॥

### लवणोदधिः

लवणेन समुद्रेण चक्राकारेण वेष्टितः ॥ जम्बुद्वीपः कुरुश्रेष्ठ द्विलक्षपरिमाणिना ॥१॥

लावणे ह्युपद्वीपानि सन्ति चत्वारि भूपते ॥ चन्द्रद्वीप इति ख्यातं सर्वरत्नाकरो महान् ॥२॥

मध्येसमुद्रं तद्राजन् अयुतैर्योजनैर्मितः ॥ भोग्यं सुरगणैस्तद्धि सुपुण्यं सुमनोहरम् ॥३॥

भद्रो नामापरो राजन् पश्चिमे लवणोदधेः ॥ भद्राकरस्तु पूर्वेण दक्षिणे मलयात्स्थितः ॥४॥

योजनानां सहस्रेण मितौ तौ सुरसत्तम ॥ भद्राकरान्ते त्रीण्यासन् तेषां नामानि मे शृणु ॥६॥

ऋषभो धूम्रकश्चैव दुन्दुभिश्चैव विश्रुतः ॥ द्वीपस्य मलयस्यासन्कथितास्ते हि ताः शृणु ॥७॥

मैनाकश्चैव चक्रश्च तृतीयश्च बलाहकः ॥ चक्रमैनाकयोर्मध्ये वायव्यां दिशि पावकः ॥८॥

और्वो नाम तुरङ्गास्यो जलं पात्युद्गिरत्यपि ॥ नातिरिक्ताश्च वर्धन्ते तस्मिन्नापो महार्णवे ॥९॥

उदये चास्तवेलायां चन्द्रस्य नृपसत्तम ॥ अन्योन्यौ चैव क्षीयेते मध्येऽस्तोदययोर्नृप ॥१०॥

तदेव पीयते चाम्भस्तुरङ्गास्यो महानलः ॥ अस्तोदये ह्युद्गिरति नित्यं ह्यौर्वो मुदान्वितः ॥११॥

वर्षाकालोद्भवं तोयं और्वः पास्यति चार्णवे ॥ निःशेषं भरतश्रेष्ठ स्वां प्रतिज्ञामनुस्मरन् ॥१२॥

ऋषिभिः कर्षितस्थाने वायव्यां दिशिसागरे ॥ आस्ते चाद्यापि राजेन्द्र लोकानां हितकांक्षया ॥१३॥

सावरोरर्दन श्चैव वाराहश्चेति ते त्रयः ॥ भद्रस्य द्वीपमुख्यस्य त्रीण्यासन्सहिता नृप ॥१४॥

इन्द्रद्वीपाधिपो राजन् आग्नीध्रस्य सुतो बली ॥

---

### लक्षद्वीपः इक्षुसागरश्च

परीत्य लवणं राजन्प्लक्षद्वीपः स्थितो महान् ॥१५॥

लवणाद्द्विगुणं राजन्प्लक्षद्वीपं विदुर्बुधाः ॥ खण्डानि तत्र सप्तैव सप्त मेधातिथेः सुताः ॥१६॥

पृथग्विभज्य रक्षन्ति प्लक्षद्वीपं महाबलाः ॥ तेषां नामानि राजेन्द्र तानि वक्ष्यामि ते विभो ॥१७॥

सुखोदयश्च शिशिरः शिलाङ्गः क्षेमकस्तथा ॥ रम्यः शान्तनवश्चैव ध्रुवश्च कुरुसत्तम ॥१८॥

सप्त सीमाचलास्तत्र खण्डानां परिखण्डकाः ॥ वक्ष्यामि तेषां नामानि शृणु त्वं सुरसत्तम ॥१९॥
गोमेदश्चन्द्रतीर्थश्च सुनामा दुन्दुभिस्तथा ॥ वैभ्राजकः शारदश्च सोमकश्चैव सत्तम ॥२०॥
वर्षाचलेषु रम्येषु वर्षेष्वेतेषु पुत्रक ॥ वसन्ति देवगन्धर्वसहिताः सततं प्रजाः ॥२१॥
तेषु रम्या जनपदा दिव्यभोगाश्चिरायुषः ॥ नाधयो व्याधयस्तत्र सर्वदा सुखमेव हि ॥२२॥
तेषु नद्यस्तु सप्तैव वर्षेषु च समुद्रगाः ॥ नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः ॥२३॥
अनुतप्ता शची चैव शिवा धात्री दिवा क्रमात् ॥ सुकृती च महाभागा सप्तैताः कथितास्तव ॥२४॥
न तेष्वस्ति युगावस्था तेषु खण्डेषु सत्तम ॥ त्रेतायुगसमः कालः कथितः सर्वदैव हि ॥२५॥
प्लक्षद्वीपादिषु विभो शाकद्वीपान्तकेषु वै ॥ तत्रस्थानां सुरश्रेष्ठ आयुर्वर्षसहस्रकम् ॥२६।
एते शैलास्तथा नद्यः प्रधानाः कथितास्तव ॥ जम्बूवृक्षप्रमाणस्तु तन्मध्ये सुमहांस्तरुः ॥२७॥
प्लक्षस्तु तस्मात्तत्संज्ञा प्लक्षद्वीप इति प्रभो ॥ तमावेष्ट्य स्थितो राजन्नुदन्वानिक्षुसंज्ञितः ॥२८॥

---

## शाल्मलद्वीपः सुरासागरश्च

ततस्तत्परितो राजन् द्वीपः शाल्मल उच्यते ॥ तत्रापि सप्त वर्षाणि वपुष्मत्तनयैर्विभो ॥२९॥
भुज्यन्ते सततं तत्र तेषां नामानि मे शृणु ॥ लोहितो वैद्युतश्चैव हरितः श्वेत एव च ॥३०॥
सुप्रभश्चेति जीमूतो मानसश्चेति सप्तमः ॥ तेषां सीम्नि स्थिताः पुत्र पर्वताः सप्त चैव हि ॥३१॥
तेषां नामानि वक्ष्यामि क्रमेण पुरुषर्षभ ॥ कुमुदश्चोततश्चैव महिषश्च महागिरिः ॥३२॥
नुङ्कः ककुद्मान्द्रोणश्च वलाहश्चेति सप्तमः ॥ सोपि राजन्परिवृतः सुरोदेनाब्धिना महान् ॥३३॥

---

## कुशद्वीपः घृतसागरश्च

स सुरोदो महान्राजन्कुशद्वीपेन संवृतः ॥ तत्रापि सप्त द्वीपानि ज्योतिष्मत्तनयैर्विभो ॥३४॥
भुज्यन्ते कुरुशार्दूल तेषां नामानि मे शृणु ॥ वेणुः प्रभान्तरश्चैव उद्भिदः करलम्बनः ॥३५॥
धृतिमांश्चैव रम्यश्च मण्डलः कथितास्तथा ॥ तेषु सर्वेषु मनुजाः सह दैतेयमानवैः ॥३६॥
वसन्ति कुरुशार्दूल निर्भया निरहङ्कृताः ॥ अवधित्वे स्थितास्तेषां गिरयः सप्त भारत ॥३७॥
मन्दरो विद्रुमश्चैव कुमुदश्च महागिरिः ॥ पुष्पकः केतुमान्नाम कूटसंज्ञस्तथैव च ॥३८॥
हेमन्त इति सप्तैते गिरयः सीम्नि संस्थिताः ॥ नद्यस्तु सप्त तासां तु नामनि शृणु भूपते ॥३९॥
धूतपापा शिवा चैव पवित्रा सुरतिस्तथा ॥ विद्युदम्भा मही चान्या सुरसा सप्तमी स्मृता ॥४०॥
क्षुद्रनद्यस्तथा शैला न सङ्ख्येया हि भारत ॥ कुशद्वीपः परिवृतो घृताम्भोनिधिना प्रभो ॥४१॥

## क्रौञ्चद्वीपः दधिसागरश्च

घृतोदसागरश्चैव क्रौञ्चद्वीपेन संवृतः ॥ क्रौञ्चद्वीपाधिपस्यापि पुत्राः सप्त महीपते ॥४२॥
द्युतिमांस्तत्र राजेन्द्र सप्तधाव्यभजन्महीम् ॥ तत्तत्खण्डं पृथक् तेभ्यः पुत्रेभ्यः प्रददौ नृपः ॥४३॥
पुत्रनामानि खण्डानां तेषां सम्प्रददौ नृपः ॥ प्रवरश्चेषुकश्चैव आननश्चेति विश्रुतः ॥४४॥
कुशलो नामधेयश्च दुन्दुभिश्चैव भारत ॥ मनोनुगस्तुङ्गभद्रस्तेषां खण्डानि सत्तम ॥४५॥
तावद्भिः पर्वतैराजन् खण्डितानि महान्ति च ॥ तेषां नामानि राजेन्द्र शृणुष्व गदतो मम ॥४६॥
क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः ॥ चतुर्थो रत्नशैलश्च पुण्डरीकश्च पञ्चमः ॥४७॥
देवसारो निदूषकौ देवगन्धर्वसेविताः ॥ वर्षेष्वेतेषु रम्येषु वनशैलसरित्तटे ॥४८॥
निवसन्ति निरातङ्काः सहदेवगणैः प्रजाः ॥ तत्रापि नद्यो राजेन्द्र सप्त ताः शृणु सत्तम ॥४९॥
गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोनुगा ॥ ख्यातिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः ॥५०॥
क्रौञ्चद्वीपश्च राजेन्द्र आवृतो दधिसिन्धुना ॥

---

## शाकद्वीपः क्षीरसागरश्च

दधिसिन्धुश्च राजेन्द्र शाकद्वीपेन वेष्टितः ॥५१॥
शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः ॥ सप्तैव तनयास्तेषां नामानि शृणु भूपते ॥५२॥
जलदश्च कुमारश्च सुकुमारो महीचकः ॥ सुरम्यश्चोत्तमश्चैव सप्तमस्तु महाद्रुमः ॥५३॥
तेषां नामानि खण्डानामभवन्कुरुपुङ्गव ॥ ततः सीमाचलाः सप्त खण्डविच्छेदकारिणः ॥५४॥
उदयो जलधारश्च तथा रैवतकः स्मृतः ॥ श्यामश्चैत्रगिरिश्चैव अम्बिकेयस्तथा स्मृतः ॥५५॥
केसरी सप्तमस्तेषां वर्षसीम्नि व्यवस्थिताः ॥ नद्यस्तत्र महापुण्याः सर्वपापहराः शुभाः ॥५६॥
सुकुमारी कुमारीति नन्दिनी वेणुका तथा ॥ इक्षुश्च धेनुका चैव गभस्तिः सप्तमी स्मृता ॥५७॥
अन्यास्त्वयुतशस्तत्र क्षुद्रनद्यो महामते ॥ महीधरास्तथा सन्ति शतशोथ सहस्रशः ॥५८॥
तासां नदीनाममृतं चिन्वन्ति सुखिनो जनाः ॥ तत्रजा नरशार्दूल निरुजाः सन्ति तत्र वै ॥५९॥
शाकद्वीपश्च राजेन्द्र क्षीरोदेन समावृतः ॥ तन्निर्मन्थ्योदधिं राजन् देवदैत्यगणैः सह ॥६०॥
अमृतं लेभिरे पुत्र वस्तूनि सुरसत्तमाः ॥ रुद्रश्चूडामणिं लेभे कालकूटविषं तथा ॥६१॥
कौस्तुभं भगवान्विष्णुः श्रियञ्च भरतर्षभ ॥ आखण्डलः सुरतरुमैरावतगजं तथा ॥६२॥
उच्चैःश्रवसमश्वं च पारिजाततरुं तथा ॥ सुधां तथामरगणाः प्रापुस्तत्स्यानतः सुत ॥६३॥

जयं पुष्टिं बलं चैव अमरत्वं महामते ॥ तस्मिन्शेते स भगवान्विष्णुस्त्रैलोक्यवन्दितः ॥६४॥

## पुष्करद्वीपः स्वाद्वम्बुसागरश्च

तमावेष्ट्य स्थितो राजन्क्षीरोदं पुष्करेक्षणम् ॥ द्वौ पुत्रौ सवनस्यापि पुष्कराधिपतेः सुत ॥६५॥
द्वौ भागौ तत्र राजेन्द्र द्वयोस्तु प्रणिधानकौ ॥ महीध्रो धातुकिश्चापि द्वौ भागौ वलयाकृती ॥६६॥
वलयाकृत्योस्तयोर्मध्ये सीमाशैलः प्रथीयते ॥ सुमानसोत्तरो नाम देवगन्धर्वसेवितः ॥६७॥
अन्तस्तस्यास्य राजेन्द्र खण्डं धातकिपालितम् ॥ महाभीतकमित्याहुः बहिस्तस्य महामते ॥६८॥
तयोरायुर्मनुष्याणां सहस्राणि त्रयोदश ॥ नृप जीवन्ति वर्षाणि निरातङ्का निरामयाः ॥६९॥
न तत्र वर्णभेदो वा न क्रियेन्द्रियसंक्षयः ॥ नाधमो नोत्तमश्चापि न मध्यो राजसत्तम ॥७०॥
नेर्ष्यासूया भयं रोषो लोभकोपौ च मत्सरः ॥ स्त्रीभिरप्सरकल्पाभिर्जनाः क्रीडन्त्यनामयाः ॥७१॥
नद्यो नदश्च गिरयस्तत्र सन्ति सहस्रशः ॥ फलान्यमृतकल्पानि भुक्त्वा पूर्णमनोरथाः ॥७२॥
फलं भुक्त्वा पयः पीत्वा नृत्यन्ति च हसन्ति च ॥ गायन्ति नरशार्दूल विष्णुं ते वैष्णावाः स्मृताः॥७३॥
तयोः सीमाचलो राजन् चत्वरि नगराणि वै ॥ दिक्पतीनां नरश्रेष्ठ चतुर्णां शृणु तानि तु ॥७४॥
पूर्वेण सुरराजस्य नगरीत्वमरावती ॥ यमस्य दिक्संयमिनी दक्षिणेन सुरोत्तम ॥७५॥
वारुणे वरुणास्यास्ते नाम्ना भोगवतीति वै ॥ कुबेरस्योत्तरे भागे अलका नाम वै पुरी ॥७६॥
एतद्वै पुष्करद्वीपमावृतं स्वादुवारिणा ॥

## सुवर्णभूः

सौवर्णकेन स्वाद्वम्बु आवृतं कुरुसत्तम ॥७७॥
सौवर्णीति परिख्याता भूप्रदेशा मनोरमाः ॥ न तत्र गुल्मं न च्छाया न तृणं न तरुस्तथा ॥७८॥
सौवालुकासु च नृप क्रीडा भूमिर्दिवौकसाम् ॥

## भूलोकस्य सीमा

तां परीत्य स्थितो राजन् अन्धकारो महानभूत् ॥७९॥
अर्धत्रिकोटि राजेन्द्र योजनैः परिसम्मिता ॥ तस्याश्चतुर्दिशं राजन् चत्वारः पर्वताः स्थिताः ॥८०॥
वसु नामा शङ्खपादो हिरण्यः केतुमानथ ॥ प्रागादिदिक्षु संज्ञेयाः सीमाभूमेर्नृपोत्तम ॥८१॥
उच्छ्रितोसौ नगश्रेष्ठो दशसाहस्रयोजनम् ॥ विस्तारस्तावदेवासौ परिणाहं शृणुष्व तत् ॥८२॥

पञ्चाशत्कोटि राजेन्द्र तस्य भूमेश्च कथ्यते ॥

पूर्वोक्तादपरं राजन्द्विगुणं सागरं विदुः ॥८३॥
द्वीपं द्वीपं तथा राजन्द्विगुणं भरतर्षभ ॥ प्लक्षादिशाकपर्यन्तं द्वीपेषु कुरुसत्तम ॥८४॥
चतुर्वर्णा वसन्ति स्म कुर्वन्तो विविधाः क्रियाः ॥

### लोकान्तरवर्णनोपक्रमः

अस्य भूमेरधस्तात्तु सप्तपातालमुच्यते ॥८५॥
ऊर्ध्वं भूमेः सप्तराजन् सन्ति लोकाः कुरूद्वह ॥ मनुष्याः पशवश्चैव पक्षिणः स्थावरास्तथा ॥८६॥
देवदानवगन्धर्वपिशाचोरगराक्षसाः ॥ सर्वेषां चैव भूतानां भूमिः साधारणी स्मृता ॥८७॥
एतत्समो न चान्यद्वै भूलोकः कथितस्तव ॥ सर्वरत्नमयः सोऽथकिमन्यच्छ्रोतुमिच्छसि ॥८८॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे प्लक्षद्वीपादिवर्णनं नाम त्रयोदशोऽध्यायः ॥१३॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः १४ ॥ NEXT>> श्लोक संख्या– ३०

## ॥ ब्रह्माण्डे ऊर्ध्वलोकानां वर्णनम् ॥

### ऊर्ध्वलोकानां वर्णनम्

### भुवर्लोकः

कुमार उवाच ॥

सप्त लोकान् कथय मे ग्रहाणां चैव संस्थितिम् ॥ पाताळानि च मे भूयो यथावद्वक्तुमर्हसि ॥१॥

शङ्कर उवाच ॥

शृणु पुत्र प्रवक्ष्यामि सप्त लोकानधस्थितान् ॥ भूलोकादीन् तथा सप्त लोकानूर्ध्वाननुक्रमात् ॥२॥
पातालांश्चैव राजेन्द्र सहैभिर्मुनिपुङ्गवैः ॥ भूलोकादनु राजेन्द्र भुवर्लोकः प्रकीर्तितः ॥३॥
सूर्यमार्गादधो राजन् लक्षयोजनमुच्यते ॥ भूमेरुपरि यत्तस्मिन् भुवर्लोकं विदुर्बुधाः ॥४॥
रुद्रादीनां वसूनां च सूर्यादीनां च सत्तम ॥ निवासभूमिर्देवानां विमानपरिचारिणाम् ॥५॥

### स्वर्लोकः

ततः परं सुरश्रेष्ठ स्वर्लोकं परिचक्षते ॥ आरभ्य सूर्यात्सुमते ह्यधश्चन्द्राच्च सत्तम ॥६॥
लक्षयोजनविस्तारं स्वर्लोकं देवताश्रयम् ॥ तस्माल्लक्षान्तरे राजन्तारकाद्योतितप्रभः ॥७॥
तस्मात्परो बुधो राजन् लक्षद्वयमुदीर्यते ॥ तस्माद् द्विलक्षाच्छुक्रोपि उपरिष्टादुदीर्यते ॥८॥
तस्माद् द्विलक्षाद्भौमोऽस्ति तस्माद्देवपुरोहितः ॥ तस्माद् द्विलक्षतः पुत्र सूर्यसूनुर्व्यवस्थितः ॥९॥
सौरेः परस्ताल्लक्षात्तु मुनीनां मण्डलं स्मृतम् ॥ सप्तानां राजशार्दूल सिद्धानां सिद्धिवत्सल ॥१०॥
तस्मात्तु शिंशुमारोस्ति लक्षयोजनदूरतः ॥ शिंशुमारादधो राजन्नवेरुपरिसत्तम ॥११॥
एष स्वर्लोकसंज्ञो वै ग्रहाणामाश्रयो महान् ॥ अस्मिन् लोके चरन्ति स्म अष्टाविंशतिकोटयः ॥१२॥

विमानानि महाराज ग्रहाणां मरुतामपि ॥ मितास्तेपि सुरश्रेष्ठ दशसाहस्त्रयोजनैः ॥१३॥
आवहो नाम भद्रन्ते वायुर्वीजति सत्तम ॥ आमेघादवनेरूर्ध्वं प्रवहो नाम मारुतः ॥१४॥
मेघेभ्यः सूर्यमार्गात्तु तस्मादुद्वह उच्यते ॥ आसोमात् कुरुशार्दूल प्रसन्नस्तदन्तरम् ॥१५॥
आताराद्विवहस्तस्मात् ग्रहाणां मण्डलादपि ॥ ग्रहेभ्योपि महाभाग आसप्तष्यृषिमण्डलात् ॥१६॥
परावह इति ख्यातो वायुर्वीजति सत्तम ॥ मुनिभ्यः शिंशुमारात्तु वायुः परिवहो वहेत् ॥१७॥
सप्तस्कन्धेषु राजन्द्र वायवः कथितास्तव ॥

## महर्लोकः

तस्मात्परं महान्तं वै महर्लोकं विदुर्बुधाः ॥१८॥
कोटियोजनविस्तारं स्वर्लोकात् परमुच्यते ॥ इन्द्रादयः सुरास्तस्मिन् योगमार्गानुसारिणः ॥१९॥
मुक्तस्पृहा वसन्ति स्म राजन् कुरुकुलोद्वह ॥

## जनर्लोकः

जनर्लोकमिति ख्यातं तस्मात् परमरिन्दम ॥२०॥
द्विकोटियोजनैर्ज्ञेयं ब्रह्मलोकाधिवासिनः ॥ दक्षः पुलस्त्यः पुलहः क्रतुश्च भृगुरेव च ॥२१॥
एते चान्ये च तत्रस्था जनर्लोकनिवासिनः ॥

## तपोलोकः

तस्माच्चतुष्कोटिमितस्तपोलोक उदाहृतः ॥२२॥
तस्मिन् वसन्ति राजेन्द्र पद्मयोनेः सुता दश ॥ सनत्कुमारः सनकः सनन्दाद्याश्च सत्तम ॥२३॥

### सत्यलोकः

तस्मादपि महाराज सत्यलोक उदाहृतः ॥ षट्कोटियोजनमितं स्वर्गाणां शिखरं विदुः ॥२४॥
तत्प्राप्तिमाहुरमलां मुक्तिं कुरुकुलोद्भव ॥ नाभिपद्मं जगद्धातुस्तद्गत्वा व्यकसत् किल ॥२५॥
तस्मिन् ब्रह्मा पद्मयोनिर्बभूव जगतीपते ॥ चतुर्विधानि भूतानि ह्युत्पद्यन्ते यतो नृप ॥२६॥
तद्ब्रह्मभवनं दिव्यं मुनीनामालयं महत् ॥ राजते राजसं तेज अनौपम्यं चतुर्मुखम् ॥२७॥
लोकचिन्ताकरं तद्धि सर्वेषां प्रपितामहः ॥

### ब्रह्माण्डस्य ऊर्ध्वसीमा

तस्मात् परं कुरुश्रेष्ठ रौद्रं सिद्धास्पदं महत् ॥२८॥
द्विकोटियोजनान्ते तु योगाधारं शिवस्य भो ॥ ऊर्ध्वं तदन्तरे राजन् लोकान्ते लग्नमुच्यते ॥२९॥
कथितस्ते समासेन लोकानां विस्तरो महान् ॥ तत्रत्यानां निवासश्च किमन्यच्छ्रोतुमिच्छसि ॥३०॥
इतिश्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डे भुवर्लोकादिवर्णनंनाम चतुर्दशोऽध्यायः॥१४॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १५ ॥  NEXT>>  श्लोक संख्या– ६०

## ॥ अधोलोकानां वर्णनं– गोकर्णक्षेत्रवर्णने कालकेयपीडावर्णनम् ॥

### अधोलोकानां वर्णनं

कुमार उवाच ॥
पातालानि च मे ब्रूहि यथावत् परमेश्वर ॥ तेषु ये वै वसन्ति स्म पातालेषु च तानपि ॥१॥
शिव उवाच ॥
पातालानि प्रवक्ष्यामि शृणुष्वैकमना नृप ॥ अतलं वितलं चैव सुतलं च तलातलम् ॥२॥
रसातलं च भद्रन्ते महातलमतः परम् ॥ तस्मात् परं तु पातालं सप्तमं कुरुसत्तम ॥३॥
पूर्वोक्तादपरं प्रोक्तं अयुतैर्योजनैरधः ॥ द्विगुणस्तेषु विस्तारः कथ्यते तत्वदर्शिभिः ॥४॥

### अतलः

आसन्नमतळं राजन् तलं सौवर्णमुच्यते ॥ तस्मिन् वसन्ति राजेन्द्र शेषाद्याः पन्नगोत्तमाः ॥५॥

बलिप्रभृतयस्तत्र दैत्याश्च निवसन्ति हि ॥ प्रभया सूर्यकान्तस्य महत्या परिदीपितम् ॥६॥
तस्मिन् वसन्ति दैत्येन्द्र दिव्यभोगसमन्विताः ॥ नागाश्च नरशार्दूल स्त्रीभिः सह मनोरमाः ॥७॥
क्रीडन्ति तत्र तत्रैव यथारुचि यथासुखम् ॥ त्रिविष्टपाच्छतगुणं भोगमाहू रसातळे ॥८॥
सर्वेषु तेषु कौरव्य न जरामरणादिकम् ॥ द्विरष्टवर्षाकृतय स्त्रीपुंसास्तेषु भारत ॥९॥
रजसा तमसाविष्टं दानं कुरुकुलोद्भव ॥ तेषां भोगाय भवति दत्तं सात्विकवर्जितम् ॥१०॥

---

## वितलः

वितले निवसन्ति स्म विपुलोमादयो सुराः ॥ शिलामयस्तु राजेन्द्र समः सर्वत्र भूमिषु ॥११॥

---

## सुतलः नितलश्च

तस्मादधस्तात्सुतलं हिरण्याक्षादिभिर्नृप ॥ कृताधिवासं सुमहन्नितलं परिकीर्तितम् ॥१२॥
नीलरत्नमयं तच्च कालनेमिपुरोगमैः ॥ असुरैराश्रितं पुत्र सर्वभोगसमन्वितम् ॥१३॥

---

## तलातलः महातलः पातालश्च

तलातलं ततस्तस्मादधस्तात्सुरसत्तम ॥ माणिमय्यः सुभूम्यश्च निर्मिता विश्वकर्मणा ॥१४॥
प्रह्लादप्रमुखैर्दैत्यैः कृताधिवसतिर्नृप ॥ महातलं नाम विभो पातालं सप्तमं स्मृतम् ॥१५॥
नमुच्याद्यसुरास्तस्मिन् वसन्ति कुरुपुङ्गव ॥

---

## नरकाः

तेषामधस्ताद्राजेन्द्र दशसाहस्रयोजने ॥१६॥
द्वात्रिंशन्नरका राजन्सुघोरास्तान् शृणुष्व मे ॥ घोरोष्णो रौरवश्चैव महारौरवपूतिकौ ॥१७॥
यमी गिरिसुता चापि अवीचिः सुतनुस्तथा ॥ गीतका कालसूत्रा च सकृमी च कुरूद्वह ॥१८॥
अस्थिपद्मंमहारौद्रकुम्भीपाकाम्बरीषकाः ॥ करपत्रविहाराश्च नरकाः कथितास्तव ॥१९॥
द्वात्रिंशत्कोटि नरकास्तेषां मुख्याः प्रकीर्तिताः ॥ अवाप्यास्ते दुष्कृतिभिरतिदुर्गाः स्वभावतः ॥२०॥
नानायातनसङ्कीर्णा महाघोरा भयावहाः ॥ तेषु संक्षिप्य शोध्यन्ते पापिष्ठा यमकिङ्करैः ॥२१॥
इतस्ततो रोदमाना स्वानि कर्माण्यनुस्मृताः ॥ यावत् पापं क्षयं याति तावत्तेषु वसन्ति ते ॥२२॥

---

## ब्रह्माण्डस्य अधःसीमा

तेषामधस्तादपि च विदेशः शतयोजनः ॥ ततः परं तदण्डं स्यादधस्तात् परिकीर्तितम् ॥२३॥

विश्वाधारमिदं राजन् जगदण्डं जगत्पते: ॥ दशदिक्षु दशावासा अष्टमूर्तेर्महात्मनः ॥२४॥
ब्रह्माण्डमिति राजेन्द्र वदन्ति वदतां वराः ॥ परमात्मात्मनस्तात पुरा ह्यण्डमभून्नृप ॥२५॥
तदण्डाभ्यन्तरे सर्वमाब्रह्मस्तम्बमप्युत ॥ सञ्चरन्त्यृषयः सर्वे तत्र देवगणाः सदा ॥२६॥

---

## सागरकथा–१, कालकेयपीडा ॥

कुमार उवाच ॥

कथितो भवता देव लोकानां विस्तरस्त्वया ॥ चतुर्दशानां भद्रन्ते कथिताः सप्तसागराः ॥२७॥
तथापि यन्मे मनसि श्रोतुमिच्छा प्रवर्तते ॥ समुद्राः सागराख्यां तु कथं प्राप्ता वदस्व मे ॥२८॥

शिव उवाच ॥

साधु पृष्टं त्वया सौम्य संक्षेपात् कथयामि ते ॥ देवैः सम्प्रार्थितः पुत्र कुम्भयोनिर्महातपाः ॥२९॥
पपौ समुद्रं सकलं निस्तोयमकरोत्तदा ॥ तदा सूर्यकुलोत्पन्नः सागरो नाम पार्थिवः ॥३०॥
हयमेधं क्रतुवरमकरोद्भूरिदक्षिणाम् ॥ तत्पुत्राः षष्टिसाहस्राः पित्रादिष्टा विनिर्गताः ॥३१॥
रक्षणार्थं तुरङ्गस्य लोकान् सर्वान् प्रचक्रमुः ॥ गूढरूपस्तदा शक्रो जहाराश्वं सुरोत्तम ॥३२॥
स्थापयामास तुरगं पाताले कपिलाश्रमे ॥ ततः सगरपुत्रास्ते ह्यदृष्टाश्वाः सुकोपिताः ॥३३॥
भूलोकं मृगयामासुः स्वर्गलोकमतः परम् ॥ तत्राप्यदृष्ट्वा तुरगं पातालं गन्तुमुत्सुकाः ॥३४॥
ततोऽवनिं च भित्वा ते पातालं विविशुर्नृप ॥ मृगयित्वा तु सर्वत्र पाताले सगरात्मजाः ॥३५॥
कपिलस्य समीपे तु दृष्ट्वाश्वं ते महाबलाः ॥ कपिलं हन्तुकामास्ते चोरोऽयमिति वादिनः ॥३६॥
कपिलाग्नौ विनिर्दग्धास्तेपि सर्वे पतङ्गवत् ॥ भगीरथस्तु तत्पौत्रस्तपस्तप्त्वा सुरापगाम् ॥३७॥
आनीय पूरयामास समुद्रं वरुणालयम् ॥ तस्मात् सागर इत्याख्यां समुद्रः प्राप सत्तम ॥३८॥
मग्नमासीत्तदा सर्वं गोकर्णेन सह प्रभो ॥ तदा सर्वे ऋषिवरा गोकर्णनिलया द्विजाः ॥३९॥
त्यक्त्वा तत् सह्यमगमन् दुःखशोकपरायणाः ॥ ततस्तपोभिर्बहुधा सह्याद्रौ कुरुसत्तम ॥४०॥
विष्णुं प्रसादयामासुर्ऋषयस्तन्निवासिनः ॥ ततः प्रसन्नो भगवान् रामरूपी जनार्दनः ॥४१॥
उद्धृत्य सह्यपादे तत् पुनस्तेषां ददौ हरिः ॥ एतत्ते सर्वमाख्यातं किमन्यत् कथयामि ते ॥४२॥

शतानीक उवाच ॥

किं कारणमगस्त्येन पीतो जलनिधिः पुरा ॥ अत्यद्भुतमहं मन्ये अगस्त्यस्य तपोबलम् ॥४३॥
कथं पुनः समुद्रो वै पूरितो मकरालयः ॥ कथं स सगरो राजा अश्वमेधमकारयत् ॥४४॥
पुनर्याज्ञियमश्वं सः कथमाप महामते ॥ शंसैतत् सकलं त्वं नः श्रोतुमिच्छामहे वयम् ॥४५॥

सूत उवाच ॥

श्रूयतां कुरुशार्दूल कथां पौराणिकीं त्विमाम् ॥ कालेया इति विख्याता असुरा देवशत्रवः ॥४६॥
समुद्रं ते समासाद्य हते वृत्रे महासुराः ॥ त्रैलोक्यस्य विनाशाय दीक्षिताः कुरुसत्तम ॥४७॥
रात्रौ निर्गत्य सहिताः कालेयाः कालचोदिताः ॥ आश्रमाणि समासाद्य मुनीनां भावितात्मनाम्
॥४८॥
भक्षयामासुरव्यग्राः सपत्नीकान् तपोधनान् ॥ ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्च कुरुसत्तम ॥४९॥

रात्रौ रात्रौ विनिर्गत्य भक्षयामासुरोजसा ॥ दिवा समुद्रे संलीना न दृश्यन्ते कथञ्चन ॥५०॥
एवं वर्षसहस्रान्तं निर्घृणाः पापकर्मिणः ॥ क्षयमापुः प्रजाः सर्वास्त्रैलोक्यपरिसर्पिणः ॥५१॥
अस्थिसङ्घातसङ्कीर्णा तत्र तत्राभवन्मही ॥ भूतवेताळसङ्कीर्णा निर्मनुष्या कुरूद्वह ॥५२॥
ततो देवाः सगन्धर्वा ऋषयः पाण्डुनन्दन ॥ उद्वेगमगमन् सर्वे भयविह्वलचेतसः ॥५३॥
न विदुस्तद्गतिं ब्रह्मन् कुतश्चोत्पद्यते इति ॥ ततो देवाः सहेन्द्रेण ब्रह्माणं शरणं गताः ॥५४॥
आर्तनादं विकुर्वाणो रक्षस्वेति पुनः पुनः ॥ तच्छ्रुत्वा भगवान् ब्रह्मा देवानिदमथाब्रवीत् ॥५५॥
हते वृत्रे कालकेया समुद्रं निधिमम्भसाम् ॥ समासाद्य दुराधर्षा लोकस्योत्सादने रताः ॥५६॥
तस्माद्गच्छध्वममराः कुम्भयोनिं तपोनिधिम् ॥ स तु शक्तो हि नान्योऽस्ति समुद्रपरिशोषणे ॥५७॥
पीतेऽगस्त्येन सलिले वधिष्यध्वं सुरास्ततः ॥ कालकेयान् दुराचारान् नान्यथा शक्यते सुराः ॥५८॥

इति तद्वचनं श्रुत्वा सह तेन महात्मना ॥ गत्वाऽगस्त्यसमीपं ते देवा ऋषिगणैः सह ॥५९॥
अगस्त्यमृषिमासीनं प्रणिपत्येदमब्रुवन् ॥६०॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे पाताळादिवर्णनं कालकेयपीडा नाम पञ्चदशोऽध्यायः ॥१५॥

## अगस्त्येन समुद्रपानम्

देवा ऊचुः ॥

त्वन्नो धाता विधाता च त्वं गतिर्विप्रसत्तम ॥ दैत्योद्भवान्मुनिश्रेष्ठ रक्ष नो महतो भयात् ॥१॥

दयां कुरुष्व देवेषु लोकानां च द्विजोत्तम ॥ कालेयभयविध्वस्तं त्रैल्लोक्यं सचराचरम् ॥२॥

तपसा धार्यते विप्र त्वयैवेदं मुनीश्वर ॥ पापकर्मरता विप्र कालेयाः पापकर्मिणः ॥३॥

समुद्रं दुर्गमाश्रित्य भक्षयन्त्यनिशं प्रजाः ॥ रात्रौ दिवा समुद्रस्थाः निर्भयाः सुखिनश्च ते ॥४॥

तैर्भक्ष्यमाणा विप्रेन्द्र क्षयं जग्मुः प्रजाः प्रभो ॥ कालेयभयभीतानामस्माकं शरणं भव ॥५॥

समुद्रसलिलान्याशु शोषयस्व हिताय नः ॥ तवैव शक्यं नान्यस्य समुद्रपरिशोषणम् ॥६॥

तस्मान्नो द्विजशार्दूल प्रसादं कुरु सुव्रत ॥ विश्वावतारिणो विप्र प्रभवन्ति भवद्विधाः ॥७॥

सूत उवाच ॥

इति तेषां वचः श्रुत्वा अगस्त्यो भगवानृषिः ॥ तथा करिष्य इत्युक्त्वा लोकानां हितकाम्यया ॥८॥

तैः सार्धमगमद्विप्रस्तपसा द्योतितप्रभः ॥ गन्धर्वयक्षसहितो मनुष्योरगसंयुतः ॥९॥

ऋषिभिः सहितो विप्रः ससार सरितां पतिम् ॥ त्रैलोक्यसहितः श्रीमानगस्त्यो वरुणालयम् ॥१०॥

पातुकामस्तदा राजन्निदं वचनमब्रवीत् ॥ पिबाम्यहं क्षणात् सर्वं समुद्रसलिलं सुराः ॥११॥

युष्माभिर्यदनुष्ठेयं तत्सर्वं सम्प्रधार्यताम् ॥ इत्युक्त्वा कुरुशार्दूल युगान्ताग्निसमप्रभः ॥१२॥

विदार्य वक्त्रकुहरं सर्वं जग्रास तज्जलम् ॥ शुष्ककाष्ठेऽग्निवद्राजन् वारुणीं वरुणालये ॥१३॥

तद्वक्त्राकर्षिता ह्यापः क्षणेन भरतर्षभ ॥ क्षयं जग्मुस्तदाम्भांसि अगस्त्यात्तेजसः सुत ॥१४॥

यथा वायुसहायोऽग्निः क्षिप्रं काष्ठं प्रदह्यति ॥ तथैव सर्वाण्यम्भांसि समुद्राणि च जग्धवान् ॥१५॥

तद्दृष्ट्वा सर्वभूतानि विस्मयात्तुष्टुवुर्मुनिम् ॥ स्तूयमानः स तैः सर्वैरगस्त्यो भगवानृषिः ॥१६॥

निस्तोयमर्णवं चक्रे सर्वलोकस्य पश्यतः ॥

---

## कालकेयवधः

ततः सुरास्तं प्रणिपत्य राजन्नगस्त्यमुत्सृज्य वरायुधानि ॥

धृत्वा प्रविश्यार्णवमादितोयान् दृष्ट्वाऽसुरान् जघ्नुरदीनसत्वान् ॥१७॥

तैर्हन्यमाना विबुधैः सुरारयो विनष्टसत्वा ह्यभवन् क्षणेन तु ॥

निशुम्भशुम्भौ सुरसर्वलोचनप्रकोपनौ तौ दितिजा नृपोत्तम ॥१८॥

अशीतिसाहस्रमहासुरौघा देवैर्हतास्ते न्यपतन् पयोनिधौ ॥
हतप्रवीराः प्रमदासहायाः पातालमेवं विविशुश्च शिष्टाः ॥ १९ ॥
ततो हत्वा कालकेयान् देवाः शक्रपुरोगमाः ॥ हृष्टाः सम्पूजयामासुरगस्त्यमृषिसत्तमम् ॥२०॥
ऋषिभिः सह राजेन्द्र सकिन्नरमहोरगाः ॥ यक्षगन्धर्वमनुजाः स्तुष्टुवुस्तमृषिं मुदा ॥२१॥

## पुनः समुद्रपूरणे अगस्त्यस्य अक्षमत्वम्

ततोऽब्रुवन् पुनस्तं वै ऋषिदेवगणाः प्रभो ॥ त्वत्प्रसादाद् द्विजश्रेष्ठ हतशत्रुः पुरन्दरः ॥२२॥
पालयिष्यति त्रैलोक्यं यथासृष्टं स्वयम्भुवा ॥ त्वत्प्रसादान्मुनिश्रेष्ठ निरुद्विग्ना वसामहे ॥२३॥
इमं समुद्रं निस्तोयं सर्वसत्वालयं मुने ॥ पूरयस्व पुनर्विप्र अम्भोभिर्वरुणालयम् ॥२४॥
इति तेषां वचः श्रुत्वा अगस्त्यो भगवानृषिः ॥ प्रहस्य स्वनवद्राजन्निदं वचनमब्रवीत् ॥२५॥
यन्मया पीतमधुना तोयं त्रिदशसत्तमाः ॥ काष्ठसञ्चयवच्चासीच्चित्रभानाविवार्पितम् ॥२६॥
भस्मावशेषमभवत् तद्धि जीर्णं मयि ध्रुवम् ॥ तस्मान्मयाम्बुना देवा न शक्यः पूरितुं पुनः ॥२७॥
चिन्त्यं युष्माभिरमराः समुद्रस्यास्य पूरणे ॥ उपायमन्यं पश्यध्वं न मया शक्यते सुराः ॥२८॥

## पुनः समुद्रपूरणे ब्रह्मणा उपाय सूचनम्

इति तद्वचनं श्रुत्वा देवासुरमहोरगाः ॥ जलाधिपं पुरस्कृत्य ब्रह्माणं शरणं ययुः ॥२९॥
ततः समेत्य ब्रह्माणमिदमूचुः सुरोत्तमाः ॥

देवा ऊचुः ॥

कथं समुद्रो भगवान् पुनः पूर्णो भविष्यति ॥३०॥
तत्पूरणे त्वं भगवन्नुपायं नो ब्रवीहि भो ॥ ततो ब्रह्मा जगत्स्वामी उपायं चाब्धिपूरणे ॥३१॥
ज्ञात्वा देवानुवाचेदं भविष्यत्कार्यगौरवात् ॥

ब्रह्मोवाच ॥

देवाः शृणुत मद्वाक्यं समुद्रस्यास्य पूरणे ॥३२॥
उपायं वो ब्रवीम्यद्य करोतु चाम्भसां निधिः ॥ पश्चिमाम्बुधितीरे तु गोकर्णं क्षेत्रमुत्तमम् ॥३३॥
आस्ते शिवप्रियकरं तत्र गत्वा चैवाम्भसां निधिः ॥ तपः करोतु नियतो लिङ्गं संस्थाप्य शाम्भवम् ॥३४॥
ततः शिवप्रसादेन तस्य पूर्तिर्भविष्यति ॥ इति ब्रह्मोदितं श्रुत्वा देवाश्चेन्द्रपुरोगमाः ॥३५॥

स्वस्थानं प्रययुः सर्वे तदा संहृष्टमानसाः ॥

## सागरेश्वरोत्पत्तिवर्णनम्

समुद्रोपि ततो गत्वा गोकर्णं क्षेत्रमुत्तमम् ॥३६॥

पापस्थाल्यास्तु सविधे ह्याग्नेय्यां दिशि पुत्रक ॥ कृत्वाऽश्रमपदं तत्र लिङ्गं संस्थाप्य शाम्भवम्
॥३७॥

तपश्चचार सुचिरं मौनी ध्यानपरायणः ॥ बद्धपद्मासनो नित्यं चिन्तयन् हृदि शङ्करम् ॥३८॥

एवं तपस्यतस्तस्य सागरस्य महात्मनः ॥ प्रसन्नः पार्वतीकान्तः पार्वत्या सह पार्थिव ॥३९॥

उवाच सागरं शम्भुर्वरं ब्रूहीति सादरम् ॥ ततश्चाम्भोनिधिर्ज्ञात्वा प्रसन्नं प्रार्वतीपतिम् ॥४०॥

स्तुत्वा स्तौत्रैर्बहुविधैर्नमस्कृत्येदमब्रवीत् ॥

समुद्र उवाच ॥

यदि तुष्टोसि देवेश वरदो भव मे प्रभो ॥४१॥

कालकेयाभिधा दैत्या मां प्रविश्य दिवा प्रभो ॥ रात्रौ च जघ्निरे लोकान् तन्नाशाय घटोद्भवः
॥४२॥

पीत्वा जलमशेषेण सञ्जीर्याऽऽस्ते यथा पुरा ॥ तस्मादहं शुष्कतनुर्जातोऽस्मि परमेश्वर ॥४३॥

यथा पूर्णशरीरोऽहं तथा कुरु जगत्पते ॥ इदं ममाश्रमं देव त्रैलोक्ये विश्रुतं भवेत् ॥४४॥

मया कृतमिदं तीर्थं लिङ्गं च सुरसत्तम ॥ सर्वाभीष्टकरं चास्तु जनानां त्वदनुग्रहात् ॥४५॥

इति सिन्धोर्वचः श्रुत्वा देवस्त्रिभुवनेश्वरः ॥ उवाच वचनं श्लक्ष्णं सागरं करुणाकरः ॥४६॥

शङ्कर उवाच ॥

भगीरथाह्वयो राजा सूर्यवंशसमुद्भवः ॥ स्वपितॄन् तारणार्थाय गङ्गामानेष्यति ध्रुवम् ॥४७॥

अचिराद्राजशर्दूलस्तदा पूर्णो भविष्यसि ॥ त्वया कृतमिदं तीर्थं लिङ्गं च सुमहद्विभो ॥४८॥

सागरेश्वरनाम्ना वै त्रैलोक्ये विश्रुतं भवेत् ॥ अत्रागत्य नरो यस्तु श्रावण्यां श्रवणर्क्षके ॥४९॥

स्नात्वा तीर्थे सुविमले सागरेशं प्रपूजयेत् ॥ तस्य स्वाभीप्सिता सिद्धिर्भवेदेव न संशयः ॥५०॥

इत्युक्त्वा भगवान् शम्भुस्तत्रैवान्तरधीयत ॥ सागरोपि वरं लब्ध्वा शङ्कराद्वाञ्छितं तदा ॥५१॥

स्वस्थानमगमद्विप्रा मुदा परमया युतः ॥ तीर्थं तत्सागरं राजन् शतशृङ्गिगिरेरधः ॥५२॥

ब्रह्मेश्वरात्प्रतीच्यां तु वर्तते पापनाशनम् ॥ तत्र स्नात्वा नरो भक्त्या विधिना राजसत्तम ॥५३॥

राजसूयफलं प्राप्य देहान्ते स्वर्गमाप्नुयात् ॥५४॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे सागरेश्वरवर्णनं नाम षोडशोऽध्यायः ॥१६॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १७ ॥  NEXT>>  श्लोक संख्या– ७३

## ॥ गोकर्णक्षेत्रवर्णने सगरकथा ॥

### सगरपुत्राणां दुर्गतिः

शतानीक उवाच ॥

कथं दीक्षामुपगतः सगरो नृपसत्तम ॥ कथं नष्टाश्च तत्पुत्राः कथं चोर्ध्वं गताश्च ते ॥१॥

कथं समुद्रः पूर्णोऽभूत् सूत नो वक्तुमर्हसि ॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि सगरस्य कथां शुभाम् ॥२॥

सगरो नृपशार्दूलः सूर्यवंशसमुद्भवः ॥ शशास सकलां पृथ्वीं सत्यधर्म इवापरः ॥३॥

वसिष्ठस्य स्वस्य गुरोराज्ञया नृपसत्तमः ॥ एकोनं च क्रतूनां वै शतं निर्विघ्नमाप सः ॥४॥

ततः शततमं कर्तुं दीक्षितः सगरो नृपः ॥ यागमण्टपमासाद्य वसिष्ठाद्यैः समन्वितः ॥५॥

मुमोच तुरगं दिव्यं लेखयित्वा तु पत्रिकाम् ॥ तद्रक्षार्थं न्ययुक्तासौ स्वपुत्रान् बलवत्तरान् ॥६॥

षष्ठिसाहस्रसंख्याकान् युद्धकर्मणि कोविदान् ॥ ततो नियक्ताः पुत्रास्ते तुरङ्गरक्षणोत्सुकाः ॥७॥

बभ्रमुः सकलान् लोकान् तुरङ्गं तमनुव्रताः ॥ एवं रक्षत्सु सर्वेषु तेष्वश्वं तु पुरन्दरः ॥८॥

अदृश्यरूपेण ततो विघ्नं कर्तुं च तत्क्रतोः ॥ जहार तुरगं दिव्यं यज्ञार्थमुपकल्पितम् ॥९॥

हृत्वा तमश्वं शक्रो वै पाताले कपिलाश्रमे ॥ स्थापयामास गूढात्मा यथास्थानमतिष्ठत ॥१०॥

ततः सगरपुत्रास्ते मृगयित्वा तु भूतलम् ॥ ततः स्वर्लोकमासाद्य मार्गयित्वा तु तत्र वै ॥११॥

तत्राप्यदृष्ट्वा तुरगं सह्यपादमुपागमन् ॥ चख्नतुश्च धरां सर्वे सागरास्ते महाबलाः ॥१२॥

नवधा भारतं वर्षं बलवीर्यसमन्विताः ॥ खनित्वा च धरां ते तु पातालं जग्मुरञ्जसा ॥१३॥

मृगयित्वा समन्तात्तु पातालं सगरात्मजाः ॥ ततश्च कापिलं गत्वा आश्रमं ते महाबलाः ॥१४॥

तत्र दृष्ट्वा तुरङ्गं ते कपिलं वै ह्यताडयन् ॥ रज्वा तं वै दृढं बध्वा चोरोयमिति वादिनः ॥१५॥

ततश्चोन्मील्य नयने ददर्श सगरात्मजान् ॥ कपिलो मुनिशार्दूलो बभूवुर्भस्मशेषिताः ॥१६॥
सर्वे षष्टिसहस्राणि कपिलान्नष्टतां गताः ॥ नष्टेषु सगरेष्वेवं तदानीमेव पुत्रक ॥१७॥
नारदो मुनिशार्दूलो भूलोकं प्राप्य सत्वरम् ॥ तद्वृत्तान्तं कथयितुं सगरालयमभ्यगात् ॥१८॥
दीक्षितः स तु राजेन्द्रो दृष्ट्वा देवर्षिमागतम् ॥ प्रत्युद्गम्याभिवाद्याथ आसनं चोपपाद्य च ॥१९॥
पाद्यार्घ्यादिभिरासीनं पूजयित्वा तपोनिधिम् ॥ अनामयं स पप्रच्छ लोके कुशलमेव च ॥२०॥
ततस्तु नारदः सर्वं कथयामास कौरव ॥ निधनं सगराणां च पशोरप्राप्तिमेव च ॥२१॥
कापिलं तेज आसाद्य विनष्टाः सगरा नृप ॥ अज्ञानिनस्तु पापिष्ठा लोकोपद्रवकारिणः ॥२२॥
क्षयं गतास्ते राजेन्द्र न चिन्तां कर्तुमर्हसि ॥ नष्टास्ते हि दुराचारा यद्भावि न तदन्यथा ॥२३॥
उक्तं रुद्रेण ददता वरं तव तदानघ ॥ उत्पत्तिश्चैव नाशश्च तेषां कर्म च सत्तम ॥२४॥
तस्मान्नष्टा विनाशेन न चिन्तां कर्तुमर्हसि ॥ इत्युक्त्वान्तर्दधे राजन् नारदो भगवानृषिः ॥२५॥
ततः स राजा सगरः श्रुत्वा मुनिमुखोद्गतम् ॥ संस्मृत्य रुद्रवचनमल्पशोको बभूव ह ॥२६॥

---

अंशुमन्तमथाहूय पौत्रमिक्ष्वाकुनन्दनः ॥ इदमाहार्तिसहितः सभामध्येऽतिलालयन् ॥२७॥
पिता च तव हे वत्स पुरा त्यक्तो मयाऽनघ ॥ अन्ये च बहवः शूराः पुत्रा मम महाबलाः ॥२८॥

नष्टास्ते युगपत् सर्वे कपिलाग्नौ पतङ्गवत् ॥ त्वया दायादवानस्मि नान्यास्ति मम सन्ततिः ॥२९॥
तत्साम्प्रतमितः पुत्र गत्वा कपिलसन्निधिम् ॥ तं प्रार्थयित्वा तुरगं शीघ्रमानय सुव्रत ॥३०॥
समाप्यैतत् ऋतुवरं राज्यं दास्यामि तेऽनघ ॥ तपः कर्तुमथेच्छामि तच्छीघ्रं सम्प्रधार्यताम् ॥३१॥

---

## असमञ्जकथा

शतानीक उवाच ॥

स्कन्द उवाच ॥

किमर्थमात्मजं पुत्रं त्यक्तवान् सगरो नृपः ॥ दुस्त्यजं केन दोषेण एतन्मे वक्तुमर्हसि ॥३२॥

सूतउवाच ॥

शङ्कर उवाच ॥

असमञ्ज इति ख्यातः पुत्रः शैव्यामजायत ॥ तं विवेशाशुभः कश्चित् पूर्ववैरमनुस्मरन् ॥३३॥

जन्मान्तरे स वैश्योऽभूद्बहुव्यापारकारकः ॥ स्वधर्मनिरतः सोऽथ दान्तो दाक्षिण्यवाञ्छुचिः ॥३४॥
कदाचिदखनद्भूमिं शौचार्थं देविकातटे ॥ तत्रापश्यन्निधिं स्फीतं यक्षरक्षासमन्वितम् ॥३५॥
दृष्ट्वा विस्मयमापन्नो गृहीतुं चोपचक्रमे ॥ ततस्तत्पालको यक्षो लुब्धको नाम पापकृत् ॥३६॥
भक्षार्थं हि पशून् देहि क्षुधार्तस्य ममानघ ॥ ततो गृहाण मद्दत्तं निधानमिति सोऽब्रवीत् ॥३७॥
दास्यामीति तमुक्त्वा तु तद्गृहीतं कुरूद्वह ॥ न दत्तस्तेन वैश्येन पशुर्विस्मृत्य दुर्धिया ॥३८॥
ततोऽसौ क्षुधयाविष्टो ह्यन्तर्भूतो तदा वने ॥ अन्तर्भूते तदा तस्मिन् पापकर्मणि लुब्धके ॥३९॥
वैश्यश्च स तु राजेन्द्र मृतः कालेन सत्तम ॥ व्यजायत पुनः सोऽथ शैव्यां सगरभूपतेः ॥४०॥
असमञ्ज इति ख्यात इक्ष्वाकोरन्वये ह्यभूत् ॥ तमाविवेश तद्भूतं बाल्ये क्रीडन्तमप्युत ॥४१॥
तेनाविष्टो महातेजा निर्घृणः समपद्यत ॥ ततो गृहीत्वा पृथुकान्नागराणां बलाद्बली ॥४२॥
नद्यां चिक्षेप बहुशः असमञ्जोऽतिपापधीः ॥ विदित्वा कर्म तस्याशु पौरा राज्ञे न्यवेदयन् ॥४३॥
तत्याज पुत्रं तच्छ्रुत्वा विषयान्ते महीपतिः ॥ त्यक्तः सोऽथ स्वपापेन क्षुधया पीडितस्तदा ॥४४॥
स्वानि मांसानि चोत्कृत्य भक्षयामास पुत्रक ॥ वने तस्मिन्महाभीमे मृतः सोप्यसमञ्जसः ॥४५॥

## सगरयज्ञसमाप्तिः तस्यान्वये भगीरथस्य जननम्

तस्य पुत्रो महातेजा अंशुमानिति विश्रुतः ॥ सोंशुमानेवमुक्तस्तु पितुः पितरमब्रवीत् ॥४६॥
तुरङ्गं ह्यानयिष्यामि विज्वरो भव पार्थिव ॥ इत्युक्त्वा प्रययौ शीघ्रं समुद्रं वरुणालयम् ॥४७॥
येन मार्गेण तेऽगच्छन् विदार्य च वसुन्धराम् ॥ तेन गत्वाऽसमञ्जस्य पुत्रः पुत्रवतां वरः ॥४८॥
ददर्श कपिलं तत्र प्रज्वलन्तं कृशानुवत् ॥ तमश्वं च नरव्याघ्रस्तस्य पार्श्वे स्थितं शुभम् ॥४९॥
भस्मीभूतान् पितॄंश्चैव यथावत् कुरुनन्दन ॥ अंशुमानभिगम्याथ कपिलं दीप्ततेजसम् ॥५०॥
ववन्दे शिरसा राजन्नंशुमान् स कृताञ्जलिः ॥ शरणं भव मे ब्रह्मन्नित्युवाचांशुमांस्तदा ॥५१॥
तमाह कपिलः प्रीतः वरं ब्रूहीति सादरम् ॥ दाताऽस्मि तन्महाप्राज्ञ यद्यत् प्रार्थयसे नृप ॥५२॥
ततोऽश्वं वरयामास पितॄणाञ्च गतिं तथा ॥ तच्छ्रुत्वा कपिलो योगी अंशुमन्तमभाषत ॥५३॥
गङ्गामानीय त्रिदिवाद्यः कश्चित् पुरुषोनघ ॥ प्लावयिष्यति तत्तोयैस्तदा पिण्डोदकक्रियाम् ॥५४॥
सम्प्राप्य ते दिवं यान्ति नान्यथेति तमब्रवीत् ॥ तस्माद्गच्छ गृहं पुत्र गृहीत्वाश्वं नरोत्तम ॥५५॥
समापय मखं तस्य सगरस्य महात्मनः ॥ अचिरं त्वं महाभाग पौत्रस्तव भविष्यति ॥५६॥
तेनैव तारिताः सर्वे स्वर्गं यास्यन्ति सागराः ॥ इति तस्य वचः श्रुत्वा अंशुमानपि भारत ॥५७॥

प्रणम्य तं तथेत्युक्त्वा जगाम स्वनिकेतनम् ॥ तत्द्वितीयेन राजेन्द्र सत्वरं समुपागमत् ॥५८॥
पितामहं महातेजा ववन्दे शिरसांशुमान् ॥ अश्वं निवेदयामास तेषां वृत्तान्तमप्युत ॥५९॥
दृष्ट्वा तमश्वं सगरः प्रीतिमानभवन्नृपः ॥ मूर्ध्नि चैनमुपाघ्राय प्रीतोस्मीत्याह तं गुरुः ॥६०॥
ततो यज्ञं महातेजा यथान्यायं समापयन् ॥ ततः सोऽवभृतस्नातः सऋत्विक् सपुरोहितः ॥६१॥
राज्येऽभिषिच्यांशुमन्तं तपसे धृतमानसः ॥ वनं जगाम राजासौ सगरः साधुसम्मतः ॥६२॥
अंशुमानपि तेजस्वी पालयामास मेदिनीम् ॥ ससमुद्रवनद्वीपां साम्राज्यमकरोद्वशी ॥६३॥
तस्य पुत्रो महानासीद्दिलीपो नाम विश्रुतः ॥ गुणैः सन्दीपयामास रोदसी भास्करो यथा ॥६४॥
अभिषिच्यांशुमान्राज्ये पुत्रं सर्वगुणान्वितम् ॥ दिलीपं गुणसम्पन्नं अंशुमानगमद्वनम् ॥६५॥
दिलीपोऽपि महातेजा अन्वशासद्यथा पिता ॥ तस्याप्यभून्महातेजाः पुत्रः पुत्रवतां वरः ॥६६॥
भगीरथ इति ख्यातस्त्रिषु लोकेषु पुत्रक ॥ सत्यवान् शीलसम्पन्नो गुणवान् ब्राह्मणप्रियः ॥६७॥
तेजसादित्यसङ्काशः क्षमया पृथिवीसमः ॥ पराक्रमे विष्णुसमः कोपेऽन्तकसमप्रभः ॥६८॥
श्रिया वैश्रवणः साक्षात् कन्दर्प इव मूर्तिमान् ॥ सर्वैर्गुणैरुपेतं तु दृष्ट्वा पुत्रं महारथम् ॥६९॥
आहूय पुत्रं राजेन्द्र इदं वचनमब्रवीत् ॥ शृणु मद्वचनं पुत्र अलंघ्यं गुरुभाषितम् ॥७०॥
अभिषेक्ष्यामि त्वां राज्ये रम्ये महति पुत्रक ॥ तपश्चर्तुमिहेच्छामि न विघ्नं कर्तुमर्हसि ॥७१॥
पितृणां तारणायैव अन्तर्भूतहितो नृप ॥ इत्युक्त्वा स नृपः पुत्रमभिषिच्य वनं ययौ ॥७२॥
गङ्गावतरणे यत्नं कृतवान् स महीपतिः ॥ तपसा पूजयन्नास्ते शङ्करं चोत्तमद्युतिः ॥७३॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे भगीरथोत्पत्तिवर्णनं नाम सप्तदशोऽध्यायः॥१७॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः १८ ॥ NEXT>> श्लोक संख्या– ५१

## ॥ गोकर्णक्षेत्रवर्णने–भगीरथेन गङ्गानयनं समुद्रपूरणं गोकर्णक्षेत्रनिमज्जनम् ॥

### भगीरथेन गङ्गानयनं

सूत उवाच ॥

शङ्कर उवाच ॥

भगीरथस्तदा पुत्र पालयामास मेदिनीम् ॥ पालयन्नपि राज्यं स निर्वेदमगमद्वशी ॥१॥

श्रुत्वा पितॄणां पतनं कपिलाग्नौ नृपोत्तम ॥ स्वर्गप्राप्तिं च भद्रन्ते श्रुत्वा दुःखमुपेयिवान् ॥२॥
दूयमानेन तु हृदा न सेहे विषयान् प्रियान् ॥ अमात्यप्रवरे राज्यं निधायेक्ष्वाकुनन्दनः ॥३॥
तपसे धृतसङ्कल्पो हिमवच्छिखरं ययौ ॥ तत्र गत्वा तपस्तेपे निराहारेण पार्थिवः ॥४॥
सहस्रवर्षं राजेन्द्र पितामहमपूजयत् ॥ ततस्तुष्टो जगत्स्रष्टा वरं ब्रूहीत्यभाषत ॥५॥
तच्छ्रुत्वा तु वरं वव्रे यथा तच्छृणु पार्थिव ॥ गङ्गामानीय देवेश तर्पयित्वा पितॄन् मम ॥६॥
सागरं प्रापयित्वा तां पितामह ततः परम् ॥ दशवर्षसहस्राणि राज्यं कृत्वा ततः परम् ॥७॥
अहं मरिष्ये भगवन् तथा तत्कर्तुमर्हसि ॥ तथास्त्विति तमुक्त्वा तु ह्यायुर्दत्वा पितामहः ॥८॥
साधयत्वित्युदाहृत्य तत्रैवादर्शनं गतः ॥ ततो वर्षसहस्राणि गङ्गामाराधयत् प्रभुः ॥९॥
पञ्चाग्निमध्यगो भूत्वा वाय्वम्बुकृतभोजनः ॥ ततो गङ्गा हैमवती तस्य प्रत्यक्षतां गता ॥१०॥
तमाह गङ्गा राजानं भगीरथमिदं वचः ॥ यथभिलषितं ब्रूहि राजन् तत्ते ददाम्यहम् ॥११॥
ततस्तु तरणं वव्रे गङ्गाया राजसत्तमः ॥ तथास्त्विति तमुक्त्वा सा पुनर्वचनमब्रवीत् ॥१२॥
पतन्त्या मम राजेन्द्र न वोढा वेगमस्ति भो ॥ ऋते रुद्रान्महादेवान्मां धर्ता कश्चिदप्यहो ॥१३॥
यदा प्रसन्नो भवति रुद्रस्तव नृपोत्तम ॥ तदा स्मर्तव्यमित्युक्त्वा तत्रैवान्तर्धदे सती ॥१४॥
ततो भगीरथो राजा कैलासं गिरिमाश्रितः ॥ पूजयामास च पुनः शिवं त्रिभुवनेश्वरम् ॥१५॥
सहस्रवर्षं राजेन्द्र शतमन्यच्च पुत्रक ॥ ततस्तुष्टो जगन्नाथस्तस्य प्रत्यक्षतां गतः ॥१६॥
वरं ब्रूहि महाराज दाताऽस्मि तव वाञ्छितम् ॥ ततः प्रणम्य शिरसा साम्बं त्रिभुवनेश्वरम् ॥१७॥
भगीरथो महाराजा कृताञ्जलिरभाषत ॥ गङ्गा त्रिपथगा देव त्रिदिवात् सम्पतिष्यति ॥१८॥
तां धारय महादेव शिरसा भूतभावन ॥ त्वदृते न हि कोऽप्यस्ति त्रिषु लोकेषु शङ्कर ॥१९॥
तथास्त्विति महाराजमुक्त्वा देवो महेश्वरः ॥ मेरुं गिरिवरं गत्वा स्थितः शैल इवापरः ॥२०॥
स्थितं दृष्ट्वा शूलपाणिं सस्माराकाशगां नृपः ॥ तस्य सा चिन्तितं ज्ञात्वा स्थितं दृष्ट्वा च शङ्करम् ॥२१॥
दिवः पपात सा गङ्गा मूर्ध्नि शम्भोर्महात्मनः ॥ महावेगा पुण्यजला देवगन्धर्वसेविता ॥२२॥
मीनग्राहवती देवी स्मृतमात्राघनाशिनी ॥ मूर्ध्नि शम्भोर्महादेवी माला मुक्ता महीयसी ॥२३॥
सेन्द्रादिदेवताः सर्वे विस्मिता ददृशुर्नृप ॥ ललाटदेशं सम्प्राप्य देवदेवस्य भामिनी ॥२४॥
बभ्राम तत्र तत्रैव जटामुकुटमण्डले ॥ पुनः प्रसादयामास नीलग्रीवं भगीरथः ॥ २५॥
ततः पुनर्हैमवती मेरुपृष्ठेऽपतन्नृप ॥ ततो विभज्य चात्मानं चतुर्धाऽघौघहारिणी ॥२६॥

पूर्वेण गत्वा भद्राश्वं दक्षिणेन तु भारतम् ॥ पश्चिमे केतुमालञ्च उत्तरे चोत्तरान् कुरून् ॥२७॥
गत्वा जगाम जलधिं पूरयामास तत् क्षणात् ॥ मेरुपृष्ठं समासाद्य गङ्गा राजानमब्रवीत् ॥२८॥
मार्गं दर्शय राजेन्द्र यत्कृते नयसे दिवः ॥ ततस्तथेति तामुक्त्वा दक्षिणां प्रस्थितो नृपः ॥२९॥
वर्षान् सीमाचलांश्चैव अतिक्रम्य सुरापगा ॥ हिमवन्तमनुप्राप्ता राज्ञा सार्धं महानदी ॥३०॥

---

जह्नुना गङ्गापानं विसर्गश्च

जह्नोराश्रममासाद्य राजा वचनमब्रवीत् ॥ उत्तिष्ठोत्तिष्ठ विप्रर्षे अपगच्छ इतो मुने ॥३१॥
याति गङ्गा हैमवती मार्गेणानेन सुव्रत ॥ वेगेनाकर्षते देवी मार्गे शैलशिलातळान् ॥३२॥
सवृक्षगुल्मन् तस्मात्त्वं दूरं गच्छ महामुने ॥ ततोऽतिवयसा वृद्धस्तपसा च दमेन च ॥३३॥
उवाच वचनं श्लक्ष्णं जह्नू राजानमप्युत ॥ वृद्धोहं राजशार्दूल न शक्नोमि च सर्पितुम् ॥३४॥
यद्भावि तद्भवेद्राजन्नित्युक्त्वा चाहसद्द्विजः ॥ ततः ससार तं देशं गङ्गा त्रिपथगा प्रभो ॥३५॥
गृहीत्वा तां मुनिश्रेष्ठो गण्डूषमत्रोत् प्रभुः ॥ राजन् गङ्गाजलं सर्वं तस्य गण्डूषतां गतम् ॥३६॥
अपिबत्तत्क्षणेनैव तदद्भुतमिवाभवत् ॥ पीत्वा तदङ्ग स मुनी राजानं प्रत्यभाषत ॥३७॥
क्व ते गङ्गा महाराज महावेगप्रवाहिनी ॥ इति तद्वचनं श्रुत्वा राजा राजीवलोचनः ॥३८॥
विस्मयोत्फुल्लनयनः क्षमस्वेति पुनः पुनः ॥ पादौ स तस्य राजेन्द्रो महर्षेर्भावितात्मनः ॥३९॥
प्रणिपत्य तपस्तेपे वर्षाणामयुतं प्रभुः ॥ तस्य शुश्रूषणपरस्तत्रैवास्ते भगीरथः ॥४०॥
एवं काले व्यतीते तु जह्नू राजानमब्रवीत् ॥ गच्छ राजन् यथाकामं गङ्गया सह सुव्रत ॥४१॥
दास्यामीति तमुक्त्वा तु मोचयामास जाह्नवीम् ॥ मुखतो मुखजा तस्य निष्क्रम्य सुरनन्दिनी
॥४२॥

---

जह्नुकन्या जगामाथ पुनस्तं पृथिवीपतिम् ॥ यत्र ते सागरा दग्धाः कपिलाग्नौ पुरा सुत ॥४३॥
तत्र गत्वा महाभागा प्लावयित्वा तु सागरान् ॥ समुद्रं पूरयामास क्षणेन भरतर्षभ ॥४४॥
पूर्यमाणे समुद्रे तु तत्तोयान्तर्हितोऽभवत् ।। गोकर्णः कुरुशर्दूल सहस्रपरिवत्सरम् ॥४५॥
उदकं समभूद्राजन् रामेण पुनरुद्धृतम् ॥ भार्गवेण महाभाग विष्णोरंशेन सत्तम ॥४६॥
ऋषिदेवमनुष्याणां हितकामेन सत्तम ॥ पुनः सृष्टमभूत्तेन पूर्ववत् कुरुनन्दन ॥४७॥
भगीरथोऽपि नृपतिस्तर्पयित्वा पितृन् स्वकान् ॥ कर्षयामास वै गङ्गां दुहितृत्वे नृपोत्तमः ॥४८॥
ततः प्रभृति राजेन्द्र गङ्गा भागीरथी ह्यभूत् ॥ पुनर्दशसहस्राणि वर्षाणि स भगीरथः ॥४९॥

राज्यं चकार धर्मेण दिवि देवपतिर्यथा ॥५०॥
इमां पवित्रां सकलाघहारिणीं समुद्रपूर्तान् शृणुयान्मनुष्यः ॥
सम्पूर्णकामो लभते हि सम्पदं भुक्त्वेह भोगाञ्छिवलोकमेति ॥५१॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे गङ्गानयनं समुद्रपूरणं नाम अष्टादशोऽध्यायः॥१८॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १९ ॥  NEXT>>  श्लोक संख्या– ७३

## ॥ गोकर्णक्षेत्रस्य पुनरुद्धारः– जामदग्न्येश्वर(आदिगोकर्णेश्वर)वर्णनम् ॥

### परशुरामेण गोकर्णक्षेत्रस्य पुनरुद्धारः

शतानीक उवाच ॥

व्यासशिष्य महाप्राज्ञ पुराणार्थविशारद ॥ श्रुत्वा शर्वेरितं वाक्यं पुनः किं पृष्टवान् गुरुः ॥१॥
शृणु राजन् प्रवक्ष्यामि तत्कथां कुरुसत्तम ॥

कुमार उवाच ॥

त्वन्मुखाद्देवदेवेश श्रुतं सागरपूरणम् ॥२॥
गोकर्णस्य च उद्धारं विस्तराद्वक्तुमर्हसि ॥ षण्मुखेनैवमुक्तस्तु रुद्रः कुरुकुलोद्भव ॥३॥
तत्कथां चोक्तवान् शम्भुः कुमाराय महीपते ॥ शृणु पुत्र प्रवक्ष्यामि गोकर्णस्य पुनर्भवम् ॥४॥
विस्तरेण महाभाग सावधानमना भव ॥ समुद्रमध्ये षड्वक्त्र मग्नं तद्योजनद्वयम् ॥५॥
त्रियोजनात्तु सह्याद्रेः पश्चिमे कुरुसत्तम ॥ शतशृङ्गस्य तच्छृङ्गं दृश्यते लवणार्णवे ॥६॥
ततश्चिन्तापरा भूत्वा देवा ऋषिगणैः सह ॥ ब्रह्माणं शरणं गत्वा प्रणेमुः कुरुनन्दन ॥७॥
गोकर्णनिलया राजन् प्रणिपत्येदमब्रुवन् ॥ त्वन्नो धाता विधाता च लोकानां प्रपितामहः ॥८॥
शरणं त्वां प्रपन्ना स्मः पाह्यस्मान् भक्तवत्सल ॥ क्षेत्राणामुत्तमं देव गोकर्णं सुरपूजितम् ॥९॥
स्थानानि देवतानाञ्च ऋषीणां चैव सन्ति हि ॥ तत्क्षेत्रं सम्प्रति विभो मग्नमस्ति सरित्पतौ ॥१०॥
शतशृङ्गस्य शिखरं दृश्यते किञ्चिदम्भसि ॥ तव प्रसादाद्देवेश क्षेत्रेऽस्मिन् सुखिनो वयम् ॥११॥
वसन्तः सिद्धिमिच्छामो मग्नमस्ति तदम्भसि ॥ तदुद्धारेण भगवन् प्रसादं कर्तुमर्हसि ॥१२॥
ततस्तेषां वचः श्रुत्वा ब्रह्मा लोकपितामहः ॥ ध्यानेनालोक्य तत्सर्वं ध्यात्वा तानिदमब्रवीत् ॥१३॥

सह्यं शिखरिणां श्रेष्ठं गच्छध्वमविलम्बितम् ॥ तत्र गत्वा निवासञ्च कृत्वासध्वं तपोधनाः ॥१४॥
जामदग्न्यस्य रामस्य दीक्षामुपगतस्य तु ॥ ऋतुः समाप्यते यावत्तावत्तत्र प्रतीक्षत ॥१५॥
विश्वजिन्नाम भद्रंते ऋतुस्तत्र प्रवर्तते ॥ तदन्ते दास्यति विभुः सशैलवनकाननाम् ॥१६॥
महीं सर्वस्वमपि च ऋते तं शैलमुत्तमम् ॥ आत्मनस्तु निवासार्थं महेन्द्रं नाम विश्रुतम् ॥१७॥
यत्किञ्चिद्विद्यतेऽन्यत्र कश्यपाय स दास्यति ॥ तदा यूयं कश्यपेन सह सम्मन्त्र्य सत्तमाः ॥१८॥
वरं याचध्वममरा गोकर्णोद्धारणाय हि ॥ युष्माभिरर्थितः सोऽथ करिष्यति हिताय वः ॥१९॥
अशक्यमन्येन च तत् कर्तुं चिन्तितुमेव वा ॥ प्रचेतसः पुनः प्राप्तुं शक्यं नान्येन केनचित् ॥२०॥
स हि शक्तो जगत्रातुं विष्णोरंशः प्रतापवान् ॥ इति तद्वचनं श्रुत्वा देवगन्धर्वदानवाः ॥२१॥
ऋषयश्च महाभागा सकिन्नरमहोरगाः ॥ मनुष्याः पक्षिणश्चैव सह्याद्रिं प्रतिपेदिरे ॥२२॥
तावत् प्रतीक्ष्य ऋषयो गोकर्णनिलयाः प्रभो ॥ ततः समापयामास जामदग्न्यो महाक्रतुम् ॥२३॥
सर्वस्वं राज्यमपि च ब्राह्मणेभ्यः प्रदत्तवान् ॥ भूमिमाहूय राजेन्द्र कन्यारूपधरां प्रभुः ॥२४॥
अलङ्कृत्य यथान्यायं कश्यपाय न्यवेदयत् ॥ ततो गृहीत्वा तां विप्रो दुहितृत्वे ह्यकल्पयत् ॥२५॥
ततः प्रभृति सा देवी काश्यपीति प्रथां गता ॥ एतस्मिन्नेव काले तु तृणाग्निप्रमुखा द्विजाः ॥२६॥
गोकर्णनिलयाः पुत्र राममभ्याययुस्तदा ॥ कृताभिषेकं रामं तं कृतकौतुकमङ्गलम् ॥२७॥
ऋत्विग्भिः सहितं राजन् सदस्यैरभिसंवृतम् ॥ आशीर्भिर्वर्धयामासुर्मुनयो भृगुनन्दनम् ॥२८॥
ततस्तान् पूजयामास भार्गवोऽर्घ्यादिभिर्नृप ॥ पूजितास्तेन ते विप्राः सुखासीनं वचोऽब्रुवन् ॥२९॥
रामं शस्त्रभृतां श्रेष्ठं काश्यपस्य मतं तदा ॥ अर्थिनस्त्वां वयं राम निबोध भृगुनन्दन ॥३०॥
दातासि त्वं महाभाग यद्यदिच्छति तत्तथा ॥ तदस्माकं वरं वीर देहि त्वं भृगुनन्दन ॥३१॥
तच्छ्रुत्वा भार्गवो रामस्तान् प्रणम्येदमब्रवीत् ॥ किमिच्छत महाभागा ब्रूत किं करवाणि वः ॥३२॥
सर्वस्वं वा द्विजश्रेष्ठाः शरीरमथवापि वा ॥ इति रामवचः श्रुत्वा प्रहृष्टा मुनयोऽब्रुवन् ॥३३॥
प्रतिपूज्य महाभागं स्वस्ति ते स्वस्ति कौरव ॥ श्रूयतां मुनिशार्दूल एतेषामर्थ्यमप्युत ॥३४॥
गोकर्णमिति विख्यातं सिद्धिक्षेत्रं द्विजोत्तम ॥ तत्सागरैः क्रूरतरैः खनद्भिर्भूतलं द्विज ॥३५॥
समुद्रे पश्चिमे क्षिप्तमधस्ताद्योजनद्वयम् ॥ तदुद्धारमिहेच्छन्ति त्वया कृतमरिन्दम ॥३६॥
न शक्यमन्येन विभो प्राप्तुं तद्यादसां पतेः ॥ तस्मादुद्धृत्य गोकर्णमेभ्यो देहि भृगूद्वह् ॥३७॥
इति तद्वचनं श्रुत्वा रामोऽगात् सरितां पतिम् ॥ सह विप्रैः सदस्यैश्च काश्यपेन च कौरव ॥३८॥
आसाद्याम्भोनिधिं वीर इदं वचनमब्रवीत् ॥ प्रणम्य वरुणं रामो दर्शयस्वेत्ययाचत ॥३९॥

त्वद्दर्शनमिहेच्छामि सहैभिर्मुनिपुङ्गवैः ॥ इत्युक्तस्तेन वरुणो न किञ्चित् प्रत्यभाषत ॥४०॥
ततश्चुकोप भगवान् रामः शस्त्रभृतां वरः ॥ क्रोधाग्निना स जज्वाल दिधक्षुर्वरुणालयम् ॥४१॥
आग्नेयमस्त्रं धनुषि सन्धायाकर्षयद्बलात् ॥ ततस्तमाह वरुणः प्रत्यक्षीकृत्य भार्गवम् ॥४२॥
रक्षस्व मां महाभाग निरागसमरिन्दम ॥ किमर्थं मां प्रति विभो क्रुद्धस्त्वं भृगुनन्दन ॥४३॥
तदा तस्य वचः श्रुत्वा रामो वचनमब्रवीत् ॥ गोकर्णं नाम जलधे सिद्धिक्षेत्रमनुत्तमम् ॥४४॥
क्षिप्तं तत्त्वयि चाम्भोधे पापिष्ठैः सगरात्मजैः ॥ पुनस्तत्प्राप्तिमिच्छन्ति त्वत्तोऽस्मिन्निलया द्विजाः ॥४५॥
तदेषां पूर्ववद्देव देहि कोपं त्यजाम्यहम् ॥ तत्तथेत्यब्रवीद्राजन् वरुणो यादसाम्पतिः ॥४६॥
यावदिच्छसि वै प्राप्तुं तावद्देशं ददाम्यहम् ॥ संहरास्त्रं महाभाग आग्नेयं भृगुनन्दन ॥४७॥
यावद्भूमिं प्राप्तुमिच्छा तावत् सीमां कुरुष्व भो ॥ तदेव सीमा भवतु मम राम तवाज्ञया ॥४८॥
इत्युक्तो भृगुशर्दूलो वरुणेन महात्मना ॥ ततः संहारमकरोदाग्नेयास्त्रस्य भार्गवः ॥४९॥
स्रुवं गृहीत्वा चिक्षेप सीमार्थी वरुणालये ॥ ततस्तु द्विशतं गत्वा योजनानां पपात ह ॥५०॥
दक्षिणादुत्तरं गत्वा शूर्पाकारेण तत्स्रुवम् ॥ तत्याज तावद्वरुणः स्रुवाक्षेपान्महाबलः ॥५१॥
भीत्या रामस्य भगवान् भुवं त्यक्त्वाम्बसां निधिः ॥ ददौ रामाय सम्प्रीत्या स्वयमासीन्निरामयः ॥५२॥
उद्धृत्य तन्महाक्षेत्रं समुद्रान्मकरालयात् ॥ गोकर्णं पूर्ववद्राजन् ब्राह्मणेभ्यः प्रदत्तवान् ॥५३॥

## जामदग्न्येश्वर(आदिगोकर्णेश्वर)

ततो रामः प्रसन्नात्मा सर्वैरृषिगणैर्वृतः ॥ मुनिभिः सहितो राजन् प्राप गोकर्णमुत्तमम् ॥५४॥
ततो दृष्ट्वा महाक्षेत्रं सर्वलिङ्गमयं सुत ॥ शिवरूपं स गोकर्णं रामो भार्गवनन्दनः ॥५५॥
रुद्रयोनौ स्वयं तत्र लिङ्गं संस्थाप्य शाम्भवम् ॥ जामदग्न्येश्वरं नाम सर्वाभीष्टप्रदं नृणाम् ॥५६॥
सम्पूज्य विधिवद्भक्त्या तुष्टाव परमेश्वरम् ॥ नमस्ते पार्वतीकान्त नमस्ते कालनाशन ॥५७॥
नमस्ते कामदहन शरणागतपालक ॥ नमस्ते करुणासिन्धो घोरादज्ञानसागरात् ॥५८॥
इति स्तुत्वा भृगुसुतो लिङ्गस्य परितो गुह ॥ ननाम दण्डवद्भूमौ रामो भक्त्या महेश्वरम् ॥५९॥
ततः प्रसन्नो भगवान् शङ्करो भक्तवत्सलः ॥ उत्थाप्य भार्गवं दोर्भ्यां इदं वचनमब्रवीत् ॥६०॥

शङ्कर उवाच ॥

राम राम महाभाग त्वया क्षेत्रं समुद्धृतम् ॥ सिन्धोः पुनर्महाभाग गोकर्णं सुरपूजितम् ॥६१॥
लिङ्गं संस्थापितं ह्यत्र रुद्रयोनौ भृगूद्वह ॥ तस्मात्त्वयि महास्नेहः सञ्जातो मम सम्प्रति ॥६२॥
वरं वरय भद्रन्ते तवाभिलषितं वरम् ॥ तद्ददाम्यविलम्बेन यद्यपि स्यात् सुदुर्लभम् ॥६३॥

॥ राम उवाच ॥

वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥ लिङ्गमेतत् सुरश्रेष्ठ त्रैलोक्ये पूज्यतां लभेत् ॥६४॥
येऽत्र प्राप्य नरः स्नात्वा लिङ्गे त्वामर्चयन्ति वै ॥ तेषामभीप्सितं भूयात्त्वत्प्रसादात् महेश्वर ॥६५॥
पश्चान्मोक्षं देहि शम्भो यदि तुष्टोसि शङ्कर ॥ भार्गवस्य वचः श्रुत्वा भगवान् वाक्यमब्रवीत् ॥६६॥
वैशाखे मासि पौर्णम्यां अत्रागत्य नरोत्तमः ॥ तीर्थे तु विधिवत् स्नात्वा त्वल्लिङ्गं पूजयिष्यति ॥६७॥
शक्तिपञ्चाक्षरीं विद्यां अष्टोत्तरसहस्रकम् ॥ यो जपेद्विधिना राम तस्य मुक्तिर्भवेद्ध्रुवम् ॥६८॥
महापातकयुक्तो वा संयुक्तोप्युपपतकैः ॥ अत्र पञ्चाक्षरीं जप्त्वा सद्यो मुक्तो भवेद्ध्रुवम् ॥६९॥
इति दत्वा वरं तस्मै भार्गवाय महेश्वरः ॥ तत्रैवान्तर्दधे लिङ्गे शङ्करो भक्तवत्सलः ॥७०॥
रामोऽपि तत्क्षेत्रवरं सिन्धोरुद्धृत्य पार्थिव ॥ प्रशशंस स गोकर्णं दृष्ट्वा क्षेत्रं महोदयम् ॥७१॥
अस्मान्महेन्द्रशिखरं यथापूर्वमतिष्ठत ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥७२॥
शृण्वन्ति ये भक्तियुता नरोत्तमा रामेण राजन् पुनरुद्धृतं त्विदम् ॥
गोकर्णमाख्यानमघौघनाशनं ते यान्ति निर्वाणमनन्यलभ्यम् ॥७३॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे पुनरुद्धारजामदग्न्येश्वरवर्णनं नाम एकोनविंशोऽध्यायः ॥१९॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः २० ॥ NEXT>> श्लोक संख्या– ५७

## ॥ त्रिमूर्त्यभेदकथनम् ॥

स्वपुत्रं प्रति शिवेन त्रिमूर्त्यभेदकथनम्

॥ कुमार उवाच ॥

इदं मे संशयं तात सुचिरं मयि वर्तते ॥ श्रोतव्यं च मया देव तद्ब्रूहि परमेश्वर ॥१॥

भवानेकः समस्तेषु लोकेषु परिवर्तते ॥ तत्किमर्थं सुरश्रेष्ठ ज्ञानिनः कुर्वते पृथक् ॥२॥
विष्णुरेकः प्रभुर्लोके भूतभव्यभविष्यकृत् ॥ जगदादिरनादिश्च स एव सदसत्परः ॥३॥
इति वै ज्ञानिनः केचिद्वदन्ति पुरुषोत्तम ॥ ब्रह्मा जगत्पतिः साक्षान्नान्योऽस्तीत्यपरे विदुः ॥४॥
स कर्ता च विकर्ता च लोकानां प्रभुरव्ययः ॥ आदौ ब्रह्मा तथा मध्ये अन्त्ये ब्रह्मा च शाश्वतः ॥५॥
इति केचित् सुरश्रेष्ठ वदन्ति वदतां वर ॥ शिव एव प्रभुर्लोके भूतभव्यभविष्यकृत् ॥६॥
जगदादिरनादिश्च स एव सदसत्परः ॥ नान्यच्च दैवतं लोके शिवादित्यपरे विदुः ॥७॥
इति त्रिधानुवर्तन्ते ज्ञानिनोऽज्ञानिनस्तथा ॥ तेषां विवदतां लोके श्रुत्वा मे संशयो महान् ॥८॥
तेषां वाक्यं गुरो सत्यमसत्यमपि वा उत ॥ यथा मे संशयस्तात निरस्यति जगत्प्रभो ॥९॥
तथा त्वं ब्रूहि भगवन् श्रोतव्यं यदि मे गुरो ॥ तच्छ्रुत्वा वचनं तस्य स्कन्दस्य परमेश्वरः ॥१०॥
कुमाराय तदा देवः कथयामास विस्तारात् ॥

शङ्कर उवाच ॥

एतद्गुह्यं परं पुत्र न वक्तव्यं कथञ्चन ॥११॥
पुत्रस्त्वं मे सुरश्रेष्ठ शिष्यस्त्वं ज्ञानकोविदः ॥ तस्माद्वक्ष्यामि ते पुत्र यत् ज्ञात्वा सिद्धिमाप्नुयात् ॥१२॥
सत्वं रजस्तम इति गुणाः संज्ञाधिकारिणः ॥ वेदानां वेद्यभागश्च एकमूर्तिर्न संशयः ॥१३॥
वातः पित्तं श्लेष्म इति त्रिधा देहस्य संस्थितिः ॥ संज्ञास्त्रिधानुवर्तन्ते एकस्मिन्नेव देहके ॥ १४॥
धातवो बहवः पुत्र वर्तन्तेऽत्र शरीरके ॥ संज्ञाः पृथक्प्रवर्तन्ते तेषु धातुषु पुत्रक ॥१५॥
पञ्चेन्द्रियाणि वर्तन्ते पञ्चभूतानि पुत्रक ॥ एकं शरीरं बहुधा संज्ञा भेदात्प्रवर्तते ॥१६॥
तथा पुत्र प्रवर्तन्ते ममाप्येवं न संशयः ॥ वातपित्तकफाः पुत्र शरीरस्थितयो मताः ॥१७॥
एकनाशे हि तत्क्षेत्रं विनाशमधिगच्छति ॥ एकोद्रेकेऽपि वै पुत्र बाधामुपगमिष्यति ॥१८॥
समत्वे वर्तते यावत्तावत्तात शरीरकम् ॥ वैद्याः पित्तप्रशमनाद्गुणान् शंसन्ति पैत्तिकान् ॥१९॥
तथा श्लेष्मप्रशमनाद्गुणान् शंसन्ति श्लेष्मजान् ॥ तथा वातप्रशमनाद्गुणं शंसन्ति वातजान् ॥२०॥
ये त्रिधा तु गुणान् विद्युस्ते वैद्या नात्र संशयः ॥ सात्विकं राजसं चैव तामसं च त्रिधा जगत् ॥२१॥
सर्वमेतत् सुरश्रेष्ठ मच्छरीरे प्रवर्तते ॥ संज्ञाया भेदमिच्छन्ति न मूर्तेर्भेद उच्यते ॥२२॥

ब्रह्मविष्णुशिवाख्या हि संज्ञा मम न संशयः ॥ संज्ञा यथा मदीयास्तास्तथा विष्णोरपि प्रभो ॥२३॥
ब्रह्मणश्च तथा ते वै संज्ञा प्रोक्ता मनीषीभिः ॥ वातपित्तश्लेष्मवेद्या भिषजस्ते यथा सुत ॥२४॥
तथा ते ज्ञानिनः पुत्र ब्रह्मविष्णुशिवात्मकाः ॥ एतद्गुणोपशमनात्ते वैद्या नात्र संशयः ॥२५॥
तथैव मद्धातुभवान् देवान् यजतु पुत्रक ॥ वातपित्तकफोद्भूता धातवस्ते शरीरिणः ॥२६॥
तथा भूताः प्रवर्तन्ते त्रिधा मय्यपि पुत्रक ॥ गुणत्रयविभागेन संज्ञा भेदेन च प्रभो ॥२७॥
ब्रह्मा विष्णुः शिवश्चेति यजन्ते ज्ञानिनो हि ते ॥ यथाज्ञानं तथासिद्धिः यथाज्ञानं तथापि सत्
॥२८॥
असत्सिध्या सुरश्रेष्ठ ह्यधः सम्परिवर्तते ॥ यथा निद्राविरहितं भेषजं व्याधिवर्धनम् ॥ २९॥
एकमूर्तौ त्रिधा संज्ञा लोके सम्परिवर्तते ॥ बहुधा च पुनः संज्ञा शरीरावयवेऽपि च ॥ ।३०॥
तेषां ये संज्ञया पुत्र भजन्ते तेऽल्पबुद्धयः ॥ तेषामपि हि संसिद्धिर्भवेन्मद्याजिनो हि ते ॥३१॥
यदा कर्म क्षयं प्राप्य निर्मलत्वमुपेष्यति ॥ वचनाल्लेपनात् पेषात् शोषणादुदकादपि ॥३२॥
निर्मलत्वमुपेष्यन्ति कर्तुरुत्साहतः पटाः ॥ तथा सिद्धा भविष्यन्ति क्षेत्रादाचार्यसंश्रयात् ॥३३॥
ज्ञानात् पुराणदृष्ट्या च सतां वै सङ्गमेन च ॥ शुश्रूषणाद्गुरोः पुत्र सिद्धिं प्राप्यन्ति वै क्रमात् ॥३३॥
ब्रह्मा विष्णुः शिवश्चेति एक एव न संशयः ॥ वातपित्तकफैर्यद्वत् शरीरग्रहणं सुत ॥ ३४ ॥
यदा चात्मनि पश्यन्ति एकमूर्तिं त्रिसंज्ञिकाम् ॥ तदा स मुक्तः पुरुषः अभेदान्मुक्तिरुच्यते ॥३५॥
भेदो याववेत् पुत्र तावन्मुक्तिं न गच्छति ॥ भेदबुध्या प्रवर्तन्ते यावत् पुत्र सुरादयः ॥ ३६॥
तावत्कालं प्रवर्तन्ते पुनरावृत्तिलक्षणाः ॥ अभेदमात्मनो ज्ञात्वा तदा मुक्तो न संशयः ॥ ३७॥
वातश्लेष्मशरीरेषु न पित्तं न कफः प्रभो ॥ इति ये वै कीर्तयन्ति तेषां वागनृतं भवेत् ॥ ३८॥
तथा पित्तं तथा श्लेष्मं तथा वातं हि पुत्रक ॥ समानं ये प्रपश्यन्ति ते सतो नात्र संशयः ॥३९॥
शिवः प्रधानो भूतानां न ब्रह्मा न च केशवः ॥ इति ये वै प्रपश्यन्ति न ते ज्ञानस्य गोचराः ॥४०॥

मन्निन्दया ये यजन्ति विष्णुं त्रिभुवनेश्वरम् ॥ न ते मुक्तिं गमिष्यन्ति संसाराब्धौ पतन्ति वै
॥४१॥
अवज्ञया चावयोस्तु ब्रह्माणं ये यजन्ति च ॥ न ते ज्ञानस्य विषये वर्तन्ते सुचिरं सुत ॥४२॥
ॐ इत्येकाक्षरं पुत्र त्रीण्यासन्नक्षराणि वै ॥ अकारश्च तथोकरौ मकारश्चेति संज्ञिताः ॥४३॥
एकत्वं तु यदा प्राप्तास्तदा तत्प्रणवं विदुः ॥ पृथक् ते भिन्ननामानो न चोंकारो भविष्यति ॥४४॥

प्रणवोत्पादने पुत्र नालमेको भविष्यति ॥ तत्तद्गुणात् स्वयम्भूता ब्रह्मविष्णुमहेश्वराः ॥४५॥
भिन्ना न शक्ता दातुं ते मुक्तिं वै कुक्कुटध्वज ॥ भिन्नबुध्या यजन्ते तान् भक्तिभावेन ये गुह ॥४६॥
तेषामल्पतरा सिद्धिः पुनरावृत्तिलक्षणा ॥ न तां सिद्धिं वदन्त्यार्या ज्ञानिनस्तत्वदर्शिनः ॥ ४७॥
अज्ञानिनो हि तां सिद्धिमवगच्छन्ति पुत्रक ॥ गत्वा गत्वा निवर्तन्ते भुक्त्वा भुक्त्वा च भुञ्जते ॥४८॥
भूवा भूत्वा भविष्यन्ति दुःखानामाकरा हि ते ॥ तस्मात् शुद्धप्रभावेण ह्यद्वैतं भावयेद्बुधः ॥ ४९॥
यदा समत्वबुद्धिः स्यात् तदा सिद्धो न संशयः ॥ तदप्राप्यमबुद्धानां संज्ञयैव सुभेदिनाम् ॥५०॥
ब्रह्मा विष्णुः शिवाख्या हि मम संज्ञा न संशयः ॥ अहमेकस्त्रिधा लोके ब्रह्मविष्णुशिवाख्यया ॥५१॥
संज्ञया भिन्नबुद्धीनां भविष्यामि न योगिनाम् ॥ अज्ञानिनां सुरश्रेष्ठ मूर्तिभेदो न योगिनाम् ॥ ५२॥
कार्यं कर्ता क्रिया चेति सिद्धेः साधनमुच्यते ॥ ब्रह्मा विष्णुः शिवश्चेति सिद्धेः परमसाधनाः ॥५३॥

अहमेवजगत्सर्वं नान्योऽस्तीति यदा सुत ॥ मन्यते यो द्विजो लोके तदा सिद्धः स उच्यते ॥५४॥
स एव विष्णुर्ब्रह्मा च शिवः साक्षात् स एव च ॥

---

## मार्कण्डेयकथोपक्रमः

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥ ५५॥
तत्तेहं सम्प्रवक्ष्यामि श्रृणुष्वैकमना गुह ॥ ५६॥
आख्यानमेतद्भुवि ये पठन्ति शृण्वन्त्यभेदं परमेश्वराणाम् ॥
ते ज्ञानमासाद्य महानुभावा यास्यन्ति ते पुत्र कलेवरान्ते ॥५७॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे त्रिमूर्त्यभेदकथनं–नाम विंशोऽध्यायः ॥२०॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः २१ ॥  NEXT>>  श्लोक संख्या–६७

## ॥ मार्कण्डेयकथायां–मार्कण्डेयजननम् तस्य तपोवर्णनं च ॥

शङ्कर उवाच ॥

भृगोः ख्यात्यां समुत्पन्नो मृकण्डुर्नाम वै मुनिः ॥ सुमित्रा नाम तस्यासीद्भार्या परमशोभना ॥१॥

तस्यां जज्ञे महातेजा ऋषिः परमधार्मिकः ॥ मार्कण्डेय इति ख्यातः कृशानुसदृशप्रभः ॥२॥

तं दृष्ट्वा सुमुखावास्तां पितरौ परया मुदा ॥ तद्बान्धवास्तदा चान्ये हृष्टा चासन्महर्षयः ॥३॥

एवं समुदिते काले वागुवाचाशरीरिणी ॥ मृकण्डो तव पुत्रोऽयं षोडशाब्दे मरिष्यति ॥४॥

इति श्रुत्वा तदा वाक्यं दुःखितोऽसौ बभूव ह ॥ दुःखेन चक्रतुस्तस्य जातकर्मादिकाः क्रियाः ॥५॥

काले गुरुगृहं नीतः पित्रा तेन महात्मना ॥ तस्मिन् गुरुकुले तात शुश्रूषा परमोऽभवत् ॥६॥

गुरोः प्रसादाद्वेदानां पारगः सम्बभूव ह ॥ सर्वविद्यासु निष्णातः स्वगृहं पुनरागतः ॥७॥

पित्रोः पादौ नमस्कृत्य प्राञ्जलिश्चाग्रतः स्थितः ॥ द्वादशाब्दगतं पुत्रं आगतं स्वगृहं पुनः ॥८॥

दृष्ट्वाङ्गं नन्दतुः पुत्रं सर्वज्ञं मुनिदम्पती ॥ दुःखाश्रुभिन्नहृदयौ सस्वजाते पुनः पुनः ॥९॥

ततोऽब्रवीत् तौ पितरौ दुःखितौ द्विजसत्तमः ॥

मार्कण्डेय उवाच ॥

हर्षकाले किमर्थं वै दुःखमत्यद्भुतं पितः ॥१०॥

श्रुतविद्यं किमर्थं मां तप्यसे मातरीदृशम् ॥ दुःखं युवां महाभागौ श्रोतुमिच्छामि तत्वतः ॥११॥

श्रोतव्यं यदि मे तात ब्रूहि किं कारणं तव ॥

मृकण्डुरुवाच ॥

त्वयि जाते मुदा वत्स माता तव तपस्विनी ॥१२॥

सुमुखे त्वन्मुखेन्दौ सा दृष्टिमुन्मील्य सूतके ॥ मामाह पुत्र ते माता पुत्रो जातस्तवेति वै ॥१३॥

ततोहं तत्कुटिं गत्वा तव वक्त्राम्बुजं सुत ॥ दृष्टवानस्मि भद्रन्ते जातकर्मक्रियापरः ॥१४॥

आवयोरधिका दृष्टिस्त्वयि जाते तदाऽभवत् ॥ ततोऽन्तरिक्षे वागुच्चैरशरीराऽब्रवीच्च माम् ॥१५॥

मृकण्डो तव पुत्रोयं षोडशाब्दे मरिष्यति ॥ तच्छ्रुत्वा हृदि विद्धोहं वज्रेणेव सुदुःखितः ॥१६॥

इदानीं द्वादशसमा वर्तन्ते तव वै सुत ॥ तदनुस्मृत्य ते माता दुःखशोकवशं गता ॥१७॥
अहं चाप्यभवं पुत्र दुःखोपहतचेतनः ॥ एतं नौ कारणं पुत्र दुःखस्योक्तं तवानघ ॥१८॥
मार्कण्डेयः पितुर्वाक्यं श्रुत्वा तौ प्रणिपत्य सः ॥ प्राञ्जलिः पुरतः स्थित्वा तदा प्राह महामतिः॥१९॥

मार्कण्डेय उवाच ॥

दुःखं ते व्यपनेष्यामि तथा मातुर्न संशयः ॥ यथा मृत्युभयं न स्यात् तथा चाहं करोम्यहम् ॥२०॥

इत्युक्त्वा तौ समाश्वास्य कृत्वा चापि प्रदक्षिणाम् ॥ अभिवाद्य तयोः पादौ पित्रादिष्टो ययौ गृहात् ॥२१॥
प्रायात्तपोवनं पुण्यं भृगोर्दिव्यमनुत्तमम् ॥ महद्भिर्मुनिभिः शिष्यैस्तत्पत्नीभिश्च सेवितम् ॥२२॥
प्रशान्तमृगभूयिष्ठं ब्रह्मघोषैरलङ्कृतम् ॥ देदीप्यमानमनिशं हूयमानैश्च वह्निभिः ॥२३॥
तपःस्वाध्यायनिरतैर्योगिभिश्च निषेवितम् ॥ मत्तद्विजसमाजुष्टं भ्रमद्भ्रमरमण्डितम् ॥२४॥
जातीकुरबकाशोककुन्दमन्दारशोभितम् ॥ सन्तानैः कल्पवृक्षैश्च मन्दारैर्हरिचन्दनैः ॥२५॥
अन्यैश्च विविधैर्वृक्षैः फलपुष्पविनम्रकैः ॥ लसत्कुमुदकह्लारपङ्कजैर्विमलाम्बुभिः ॥२६॥
सरोभिरुरुतोयाभिः सरिद्भिश्च तथा युतम् ॥ वेदैश्चतुर्भिरभितो मूर्तिमद्भिरिवावृतम् ॥२७॥
अङ्गैर्निरुक्तशिक्षाद्यैः साङ्गैरिव निषेवितम् ॥ पुराणन्यायमीमांसाधर्मशास्त्रैः समावृतम् ॥२८॥
संमन्तादात्मशुद्ध्यर्थं तत्र तत्र निषेवितम् ॥ आश्रमं ब्रह्मपुत्रस्य ब्रह्मलोकमिवापरम् ॥२९॥
तस्याश्रमपदं गत्वा मार्कण्डेयो महामुनिः ॥ तत्रासीनं महात्मानं तपोराशिमकल्मषम् ॥३०॥
अद्राक्षीदमरप्रख्यं भृगुमात्मपितामहम् ॥ तत्पादकमलं भक्त्या समभ्यर्च्याभिवंद्य च ॥३१॥
भृगवे स्वस्य वृत्तान्तं कथयामास तत्वतः ॥ स तेन चाभ्यनुज्ञातस्तपस्तेपे सुदुश्चरम् ॥३२॥
मार्कण्डेयो ब्रह्मचर्यव्रतयुक्तो निरामयः ॥ मामेव मनसा ध्यायन् मद्भक्तो मत्परायणः ॥३३॥
वाय्वम्बुभक्षगो वर्षमेकं तत्राश्रमेऽत्यगात् ॥ पञ्चाग्निमध्यगोऽप्येकं वर्षं तत्रात्यगान्मुनिः ॥३४॥
तृतीयञ्च भ्रमेणास्ते यत्र सायं निवेशनः ॥ चतुर्थे वत्सरे पुत्र वाराणसीं जगाम ह ॥३५॥
तत्राश्रमपदं कृत्वा गङ्गातीरे सुरोत्तम ॥ स्थण्डिले मां समावाह्य तत्र पूजां समाचरत् ॥३६॥
तत्रैव स्थितवान् पुत्र मार्कण्डेयो महातपाः ॥ शैवागमोक्तविधिना पूजयामास मां मुनिः ॥३७॥
ततो जगाम वै कालः काले हन्तुं मृकण्डुजम् ॥ समुनिर्मृत्युमायान्तं दृष्ट्वा भीतोऽभवत्तदा ॥३८॥

मामनुस्मृत्य मनसा धैर्येण स महामतिः ॥ गतायुषमपि ह्येनं न शक्तो हन्तुमोजसा ॥३९॥
आराधयन्तमनिशं भक्त्या मां भक्तवत्सलम् ॥ एकदा स द्विजश्रेष्ठः शौचार्थं जाह्नवीं गतः ॥४०॥
तदा कालस्तमभ्यागाद्गृहीतुं पाशभृद्बली ॥ दृष्ट्वा मृकण्डुतनयः कालं मां शरणं गतः ॥४१॥
गृहीत्वा कलशं पूर्णमद्भिर्दृढमरिन्दम ॥ मत्पादौ च ततो ध्यात्वा मनसा निश्चलेन सः ॥४२॥
ततोहं तस्य तपसा भक्त्या चानन्यपूर्वया ॥ क्षेत्रस्य च प्रभावेण तस्य प्रत्यक्षतां गतः ॥४३॥
गङ्गाम्बुपूर्णकलशादहमुत्थाय सत्वरम् ॥ अपश्यमन्तिके कालं जिघृक्षन्तं तमोजसा ॥४४॥
सपाशं परशुव्यग्रं खड्गशूलधनुर्धरम् ॥ मदाज्ञालङ्घिनं पुत्र दृष्ट्वा क्रोधमुपेयिवान् ॥४५॥
मम क्रोधाग्निना कालो भस्मशेषो बभूव ह ॥ हत्वा कालमहं दृष्ट्वा मृकण्डुतनयं मुनिम् ॥४६॥
समाश्वास्याब्रवं पुत्र क्षीणायुस्त्वं द्विजोत्तम ॥ मद्भक्त्या ध्रियसे विप्र चर त्वं तप आयुषे ॥४७॥
तपसा महता वत्स परितोषय केशवम् ॥ स ते ददाति भगवन्नायुर्वै मनसेप्सितम् ॥४८॥
अनाराध्य जगन्नाथं सर्वधातारमच्युतम् ॥ न किञ्चिल्लभ्यते पुत्र तस्मादाराधयाच्युतम् ॥४९॥
इत्युक्त्वाऽदर्शनेनैव मार्गेणाहं ततो गतः ॥ गते तदा मयि सुत तपस्तेपे सुदुश्चरम् ॥५०॥
मामेव मनसा ध्यायन्नियतोऽनन्य दैवतः ॥ ब्रह्माणं लोककर्तारं विष्णुं भुवननायकम् ॥५१॥
अवमत्य धिया भक्त्या मामेव यजता सदा ॥ तस्याहं विप्ररूपेण पुनर्दर्शनमागतः ॥५२॥
वृद्धोऽतिवयसा पुत्र यष्ट्या प्राणस्खलन्निव ॥ वालुकामुष्टिमादाय गङ्गायां क्षिप्तवानहम् ॥५३॥
पुनः पुनश्च मृन्मुष्टिमादायादाय सत्वरम् ॥ क्षिपमाणन्तु मां दृष्ट्वा मार्कण्डेयोऽब्रवीद्वचः ॥५४॥

मार्कण्डेय उवाच ॥

किमिदं ते द्विजश्रेष्ठ मृन्मुष्टिः क्षिप्यतेम्भसि ॥ भवता किमभिप्रेतमुच्यतां कारणं द्विज ॥५५॥
ततस्तमब्रवं पुत्र वचो हास्यं सकौतुकम् ॥ सेतुं बद्ध्वा गमिष्यामि परम्पारं द्विजोत्तम ॥५६॥
लोकोपकारो भवति सर्वे यास्यन्ति सेतुना ॥ इति तद्वचनं श्रुत्वा मार्कण्डेयो महातपाः ॥५७॥
जहासोच्चैरिदं प्राह मामसौ द्विजसत्तमः ॥ न शक्यन्ते द्विजश्रेष्ठ वृथोत्साहस्त्वयोद्यतः ॥५८॥
अतिवेगप्रवाहेयं गङ्गा हिमवतः सुता ॥ शक्तियुक्तैरप्यशक्यमशक्तेन त्वया कुतः ॥५९॥
वृद्धस्त्वं वयसा विप्र शिथिलानीन्द्रियाणि ते ॥ तस्माद्विरम विप्रर्षे त्वदुत्साहो निरर्थकः ॥६०॥
कथं ते विप्रशार्दूल निरर्थकमिदं तपः ॥ अवमत्य हृषीकेशमनाराध्य जगत्पतिम् ॥६१॥
केशवं पुण्डरीकाक्षं न प्राप्यन्ते मनोरथाः ॥ तस्मान्निरर्थकं कर्म विहायान्यत् समाचर ॥६२॥
क्षीणायुस्त्वं द्विजश्रेष्ठ रुद्रभक्त्या मरिष्यति ॥ अवज्ञया केशवस्य मृत्योस्त्वं वशमेष्यसि ॥६३॥

तस्मादुत्सृज वै रुद्रं विष्णुमाराधयाच्युतम् ॥ इत्थं मयोदितं श्रुत्वा चुकोप मुनिपुङ्गवः ॥६४॥
क्रोधान्निर्भर्त्सयामास मामित्थं द्विजरूपिणम् ॥ धिक् त्वां पापसमाचारं वृद्धं ब्राह्मणरूपिणम् ॥६५॥
विनिन्द्य देवदेवेशं शङ्करं भक्तवत्सलम् ॥ विष्णुं प्रशंससे मूढ न ते प्रज्ञा प्रतिष्ठिति ॥६६॥
इति तस्य वचः श्रुत्वा मम चापि सुरोत्तम ॥ उत्पन्नः सहसा क्रोधो हर्षश्चापि निबोध तत् ॥६७॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे मार्कण्डेयतपोवर्णनं नाम एकविंशोऽध्यायः॥२१॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः २२ ॥  NEXT>>  श्लोक संख्या– ५६

## ॥ मार्कण्डेयकथायां–मार्कण्डेयस्य शिवोपदेशः ॥

शङ्कर उवाच ॥

भक्त्या मय्यनपायिन्या निन्दया केशवस्य च ॥ हर्षयुक्तश्च नितरामहमित्यब्रुवं पुनः ॥१॥
न जानीषेऽल्पबुद्धिस्त्वं विष्णुं त्रिभुवनेश्वरम् ॥ देवदेवं श्रियः कान्तमनाराध्य सुदुर्मते ॥२॥
सिद्धिमिच्छसि पापिष्ठ न किञ्चिल्लभ्यते त्वया ॥ स्वर्गमैश्वर्यमायुश्च मोक्षश्चापि न संशयः ॥३॥
तस्मादाराधय विभुं विष्णुं विश्वेश्वरं द्विज ॥ इत्युदीरितमाकर्ण्य मया वाक्यं द्विजोत्तमः ॥४॥
पुनः प्रोवाच मां पुत्र मार्कण्डेयो महातपाः ॥

मार्कण्डेय उवाच ॥

शृणु वृद्ध प्रवक्ष्यामि मम वाक्यं सुदुर्मते ॥५॥
शिवं विनिन्दसे मूढ शिव एव जगत्पतिः ॥ कर्ता पाता च संहर्ता शिव एव न संशयः ॥६॥
स आदिः सर्वभूतानां देवानाञ्च सुरोत्तमः ॥ वेदेषु गीयते शम्भुः पुराणेषु च स प्रभुः ॥७॥
स एकः सर्वभूतेषु मायया परिवर्तते ॥ तमाराध्य सुराः सर्वे गन्धर्वा यक्षराक्षसाः ॥८॥
नागाः सुपर्णा अप्सरसः सर्वे प्राप्ता मनोरथान् ॥ न तं विसृज्य च विभुमन्यमाराधयामि भो ॥९॥
को भवान् द्विजरूपेण बुद्धिमाकर्षसे मम ॥ यो वा को वा नमस्तुभ्यं क्षम्यतां गम्यतामितः ॥१०॥
तच्छ्रुत्वा वचनं तस्य मार्कण्डेयस्य सत्तम ॥ तदाहं दर्शयामास स्वरूपं कुक्कुटध्वज ॥११॥
दृष्ट्वा मामाह विप्रोसौ प्रणम्य शिरसा तदा ॥

मार्कण्डेय उवाच ॥

देवदेव नमस्तेऽस्तु विश्वमूर्ते नमोस्तुते ॥१२॥
विष्णुप्रिय नमस्तेस्तु विश्ववन्द्य नमोस्तुते ॥ त्वमेव जगतां धाता विधाता विश्वभावनः ॥१३॥
संहर्ता जगतामन्ते नमस्तुभ्यं त्रिमूर्तये ॥ अज्ञानादथवा ज्ञानात् त्वयि भक्त्या च शङ्कर ॥१४॥
दुरुक्तं यन्मया देव क्षम्यतां भक्तवत्सल ॥ इत्युक्ते मुनिना चाहं प्रीतिमानभवत्तदा ॥ १५॥
जगाद च पुनस्तं वै मार्कण्डेयं महाद्युतिम् ॥ काले हि सर्वभूतानां मृत्युर्भवति पुत्रक ॥१६॥
मया सृष्टानि भूतानि मृत्युश्चापि मया कृतः ॥ त्वन्निमित्तं मया सोयं निहतः काल एव च ॥१७॥
क्षीणायुस्त्वं द्विजश्रेष्ठ आयुष्काम्यं समाचर ॥ मदीयेनोपदेशेन मया सार्धं द्विजोत्तम ॥१८॥
मम शक्तिमयं विष्णुं आराधय महामते ॥ शक्त्या ददाति वै देवो वाञ्छितं भवते द्विज ॥१९॥
शक्त्या कुर्वन्ति कर्माणि सदेवासुरमानवाः ॥ शक्त्या विहीनः पुरुषो न किञ्चित्कुरुते द्विज ॥२०॥
शक्तिहीनं शरीरं तु निस्सारमिति बुद्ध्यताम् ॥ मम शक्तिरसौ विष्णुः शरीरं तस्य मां विदुः ॥२१॥
अवमत्य शरीरस्थां शक्तिं किन्नाम साधयेत् ॥ तथा विष्णुमनादृत्य भजन् मां द्रोहकृन्मम ॥२२॥
निर्मथ्यमाने दधिनि नवनीतमुदश्चितः ॥ हृदयं मदीयं निर्मथ्य जगदादौ द्विजोत्तम ॥२३॥
आत्मनात्मानमनघः प्रासृक्षद्देवसत्तमः ॥ पुनः समत्वमात्मानं ददर्श जगदीश्वरः ॥२४॥
विदुर्दधिनि विप्रेन्द्र द्विधाभून्नवनीतवत् ॥ अहं तक्र इवाप्यत्र उद्धृतामृतपात्रवत् ॥२५॥
बीजं प्रधानं वै पुत्र यावद्भूम्यां प्ररोहति ॥ प्रसूतेयं पुनः पुत्र बीजं तत्र न विद्यते ॥२६॥
सस्यं यदाविष्कुरुते बहुधा पक्वमेष्यति ॥ तदा तद्व्रीहयः पूज्या न क्षेत्रं न तृणं द्विज ॥२७॥
साध्या व्रीहिः क्रियाः पुत्र साधनास्ते न संशयः ॥ साध्यप्राप्तौ साधनानि न प्रशंसन्ति पुत्रक ॥२८॥

किन्तु तस्मिन् फले पुत्र बीजाद्या हेतवः स्मृताः ॥ तथासौ सर्वभूतेषु विष्णुर्भवति पुत्रक ॥२९॥
तदा रजस्तमश्चैव मूलं रक्षति सात्विकम् ॥ विष्णुमूलमहं पुत्र ब्रह्मा च द्विजसत्तम ॥३०॥
तस्माद्विष्णुः प्रधानोभून्नाहं ब्रह्मा सुरोत्तम ॥ तथाहमपि निर्मत्या शक्त्या मूढैर्विमोहितः ॥३१॥
अशक्तोऽहमसारत्वाद्दातुं भिन्नधियां फलम् ॥ आवयोर्भेदकृन्मर्त्यः सदा नरकभाग्भवेत् ॥३२॥
अवमत्य हृषीकेशं मां यजन् मां विनिन्द्य च ॥ विष्णुमाराधयन् कृच्छ्रादागस्कृदुभयोरपि ॥३३॥
तस्मात्त्वं मत्प्रसादेन विष्णुभक्तो भविष्यसि ॥ भेदकर्त्री महामाया योगिनामपि मोहिनी ॥३४॥
संसारदुःखदा नृणां भवतो निस्सरत्विह ॥ इत्युक्तमात्रे देवेश मया तस्य महामुनेः ॥३५॥

माया त्रैलोक्यवितता मोहिनी याऽभवत्सुत ॥ सन्त्यज्य वैष्णवी विप्र आज्ञया मम सत्तम ॥३६॥
देहात्तदीयान्निष्क्रम्य सिद्धोसीति ननाम तम् ॥ तामाह भार्गवः पुत्र देवदेवस्य सन्निधौ ॥३७॥
यश्चेदं पठते नित्यं यश्च नित्यं शृणोति च ॥ तयोर्देवोऽवगन्तव्यो यदि त्वं प्रियमिच्छसि ॥३८॥
तथेति सा वरं दत्वा यथाकामं जगाम ह ॥ मार्कण्डेयोऽपि तपसा सिद्धिं प्राप्याव्ययां पुनः ॥३९॥
तुष्टाव प्रणतो भूत्वा शर्वं सर्वगतं मुनिः ॥

मार्कण्डेय उवाच ॥

नमोस्तु देवप्रवर प्रणतार्तिविनाशन ॥४०॥
परमात्मा परन्धाम पवित्रं परमं भवान् ॥ त्वन्मायया जगत्सर्वं मोहितं सुरसत्तम ॥४१॥
त्वं मोहयसि देवेश नमस्ते मोक्षदायिने ॥ त्वमेकः सर्वदेवानां बीजं चाप्यविनाशि वै ॥४२॥
त्वां न जानन्ति भगवन् मायया तव मोहिताः ॥ महामाये नमस्तेस्तु रविनेत्र नमोस्तु ते ॥४३॥
द्वैताद्वैतस्वरूपस्त्वं नामादिभिरसंयुतः ॥ अरूपः सर्वरूपस्त्वं विश्वरूप नमोस्तु ते ॥४४॥
अणोरणीयांस्त्वं देव महतोपि महानभूः ॥ स्थूलरूपोसि देवेश सूक्ष्मात् सूक्ष्मतरो भवान् ॥४५॥
सद्रूपस्त्वमसद्रूपः सदसद्रूपिणे नमः ॥ दिव्यमूर्ते नमस्तुभ्यं मूर्तामूर्तात्मको ह्यसि ॥४६॥
नानामूर्ते नमस्तुभ्यं दिव्यमूर्ते नमो नमः ॥ ब्रह्मा त्वं लोककर्तृत्वे विष्णुस्त्वं पालने भुवः ॥४७॥
संहारे रुद्ररूपोसि नमस्तुभ्यं त्रिमूर्तये ॥ भूतात्मने नमस्तेस्तु नमस्ते भूर्भुवात्मक ॥४८॥
अक्रूरस्त्वं क्रूरतरः प्रचण्डश्चण्डविक्रमः ॥ योगशास्त्रविभागज्ञ योगिध्येय जगन्मय ॥४९॥
मातृमानप्रमेयात्मन्न प्रमाणादिगोचर ॥ न मनोगोचरस्त्वं वै न शब्दस्यापि गोचरः ॥५०॥
नान्येषामिन्द्रियाणां त्वं गोचरः पुरुषोत्तम ॥ भक्तानुकम्पया देव मम प्रत्यक्षतां गतः ॥५१॥
आयुर्मे नास्ति भगवन् तस्मादायुः प्रयच्छ मे ॥ इति स्तुतोऽथ भगवान् मार्कण्डेयेन धीमता ॥५२॥
प्रोवाचेदं महादेवो मार्कण्डेयमिदं तदा ॥

शिव उवाच ॥

गच्छ गोकर्णमद्यैव मन्नियोगात् द्विजोत्तम ॥५३॥
रुद्रयोन्याः पूर्वभागे धर्माश्रममितीरितम् ॥ यत्र धर्मः पुरा विप्र तपस्तेपे सुदुश्चरम् ॥५४॥
सिद्धिं प्राप्य सुपूज्योऽभूत् सिद्धानां स महायशाः ॥ गत्वा तत्र त्वमपि वै विष्णुं आराधय त्वयम् ॥५५॥
तव यावत् सुरश्रेष्ठः साक्षात् प्रत्यक्षमेष्यति ॥ तदाहमागमिष्यामीत्युक्त्वा चान्तरधीयत ॥५६॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे मार्कण्डेयशिवोपदेशकथनं नाम द्वाविंशोऽध्यायः ॥२२॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः २३ ॥ NEXT>> श्लोक संख्या– ७१

॥ मार्कण्डेयाश्रम,मार्कंडेयेश्वर,मार्कंडेय ह्रद– आरामविनायक(हिल्ल गणपति) महिमा ॥

## मार्कण्डेयाश्रम,मार्कंडेयेश्वर,मार्कंडेय ह्रद

नारद उवाच ॥

श्रुत्वा शर्वेरितं वाक्यं मृकण्डुतनयो मुनिः ॥ जगाम सिद्धमार्गेण गोकर्णं क्षेत्रमुत्तमम् ॥१॥

तत्राश्रमपदं कृत्वा धर्माश्रमसमीपतः ॥ तपस्तप्त्वा निराहारस्तत्रोवास चतुर्युगम् ॥२॥

अङ्गुष्ठद्वितयाग्रेण प्रविष्टो धरणीतलम् ॥ सन्नियम्येन्द्रियग्रामं मनसाराधयन् हरिम् ॥३॥

नियतश्च निराहारो नासाग्रन्यस्तलोचनः ॥ गुरूपदिष्टविधिना तपस्तेपे सुदुश्चरम् ॥४॥

घोरेण तपसा तस्य तुतोष भगवान् हरिः ॥ आविर्बभूव देवेशः शङ्खचक्रगदाधरः ॥५॥

श्रीवत्साङ्कश्चतुर्बाहुर्गरुडस्थश्चतुर्भुजः ॥ तमागतमभिप्रेक्ष्य मृकण्डुतनयो मुनिः ॥६॥

तुष्टाव वाग्भिरिष्टाभिर्भक्त्या परमया हरिम् ॥

मार्कंडेय उवाच ॥

नारायण नमस्तेऽस्तु नमस्ते नररूपिणे ॥७॥

नमो मत्स्यस्वरूपाय कूर्मरूपाय ते नमः ॥ नमो वराहरूपाय नृसिंहाय च ते नमः ॥८॥

वामनाय नमस्तेऽस्तु भार्गवाय नमोस्तु ते ॥ नमो रामाय रामाय श्रीकृष्णाय च ते नमः ॥९॥

नमस्ते बौद्धरूपाय कल्किरूपाय ते नमः ॥ नमस्ते केशिमथन केशवाय नमोस्तु ते ॥१०॥

कमलाक्ष नमस्तेऽस्तु नमस्ते कमलापते ॥ मारयोने नमस्तेऽस्तु नमस्ते मधुसूदन ॥११॥

गोविन्दाय नमस्तेऽस्तु गोप्रियाय नमो नमः ॥ विष्णवे जिष्णवे चैव श्रीधराय नमोस्तु ते ॥१२॥

भक्तानां हर्षदात्रे ते हृषीकेशाय ते नमः ॥ पद्मयोने पद्मनाभ श्रीधराय नमोस्तु ते ॥१३॥

दानादानस्वरूपाय दामोदर नमोस्तु ते ॥ कामरूपाय कालाय नमस्ते दिव्यमूर्तये ॥१४॥

सोमसूर्यस्वरूपाय शिवब्रह्मस्वरूपिणे ॥ इन्द्राय यमरूपाय हव्यायाग्निस्वरूपिणे ॥१५॥

मन्त्राक्षराय मन्त्राय नमस्ते बोधरूपिणे ॥ वेदोपनिषत्सद्रूप सांख्ययोगस्वरूपिणे ॥१६॥

नमः सिद्धान्तरूपाय नमस्ते सिद्धरूपिणे ॥ गन्धरूपाय घ्राणाय चक्षुरूपाय ते नमः ॥१७॥
शब्दश्रोत्रस्वरूपाय नरसिंहस्वरूपिणे ॥ नमस्त्वक्स्पर्शरूपाय नमो ह्याकाशरूपिणे ॥१८॥
वायुतेजःस्वरूपाय जलपृथ्वीस्वरूपिणे ॥ सत्यरूप ज्योतिरूप तमोरूपाय ते नमः ॥१९॥
पायूपस्थस्वरूपाय वाचहस्तस्वरूपिणे ॥ नमः पादस्वरूपाय अप्रमेयाय ते नमः ॥२०॥
नमः स्वरूपिणे नित्यं शुद्धबुद्धिप्रबोधक ॥ क्रूराय क्रूरकृत्याय अक्रूराय नमो नमः ॥२१॥
शुद्धाशुद्धस्वरूपाय शान्तायानन्तमूर्तये ॥ द्वन्द्वाय द्वन्द्वशून्याय द्वैताद्वैतस्वरूपिणे ॥२२॥
अजाय जनयित्रे ते सर्वदेवात्मने नमः ॥ मनुष्यरूपिणे चैव पशुरूपाय ते नमः ॥२३॥
पक्षिणे सुररूपाय गन्धर्वाप्सररूपिणे ॥ तृणवृक्षस्वरूपाय पत्रगुल्मादिरूपिणे ॥२४॥
नानारूपाय नागाय नमः सर्वस्वरूपिणे ॥२५॥
नमो नमस्तेऽस्तु सहस्रमूर्तये सहस्रनेत्राय सहस्रबाहवे ॥
सहस्रपादाय सहस्रमूर्ध्ने सहस्रचन्द्रार्कसमप्रभाय ॥२६॥
शरणं भव मे देव मृत्योर्भीततरस्य मे ॥ सद्वासद्वा मया देव ज्ञानतोऽज्ञानतोपि वा ॥२७॥
ब्रह्मचापल्यतो वापि मया धृष्टमुदीरितम् ॥ तत्सर्वं क्षम्यतां देव भक्तप्रिय नमोस्तु ते ॥२८॥

नारद उवाच ॥

इति स्तुतोऽथ भगवान् विश्वरूपधरो हरिः ॥ प्रीतिमानब्रवीद्देवो मार्कण्डेयमिदं वचः ॥२९॥
प्रीतोऽस्मि ते महाभाग भक्त्या परियमेन च ॥ स्तोत्रेण तपसा चैव वरं ब्रूहि यथेप्सितम् ॥३०॥
इत्युक्तो देवदेवेन रुद्रं सस्मार स द्विजः ॥ तेन स्मृतोऽथ भगवान् देवदेवो वृषध्वजः ॥३१॥
आजगाम महादेवो मार्कण्डेय दिदृक्षया ॥ तमागतमभिप्रेक्ष्य दूराद्ब्रह्मऋषिस्तदा ॥३२॥
ववन्दे शिरसा भक्त्या देवदेवमुमापतिम् ॥ नमस्कृत्य विधातारं सस्मार विधिपुङ्गवः ॥३३॥
तस्य स्मरण मात्रेण ह्याजगाम पितामहः ॥ तमागतमभिप्रेक्ष्य ब्रह्माणं प्रपितामहम् ॥३४॥
ववन्दे शिरसाभ्येत्य प्राञ्जलिः पुरतः स्थितः ॥ तं दृष्ट्वा भगवान् ब्रह्मा प्राह विष्णुमिदं वचः ॥३५॥

ब्रह्मोवाच ॥

श्रूयतां भो सुरश्रेष्ठ शङ्खचक्रगदाधर ॥ असौ नप्ता मम विभो मार्कण्डेयो महामुनिः ॥३६॥
गतायुरपि विप्रोसौ रुद्रभक्त्याद्य जीवति ॥ जन्मायुतं देवदेव त्वामाराधितवान् पुरा ॥३७॥
तस्मात् प्रदत्तं रुद्रेण मया चास्य महाप्रभो ॥ अजरामरत्वं देवेश दातव्यं च जगत्पते ॥३८॥

त्वया त्वत्पूजकानां च दत्तपूर्वं जगद्गुरो ॥ तस्मात्त्वमपि देवेश आयुरस्य प्रसादय ॥३९॥
तच्छ्रुत्वा ब्रह्मणो वाक्यं मार्कण्डेयमुवाच ह ॥

विष्णुरुवाच ॥

अजरामरत्वं विप्रेश मत्प्रसादाद्भविष्यति ॥४०॥
दत्तो मया पूर्वमेव शिवभक्त्या न संशयः ॥ यः शिवं भजते नित्यं स मामेव भजन् खलु ॥४१॥
यो मां भजति विप्रेन्द्र स रुद्रं नात्र संशयः ॥ शिवः शरीरमस्माकं शक्तिश्चाहं शिवस्य तु ॥४२॥
ममात्मा लोककर्ताऽयं ब्रह्मा लोकपितामहः ॥ एवं त्रिधा हि वर्तन्ते ब्रह्मविष्णुमहेश्वराः ॥४३॥
पक्षपाताद्भजन्ते यो न ते मोक्षस्य गामिनः ॥ संसारघोरनरके प्रवर्तन्ते इतस्ततः ॥४४॥
विष्णुः श्रेष्ठः शिवश्चेति ये वदन्ति नराधमाः ॥ तेषां वृथा श्रमस्तात पापिष्ठास्ते न संशयः ॥४५॥
ये रुद्रं पूजयिष्यन्ति ते मद्भक्ता न संशयः ॥ ये मामर्चन्ति सततं ते रुद्रं नात्र संशयः ॥४६॥
आवामभेदतः सम्यग्ये यजन्ति नरोत्तमाः ॥ ते परं ब्रह्म पश्यन्ति आवयोर्दैवतं हि ते ॥४७॥
तस्मादभेदबुद्धे ते किं ददामि ब्रवीषि तत् ॥

मार्कंडेय उवाच ॥

वरार्होऽहं यदि विभो वृणोमि मनसेप्सितम् ॥४८॥
इदं ममाश्रमं देव गोकर्णे पुरुषोत्तम ॥ त्वत्प्रसादात् सुरश्रेष्ठ पूज्यं भवतु सर्वतः ॥४९॥

---

आरामविनायकः(हित्ल गणपति)

तपोविघ्ननिवृत्यर्थं पूजितोऽयं गजाननः ॥ त्रिषु लोकेषु विख्यातो भक्तानामिष्टदो भवेत् ॥५०॥
तीर्थमेतत् सुरश्रेष्ठ स्नातानां कामदं भवेत् ॥ लिङ्गमेतत् सुरगुरो मन्नाम्ना विश्रुतं भवेत् ॥५१॥
इति तस्य वचः श्रुत्वा ब्रह्मविष्णुमहेश्वराः ॥ सर्वे वरं ददुस्तस्मै यथा तेनाभिवाञ्छितम् ॥५२॥
पूजितोऽयं द्विजश्रेष्ठ त्वया विघ्ननिवृत्तये ॥ भक्तानां भद्रदो नित्यं भविष्यति न संशयः ॥५३॥

---

आश्रमं ते द्विजश्रेष्ठ लोके ख्यातिं गमिष्यति ॥ पुण्याश्रमाभिधानेन त्रिविष्टपसमं भवेत् ॥५४॥
अत्रागत्य द्विजश्रेष्ठ कृत्वा स्नानं यथाविधि ॥ मार्कण्डेयह्रदे पुण्ये पवित्रे पापनाशने ॥५५॥
त्वत्कृतेनैव तपसा त्वल्लिङ्गं यः समर्चति ॥ तस्य त्रिजन्मचरितमल्पं वा यदि वा बहु ॥५६॥
पापञ्च क्षयमायातु प्रसादान्नो द्विजोत्तम ॥ वैष्णवस्य च यज्ञस्य फलं प्राप्नोति स द्विजः ॥५७॥
लिङ्गमेतत् पूजकानां दीर्घायुष्यं भवेद्ध्रुवम् ॥ अस्मिन् लिङ्गे वयं पुत्र ब्रह्मविष्णुमहेश्वराः ॥५८॥

सदैव निवसामोऽत्र भक्तानुग्रहकाम्यया ॥ अत्रस्थो रुद्रगायत्रीं लक्षमेकं जपेद् द्विजः ॥५९॥
कालमृत्युमतिक्रम्य स जीवति न संशयः ॥ सुवर्णवस्त्ररौप्यादि कपिलां भूषणान्वितां ॥६०॥
श्रोत्रियाय च यो दद्यात् तस्य पुण्यमनन्तकम् ॥ यथाशक्ति द्विजातिभ्यो वैशाखे मासि पुत्रक ॥६१॥
दानमस्मिन् द्विजश्रेष्ठ सहस्रगुणितं भवेत् ॥ तथा होमो जपश्चापि ब्राह्मणानां च भोजनम् ॥६२॥
एकं सहस्रगुणितं भवत्येव न संशयः ॥ अस्मिन् पुण्याश्रमे पुत्र पञ्चत्वमुपयान्ति ये ॥६३॥
ते रुद्रलोकं सम्प्राप्य मोदन्ते शिवसन्निधौ ॥ अस्मिन् पुण्याश्रमे तात रुद्रजाप्यं करोति यः ॥६४॥
सार्वभौमो भवेद्भूम्यां योगैश्वर्यसमन्वितः ॥

नारद उवाच ॥

इति दत्वा वरं तस्मै ब्रह्मविष्णुमहेश्वराः ॥६५॥
तत्रैवान्तर्दधुः सर्वे अभिन्ना भिन्नदर्शनाः ॥ मार्कण्डेयोपि भगवान् यथाकामं जगाम ह ॥६६॥
एतदेव द्विजश्रेष्ठ आश्रमं पुरतस्तव ॥ मार्कण्डेयह्रदं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥६७॥
तस्य पश्चिमदिग्भागे मार्कण्डेयेश्वराभिदम् ॥ तदेतद्दृश्यते लिङ्गं ब्रह्मविष्णुशिवात्मकम् ॥६८॥
देवाः स्नानं हि कांक्षन्ते मार्कण्डेयह्रदेऽमले ॥ एतत्ते सर्वमाख्यातं ब्रह्मर्षेश्चरितं महत् ॥६९॥
क्षेत्रस्य च प्रभावोऽपि किमन्यच्छ्रोतुमिच्छसि ॥ य इदं पुण्यमाख्यानं मार्कण्डेयस्य धीमतः ॥७०॥
शृणुयाच्छ्रावयेन्नित्यं दीर्घायुष्मान्नरो भवेत् ॥

इति श्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डेमार्कण्डे यवरप्रदानंनामत्रयो विंशोऽध्यायः ॥२३॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः २४ ॥  NEXT>>  श्लोक संख्या– ६५

॥ कुमारेश्वरः(गुहेश्वरः) गुहतीर्थं – कुमारेश्वरमाहात्म्यम् च(दारुणस्य कथा) ॥

## कुमारेश्वरः(गुहेश्वरः) गुहतीर्थं

संवर्तक उवाच ॥

कार्तिकेयोऽपि भगवांच्छ्रुत्वा शर्वेरितं वचः ॥ वैवस्वतान्ते देवर्षे किमकार्षीत् तदुच्यताम् ॥१॥

नारद उवाच ॥

शृणु विप्र प्रवक्ष्यामि षण्मुखस्य कथां शुभाम् ॥ श्रुत्वा ह्यभेदं स्कन्दोपि देवदेवादुमापतेः ॥२॥

तं प्रणम्य महादेवं प्राप्यानुज्ञां शिवात्तदा ॥ गोकर्णं प्रययौ स्कन्दः सिद्धिदं सिद्धिकामिनाम् ॥३॥
गत्वा तीर्थवरं तस्मिन् कुमारेश्वरमभ्यगात् ॥ त्रयोदश कुमारा वै तस्मिन् सिद्धिमुपागताः ॥४॥
रुद्रयोन्याः पूर्वभागे किञ्चिदीशानदिक्स्थितम् ॥ स्रोतसामुत्तमा तत्र ताम्रगौरीति विश्रुता ॥५॥
गङ्गा भागीरथी रम्या पपाताकाशतः पुरा ॥ ताम्रगौरीगिरौ तात साक्षाद्गङ्गा महाव्रता ॥६॥
तां दृष्ट्वा चकमे देव उपमेये च तां पुनः ॥ तस्यास्तीरे द्विजश्रेष्ठ देवं त्रिभुवनेश्वरम् ॥७॥
आराध्य सिद्धिमगमत् कुमारोऽपि द्विजोत्तम ॥ तीर्थं गुहोदकं नाम त्रिषु लोकेषु विश्रुतम् ॥८॥
रहस्यं तत्र जानन्ति मनुष्याः पापतत्पराः ॥ कार्तिके कृत्तिकायुक्तपौर्णम्यां द्विजसत्तम ॥९॥
तस्मिन् लिङ्गे देवदेवः साक्षाद्गङ्गाधरः स्वयम् ॥ प्रत्यक्षतस्तु भगवान् पूजामुपहरिष्यति ॥१०॥
तस्मिन् काले द्विजवर तीर्थे स्नात्वा गुहोदके ॥ यः शिवं पूजयेद्विप्र स रुद्रत्वमवाप्नुयात् ॥११॥
यः स्नापयति तल्लिङ्गं तद्दिने भक्तिसंयुतः ॥ घृतेन दध्ना पयसा पञ्चगव्यादिना द्विज ॥१२॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यवन्दनैः ॥ नीराजनैर्मन्त्रपुष्पैर्भक्त्या देवं समर्चयेत् ॥१३॥
एवं सम्पूज्य विधिवद्ब्राह्मणान् भोजयत्ततः ॥ शिवमुद्दिश्य वै भक्त्या शक्त्या दद्याच्च दक्षिणाम् ॥१४॥
तस्मिन् दिने द्विजवर मन्त्रो जप्यः षडक्षरः ॥ अष्टदिक्पालकेभ्यश्च बलिं दद्याद्विधानतः ॥१५॥
पुराणश्रवणं कार्यं देवस्य पुरतो द्विज ॥ एवं कृत्वा द्विजश्रेष्ठ नक्तभोजी भवेन्नरः ॥१६॥
एवं यः कुरुते तत्र तस्य पुण्यफलं शृणु ॥ निष्कामतस्तु कुर्वाणो मुक्तिं प्राप्नोत्यसंशयम् ॥१७॥
यं कामं मनसा ध्यात्वा करोत्येवं द्विजोत्तम ॥ तमेव लभते काममक्षयं नात्र संशयः ॥१८॥
त्रिःसप्त कुलमुद्धृत्य रुद्रलोकं स गच्छति ॥ क्रीडित्वा तत्र वै कालं यावच्चन्द्रदिवाकरौ ॥१९॥
चक्रवर्ती भवेद्भूमौ दिव्यज्ञानसमन्वितः ॥

नारद उवाच ॥

तस्मिन् गुहोदके तीर्थे स्नात्वा नित्यं च षण्मुखः ॥२०॥
तल्लिङ्गं पूजयन्नित्यं कुमारेश्वरसंज्ञितम् ॥ बद्धपद्मासनः स्कन्दो मौनव्रतपरायणः ॥२१॥
निर्द्वन्द्वो निरहङ्कारो ध्यायन्नास्ते सदाशिवम् ॥ एवं तपस्यतस्तस्य बहुकालोऽत्यगात् किल ॥२२॥
ततः प्रसन्नो भगवान् पार्वत्या सहितः शिवः ॥ ब्रह्मणा विष्णुना सार्धं देवैरिन्द्रादिभिः सह ॥२३॥
तस्य प्रत्यक्षतां प्राप्त इदमाह स पुत्रकम् ॥

शङ्कर उवाच ॥

परितुष्टोस्मि ते पुत्र तपसा च दमेन च ॥२४॥

वरं वरय भद्रन्ते यत्तेऽभिलषितं हृदि ॥ तद्ददाम्यविलम्बेन यद्यपि स्यात् सुदुर्लभम् ॥२५॥

इति पित्रोदितं श्रुत्वा गुहः प्रोवाच तं तदा ॥

कुमार उवाच ॥

सिद्धिमिच्छामि भगवन् त्वत्प्रसादात् सुरेश्वर ॥२६॥

इतः परं तीर्थमेतत् लिङ्गं च सुरसत्तम ॥ मन्नाम्ना ख्यातिमायातु त्रिषु लोकेषु शङ्कर ॥ २७॥

शङ्कर उवाच ॥

सिद्धोऽसि त्वं पूर्वमेव मत्प्रसादाद्विशेषतः ॥ तारकासुरनाशाय सेनानी भव पुत्रक ॥२८॥

देवसेनापतिस्त्वं हि नान्योऽस्ति त्वदृते सुत ॥ इत्युक्त्वा भगवान् शम्भुर्देवैः सम्मन्त्र्य पार्थिव ॥२९॥

शक्तिं चापि ददौ तस्य सर्वशत्रुनिषूदिनीम् ॥ तीर्थमेतत्तव सुत लिङ्गं च सुरसत्तम ॥३०॥

त्वन्नाम्ना ख्यातिमायाति सर्वपापनिषूदनम् ॥ इति दत्वा वरं तस्मै ब्रह्मविष्णुमहेश्वराः ॥३१॥

तत्रैवान्तर्दधुः सर्वे कुमारेण च दैवतैः ॥

नारद उवाच ॥

तीर्थे गुहोदके मर्त्यः स्नात्वा देवं गुहेश्वरम् ॥३२॥

सम्पूजयेद्भक्तियुक्तस्तस्य पुण्यमनन्तकम् ॥ त्रिःसप्तकुलजैः सार्धं शिवलोकं स गच्छति ॥३३॥

---

## कुमारेश्वरमाहात्म्यं–दारुणस्य कथा

सूत उवाच ॥

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ यच्छ्रुत्वा सकलान् कामान् लभते नात्र संशयः ॥३४॥

पुरा हि दारुणो नाम पार्थिवो वङ्गदेशजः ॥ पालयन् वसुधामास्ते धर्मेण सकलाः प्रजाः ॥३५॥

एवं प्रवर्तमानस्य बभूवुः शत्रवस्तदा ॥ तस्य रुध्वा पुरीं रम्यां सप्ताङ्गं जह्रुरोजसा ॥३६॥

ततस्तु दारुणो राजा एकाकी वनमाश्रितः ॥ बहुधा क्षुत्तृषाविष्टो दुःखशोकवशं गतः ॥३७॥

सुच्छायामाश्रितस्तत्र न्यग्रोधस्य तरोरधः ॥ तत्रस्थं सलिलं दिव्यं पीत्वाचम्य तदा नृपः ॥३८॥

उपविष्टः स तत्रैव भार्यया सह पार्थिवः ॥ चिन्तयानः स बहुधा कोशदुर्गादिकं च यत् ॥३९॥

एवं सञ्चिन्त्यमाने तु तस्मिन् पार्थिवसत्तमे ॥ ततो दैवगतिः प्रायाद्योगी कश्चित्तदा नृप ॥४०॥

सनको नाम भद्रन्ते त्रैलाक्याटनतत्परः ॥ तमागतमभिप्रेक्ष्य राजाऽसौ दुःखविह्वलः ॥४१॥

तत्पादौ प्रणिपत्यैवं प्राञ्जलिर्वाक्यमब्रवीत् ॥ योगिन् प्रशासतः पृथ्वीं धर्मेण सकलाः प्रजाः ॥४२॥

शत्रवो मे बलात्कृत्य सप्ताङ्गं जह्रुरोजसा ॥ मम राज्यं यथा प्राप्स्ये तथा कुरु महामते ॥४३॥

सनक उवाच ॥

गोकर्णादागतं विद्धि मामद्य जगतीपते ॥ गोकर्णाख्यं महाक्षेत्रं शैवं पुण्यप्रदं नृणाम् ॥४४॥

तत्र सिद्धाश्च साध्याश्च ऋषयश्च तपोधनाः ॥ देवाः सुपर्णा मनुजा ये चान्ये दैत्यदानवाः ॥४५॥

तपस्तप्त्वा तु तत्रैव सर्वे प्राप्ता मनोरथान् ॥ तस्मात् त्वमपि राजेन्द्र गच्छ गोकर्णमद्य वै ॥४६॥

अनया भार्यया सार्धं सर्वाभीष्टफलप्रदम् ॥ रुद्रयोन्याः पूर्वभागे ताम्रगौर्युत्तरे तटे ॥४७॥

कुमारेश्वरसंज्ञन्तु लिङ्गमस्ति सुशोभनम् ॥ तीर्थं गुहोदकं नाम सर्वकिल्बिषनाशनम् ॥४८॥

त्वं तत्र गत्वा राजेन्द्र स्नात्वा तीर्थे गुहोदके ॥ कुमारेशं समभ्यर्च्य तपस्तीव्रं समाचर ॥४९॥

एवं द्वादशवर्षं तु कुरु राजन् समाहितः ॥ ततः प्रसन्नो भवति उमया सहितः शिवः ॥५०॥

तवाभीष्टं ददेच्छम्भुः स्वराज्यं प्राप्स्यसे पुनः ॥ इति तद्भाषितं श्रुत्वा सनकस्य महात्मनः ॥५१॥

नमस्कृत्य तु तत्पादौ प्राप्यानुज्ञां च तस्य वै ॥ प्रायाद्गोकर्णममलं सर्वपापप्रणाशनम् ॥५२॥

सर्वलिङ्गमयं क्षेत्रं दृष्ट्वा राजाऽतिविस्मितः ॥ ताम्रगौरीतटे रम्ये कुमारेश्वरनामकम् ॥५३॥

लिङ्गं दृष्ट्वा नृपो दिव्यं भार्यया सह तत्र तु ॥ आश्रमं कारयामास तपश्चक्रे समाहितः ॥५४॥

स्नात्वा गुहोदके तीर्थे तल्लिङ्गं पूजयन् मुहुः ॥ एवं तपस्यतस्तस्य द्वादशाब्धा ययुर्द्विज ॥५५॥

सम्पूर्णे द्वादशे वर्षे ततस्तुष्टो महेश्वरः ॥ आविर्बभूव पुरतस्तस्मात् लिङ्गादुमापतिः ॥५६॥

राजानं प्राह विप्रर्षे वाक्यमेतन्महेश्वरः ॥

ईश्वर उवाच ॥

तुष्टोऽस्मि तपसा राजन् भक्त्या च नियमेन च ॥५७॥

तवाभीष्टं प्रदास्यामि ब्रूहि यन्मनसेप्सितम् ॥

दारुण उवाच ॥

यदि तुष्टोसि देवेश वरमेतं वृणोम्यहम् ॥५८॥

शत्रुभिर्हृतराज्योऽहं प्राप्स्ये राज्यं स्वकं यथा ॥ तथा कुरु महादेव त्वयि भक्तिर्भवेन्मम ॥५९॥

शङ्कर उवाच ॥

तथास्तु नृपशार्दूल स्वराज्यं प्राप्स्यसेऽचिरात् ॥ इदं शक्त्यायुधं दिव्यं गृहाण नृपसत्तम ॥६०॥

इमां शक्तिं तव नृप दृष्ट्वा भीतास्तु शत्रवः ॥ विदीर्णहृदया भूत्वा पलायन्ते दिशो दश ॥६१॥
इति दत्वा वरं शम्भुस्तत्रैवान्तरधीयत ॥ राजा तु दारुणो नाम भार्यया सह सत्तमः ॥६२॥
वरं लब्ध्वा महेशात्तु शत्रून् जित्वा स्वकां पुरीम् ॥ सम्प्राप्य सकलां पृथ्वीं पालयामास पूर्ववत् ॥६३॥

नारद उवाच ॥

एवं गुहेश्वराख्यानं कथितं ते समासतः ॥ सर्वकामप्रदं नृणां किमन्यच्छ्रोतुमिच्छसि ॥६४॥
य इदं सर्वमाख्यानं शृणुयात्तु समाहितः ॥ सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥६५॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे कुमारेश्वरमहिमानुवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः २५ ॥  NEXT>>  श्लोक संख्या– ४८

## ॥ अग्निकुण्डं, ताम्रतलपर्वतं च ॥

संवर्तक उवाच ॥

आकाशगङ्गा भगवन् किमर्थं कन्यका सती ॥ पपात पर्वते तस्मिन् देवी त्रैलोक्यपावनी ॥१॥
उपयेमे कथं तां वै भगवान् वृषभध्वजः ॥ तन्मे विस्तरतो ब्रूहि गिरेस्तस्य च सत्तम ॥२॥
यदर्थं ताम्रतलता तन्मे वद महामुने ॥ ताम्रगौर्याः समुत्पत्तिं प्रभावं शंस नाम च ॥३॥

नारद उवाच ॥

शृणु गङ्गासमुत्पत्तिं गिरेस्तस्य च सत्तम ॥ यथा कल्याणमभवद्गङ्गाशङ्करयोर्मिथः ॥४॥
तथा ते सम्प्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ हव्यवाहः पुरा विप्र तपस्तेपे सुदुश्चरम् ॥५॥
तस्मिन् गिरौ सुरश्रेष्ठः सिद्धिकामः परात्परः ॥ ज्वालया सहितो देवो भृगुशापेन दुःखितः ॥६॥
तदा भृगुर्महातेजा अग्नित्वमकरोद्वशी ॥ दिव्यद्वादशवर्षाणि भृगुर्हव्यवहोऽभवत् ॥७॥
कव्यञ्च हव्यभूतानां स्वयमेव च भुक्तवान् ॥ तावत् कृशानुर्भगवान् गिरेस्तस्य द्विजोत्तम ॥८॥
अधोभागं प्रविश्यैव गिरेस्ताम्रतलस्य तु ॥ ऊर्ध्वमुत्क्षिप्य आत्मानं बिलं कृत्वा विधानतः ॥९॥
निवार्य वातं वर्षंच पद्मासनगतः शुचिः ॥ अज्ञातः सर्वभूतानां ध्यानमास्ते विभावसुः ॥१०॥
तच्छ्रुत्वा वचनं तस्य नारदस्य महामुनिः ॥ पुनः पप्रच्छ तं विप्रो नारदं मुनिपुङ्गवम् ॥११॥

संवर्तक उवाच ।

किमर्थं भृगुणा शप्तो हव्यवाहः पुरा द्विजः ॥ तद्ब्रूहि मुनिशार्दूल श्रोतुमिच्छा प्रवर्तते ॥१२॥

नारद उवाच ॥

शृणु वत्स प्रवक्ष्यामि कथां पापापनोदिनीम् ॥ एकदा भृगुपत्नी सा वह्निशालान्तरे स्थिता ॥१३॥

तां दृष्ट्वा तु पुलोमाख्यः वह्निवाक्याज्जहार ताम् ॥ तज्ज्ञात्वा भृगुणा शप्तो वह्निः सर्वगतः शुचिः ॥१४॥

सर्वभक्षो भव त्वं वै यस्मात् साक्षी भवानसि ॥ भृगोः शापं समागृह्य गत्वा ताम्रतलं गिरिम् ॥ १५॥

तपस्तेपे तदा वह्निर्लज्जयाऽधोगतः शुचिः ॥ दिव्यद्वादशवर्षाणि चचार सुचिरं तपः ॥१६॥

वायुभक्षो निराहारो नासाग्रन्यस्तलोचनः ॥ ततस्तुतोष भगवान् ब्रह्मा लोकपितामहः ॥१७॥

आगत्य तत्र वै ब्रह्मा यत्र हव्यवहः स्थितः ॥ दृष्ट्वा तं ज्वलनं प्राह धाता वचनमुत्तमम् ॥१८॥

तुष्टोऽस्मि तव भद्रन्ते वरं ब्रूहि यथेप्सितम् ॥ तच्छ्रुत्वा ब्रह्मणो वाक्यं पुनरप्याह तं द्विजः ॥१९॥

वह्नि रुवाच ॥

तव पुत्रेण देवेश शप्तोहं भृगणा पुरा ॥ सर्वभक्षो भव इति तस्य मोक्षं प्रसादय ॥२०॥

श्रुत्वा तु वचनं तस्य वह्निं प्राह तदा विधिः ॥

ब्रह्मोवाच ॥

द्विधा भव महातेजा मत्प्रसादाद्विभावसो ॥२१॥

ज्वालया दह्यता सर्वं ज्वालामाली भविष्यसि ॥ ज्वाला भक्ष्यति ते पुत्र सर्वभूतानि सर्वदा ॥२२॥

अदृश्यस्त्वं दिव्यमूर्तिर्मत्प्रसादाद्भविष्यसि ॥ त्वया कृतमिदं स्थानं ये पश्यन्ति विभावसो ॥२३॥

ते सर्वपापनिर्मुक्ता मुक्तिं यास्यन्ति वै ध्रुवम् ॥ मन्त्रादावाह्य सत्कृत्या हव्यं ये जुह्वति त्वयि ॥ २४॥

स आहारो भवत्याशु देवानां नान्यथागतिः ॥ कव्यं वा त्वयि देवेश मन्त्रात् क्षिप्तं विभावसो ॥ २५॥

स आहारः पितॄणां तु भवेच्च अमृतोपमः ॥ त्वमेवाग्ने मत्प्रसादात् सिद्धः सर्वगतो भव ॥२६॥

यावच्चरिष्यसे पुत्र भूतेषु सुरसत्तम ॥ तावज्जीवति तद्भूतं त्वद्वियोगे मरिष्यति ॥२७॥

त्वमात्मा मम वै पुत्र रुद्रस्त्वं विष्णुरेव च ॥ त्वामनाराध्य वै पुत्र न प्राप्यमिह किञ्चन ॥२८॥

स्वर्गावोऽथवा मोक्ष ऐश्वर्यं चापि पुत्रक ॥

नारद उवाच ॥

इत्थं प्राप्य वरानिष्टान् सिद्धिं प्राप्य विभावसुः ॥२९॥

तस्माद्बिलाद्विनिष्क्रम्य ब्रह्माणमिदमब्रवीत् ॥

वह्निरुवाच ॥

त्वत्प्रसादाद्देवदेव कृतार्थोऽस्मि पितामह ॥३०॥

अत्रागत्य सुरश्रेष्ठ ये यजन्ति नरोत्तमाः ॥ तेषां वै त्वत्प्रसादेन इष्टसिद्धिर्भवेदिति ॥३१॥

ब्रह्मोवाच ॥

मत्प्रसादात् सुरश्रेष्ठ त्वदुक्तञ्च भविष्यति ॥ कार्तिके मासि वै पुत्र पूर्वा नन्दा महातिथिः ॥३२॥

तव दत्ता मया वह्ने तिथीनामुत्तमा हि सा ॥ तस्मिन् दिने तव विभो पूजां यो वा करिष्यति ॥

३३॥

तस्याभिलषितं सर्वं मत्प्रसादाद्भविष्यति ॥ तस्मिन् दिने तु ये पुत्र स्नात्वा तीर्थे तव प्रभो ॥३४॥

घृतेन हविषा चैव समिद्भिश्च द्विजोत्तमाः ॥ मन्त्रेणानेन वै पुत्र आदित्योदयनं प्रति ॥३५॥

अग्नये स्वाहा ॥ वैश्वानराय स्वाहा ॥

अग्नये हव्यवाहनाय स्वाहा ॥ अग्नये कव्यवाहनाय स्वाहा ॥३६॥

इन्द्राग्निभ्यां स्वाहा ॥ ब्रह्मणे स्वाहा ॥ विश्वेभ्यो देवेभ्यः स्वाहा ॥३७॥

ब्रह्मणे स्वाहा ॥ व्याहृतिभिश्च ॥

एभिर्मन्त्रैः सुरश्रेष्ठ हुत्वाग्निं विधिवत् पुनः ॥३८॥

सर्वेषां दक्षिणां दद्याद्यथाशक्ति द्विजन्मने ॥ कुटुम्बिने दरिद्राय श्रोत्रियाय महात्मने ॥३९॥

एवं यः कुरुते तत्र तस्य कर्मक्षयो भवेत् ॥ अश्वमेधं क्रतुवरं यः करोति सदक्षिणम् ॥४०॥

स तत्फलमवाप्नोति मत्प्रसादान्न संशयः ॥ पितरस्तस्य वै पुत्र नाकपृष्ठं प्रयान्ति च ॥४१॥

तस्मिन् दिनत्रये स्नानं कृत्वा मत्परमो भवेत् ॥ तेषां त्रिजन्मचरितं पापं नश्यति तत्क्षणात् ॥४२॥

दानं होमञ्च पञ्चैव तस्मिन् कालेऽत्र वै सुत ॥ एकं कोटिर्भवत्याशु मत्प्रसादान्न संशयः ॥४३॥

इति तस्य वरं दत्वा ब्रह्मा लोकपितामहः ॥ तत्रैवान्तर्दधे देवः सह सिद्धैर्महात्मभिः ॥४४॥

अग्निकुण्डमिति प्रोक्तं तीर्थं तत्र विभावसोः ॥ शिरोधस्तात्तु सञ्जातं ताम्रवर्णमभूत्तलम् ॥४५॥

रहस्यं तन्न जानन्ति मनुष्याः पापकर्मिणः ॥ तस्मात्ताम्रतलाख्या हि पर्वतो द्विजसत्तम ॥४६॥

गिरिं ताम्रतलं चेति गोशृङ्गं चेति तं विदुः ॥ एतत्ते सर्वमाख्यातं गिरेस्ताम्रतलस्य तु ॥४७॥
माहात्म्यं सर्वपापघ्नं किमन्यच्छ्रोतुमिच्छसि ॥ स्त्र

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे ताम्रतलपर्वतवर्णनंनाम पञ्चविंशोऽध्यायः ॥
२५॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः २६ ॥  NEXT>>  श्लोक संख्या–५४

॥ ताम्रगौरीजननम्– शिवताम्रगौर्योः विवाहः– ताम्रगौरीनदी– ताम्रगौरीदेवी ॥

## ताम्रगौरीजननम्

संवर्तक उवाच ॥

तस्मिन् गिरौ द्विजश्रेष्ठ किमर्थं जह्नुनन्दन ॥ पपाताकाशगा विप्र तन्मे वद महामुने ॥१॥
किमर्थं चकमे तां वै देवदेवः पिनाकधृक् ॥

नारद उवाच ॥

शृणु तस्यास्तथोत्पत्तिं गङ्गयाश्च द्विजोत्तम ॥२॥
ब्रह्मा चतुर्मुखः पूर्वं सिद्धिकामः प्रजापतिः ॥ बद्धपद्मासनो देवः संयतात्मा जितेन्द्रियः ॥३॥
निर्मलेनैव मनसा ध्यानमास्ते द्विजोत्तम ॥ पद्मासनस्थितस्यास्य ध्यायतः परमेष्ठिनः ॥४॥
उत्ताने दक्षिणे पाणौ बभूव वरवर्णिनी ॥ तां दृष्ट्वा भगवान् ब्रह्मा प्रीतिमानभवत्तदा ॥५॥
शुद्धस्फटिकसङ्काशां निर्मलां शुद्धवाससम् ॥ कमण्डलौ निधायैव सर्वतीर्थमयीं शिवाम् ॥६॥
तामाह भगवान् ब्रह्मा रुद्रकान्ता भविष्यसि ॥ ततः सा चकमे तं वै रुद्रं त्रिभुवनेश्वरम् ॥७॥
गोकर्णस्य तु चोत्पत्तिं पातालात् परमेशितुः ॥ तस्य क्षेत्रमिति ज्ञात्वा चोत्पपात गिरौ तदा ॥८॥
दिव्यस्वरूपिणी देवी सर्वाभरणभूषिता ॥ एकाकिनी ताम्रतले गिरौ गङ्गा चचार ह ॥९॥
ध्यायन्ती परमेशानं सर्वधातारमव्ययम् ॥

## शिवताम्रगौर्योः विवाहः

ततो गङ्गाहृदिस्थं तु ज्ञात्वा विश्वेश्वरः शिवः ॥१०॥
सत्वरो वृषभारूढः प्रायात् गोशृङ्गपर्वतम् ॥ तां ददर्श महादेवो गङ्गां त्रिपथगां शिवाम् ॥११॥
गोशृङ्गे पर्वते विप्र दिव्यरूपां महानदीम् ॥ सा तु दृष्ट्वा जगन्नाथं शूलपाणिं त्रिलोचनम् ॥१२॥

ननाम शिरसा भक्त्या कम्पमाना लतेव सा ॥ लज्जयाऽधोमुखीभूत्वा मनसा प्रणता स्थिता ॥१३॥
तस्या रूपं समीक्ष्यैव भगवानीश्वरोपि सन् ॥ तस्यां प्रविष्टभावस्तु प्रसन्नस्तामुवाच ह ॥१४॥
कासि भद्रे कुतश्चासि कस्यासि दयिता शुभे ॥ किमर्थं चेह कल्याणि गिरौ चरसि भामिनि ॥१५॥
त्वयि भावप्रविष्टोहं तस्मात् पृच्छामि शोभने ॥ इति तस्य वचः श्रुत्वा कन्या कमललोचना ॥१६॥
वेपमाना महाभागा गङ्गा भागीरथी द्विज ॥ लज्जयाऽधोमुखी भूत्वा कृताञ्जलिपुटा तदा ॥१७॥
तमुवाचानवद्याङ्गी रुद्रं सा रमणी तदा ॥

गङ्गोवाच ॥

मम त्वं देवदेवेश वृत्तांतं ज्ञातुमर्हसि ॥१८॥
ध्यानमात्रेण रुद्र त्वं सर्वभूतात्मको ह्यसि ॥ इत्युक्तः स तया देवो दध्यौ चान्तर्मनश्चिरम् ॥१९॥
ज्ञात्वा कमण्डलोः कस्य सञ्जातां लोकपावनीम् ॥ कन्यां कमलपत्राक्षीं चात्मार्थे परिकल्पिताम् ॥२०॥
दृष्ट्वा तुतोष भगवान् तामाहेदं पिनाकधृक् ॥ विदितं तव कल्याणि सर्वमागमनं मया ॥२१॥
महता तपसा भद्रे विरिञ्चेन विनिर्मिता ॥ मदर्थं मन्दगमने एहि मत्प्रियमाचर ॥२२॥
इत्युक्त्वा देवदेवस्तां गङ्गां त्रिपथगां पुनः ॥ पस्पर्श पाणिना चैव तस्या गात्रं सुशोभनम् ॥२३॥
सा लज्जमाना भीता च वेपन्ती कदली यथा ॥ शनैर्भर्तारमाहेदं कन्यकास्मि सुरोत्तम ॥२४॥
धर्मस्य चाविरोधेन प्रसीद सुमुखो भव ॥ इति तस्याः वचः श्रुत्वा भगवान् वृषभध्वजः ॥२५॥
सस्मारात्मभुवं देवो ब्रह्माणं विष्णुमेव च ॥ तस्य तन्मतमाज्ञाय ब्रह्मा लोकपितामहः ॥२६॥
विष्णुना सहितः प्राप तं देशं सुरपूजितम् ॥ सम्प्राप्य शम्भुं स ब्रह्मा तदा वचनमब्रवीत् ॥२७॥
महता तपसा गङ्गा त्वदर्थं निर्मिता मया ॥ तस्माद्गृहाण शम्भो त्वं अस्यास्तु करपङ्कजम् ॥२८॥
मदाज्ञया त्वियं देवी शुश्रूषां ते करिष्यति ॥

नारद उवाच ॥

इत्युक्त्वा भगवान् ब्रह्मा सस्माराप्सरसस्तदा ॥२९॥
गन्धर्वान् लोकपालांश्च सप्तर्षीनपि सत्तम ॥ स्मृतमात्रेण धात्रा ते तं गिरिं समुपागमन् ॥३०॥
देवा यक्षा दिक्पतयो गन्धर्वाः सिद्धचारणाः ॥ सप्तर्षयश्चाप्सरसस्तथान्ये मुनयोऽमलाः ॥३१॥
नागाः सुपर्णाः रक्षांसि त्रैलोक्यं सचराचरम् ॥ ततो ब्रह्मा जगत्स्रष्टा देवैर्ऋषिगणैः सह ॥३२॥
आश्विने मासि विप्रर्षे कृष्णपक्षे चतुर्दशी ॥ तस्यां स्वात्यृक्षयुक्तायां इन्दुवारे पितामहः ॥३३॥

यथाविधि यथान्यायं ददौ गङ्गां पिनाकिने ॥ वेदवाक्यं जगुर्विप्रा ननृतुश्चाप्सरोगणाः ॥३४॥
ये चान्ये चागतास्तत्र सर्वे तमुपतुष्टुवुः ॥ देवदुन्दुभयो नेदुर्गन्धर्वा ललितं जगुः ॥३५॥
ववौ वायुः सुखस्पर्शो निर्मलं चाभवन्नभः ॥ पुष्पवृष्टिं तदा देवा मुदा तत्र ववर्षिरे ॥३६॥
एवं विवाहं निर्वर्त्य ब्रह्मणोऽनुज्ञया सुराः ॥ ये चान्ये चागतास्तत्र सर्वे जग्मुर्यथागतम् ॥३७॥
ततो ब्रह्मा स्वभवनं विष्णुना सहितो ययौ ॥ ततः प्रभृत्यसौ विप्र गिरिर्वैवाहिकोऽभवत् ॥३८॥
गौरीति नाम तस्यास्तु ताम्रनाम्नि गिरौ च्युता ॥ यतश्चचार तस्मिन् सा ताम्रगौरीं ततो विदुः
॥३९॥

---

## ताम्रगौरीनदी

ततः सा ताम्रगौरी तु द्विधा भूता भवत्तदा ॥ नदीरूपेण सा देवी सर्वपापापनोदिनी ॥४०॥
निर्गम्य ताम्रतलतो बहुतीर्थसमन्विता ॥ गत्वा सा दक्षिणामाशां क्रोशार्धं सा सुपार्वती ॥४१॥
सङ्गम्य तीर्थैः सा देवी तीर्थानामुत्तमा सती ॥ निवृत्य चोत्तरं किञ्चिद्रुद्रयोनिं जगाम ह ॥४२॥
रुद्रयोन्यभितो गत्वा पितृस्थालीं समासदत् ॥ सर्वतीर्थानि सङ्गम्य समुद्रं प्रविवेश ह ॥४३॥
पृथिव्यन्तस्थतीर्थानि पातालनिलयान्यपि ॥ अन्तरिक्षगतान्येव ताम्रगौर्यां वसन्ति हि ॥४४॥
तस्मात् तीर्थवरा सा तु नदीनामुत्तमा नदी ॥ पिण्डं तिलोदकं चापि ह्यत्र स्नात्वा करोति यः ॥४५॥
पितरस्तस्य सन्तुष्टा नरकस्था अपि द्विज ॥ तृप्ताः स्वर्गं गमिष्यन्ति नात्र कार्या विचारणा ॥४६॥
पौर्णमास्यां च ये चात्र स्नात्वा चार्चन्ति शङ्करम् ॥ तेषां त्रिजन्मचरितं पापं नश्यत्यसंशयम्
॥४७॥
पशुपक्षिमृगा वैतज्जलस्पर्शनमात्रतः ॥ सर्वपापविनिर्मुक्तास्तेपि यान्ति कृतार्थताम् ॥४८॥
मनुजस्य च विप्रेन्द्र भवतीति किमद्भुतम् ॥

---

## ताम्रगौरीदेवी

नारद उवाच ॥

अन्यद्रूपेण सा देवी दिव्यस्त्रीरूपधारिणी ॥४९॥
ताम्रगौरीनदीतीरे रुद्रेण सह संस्थिता ॥ तोषयन्ती शिवं साक्षात् गौरी प्राङ्मुखतः सदा ॥५०॥
दिव्यरूपधरां देवीं येऽर्चयन्ति नरा भुवि ॥ तेषामभीप्सितं देवी ददात्येव न संशयः ॥५१॥
सकृदर्चनमात्रेण सर्वपापैः प्रमुच्यते ॥ भुक्त्वा भोगाननेकांश्च स याति परमां गतिम् ॥५२॥

इदं पुण्यतमाख्यानं ये शृण्वन्ति जना भुवि ॥ तेषां माङ्गल्यलाभश्च भवत्येव न संशयः ॥५३॥
एषा ते हि समाख्याता गंङ्गायाः पावनी कथा ॥ अग्निपुत्र महाभाग किमन्यच्छ्रोतुमिच्छसि ॥५४॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे गङ्गाशङ्करयोः विवाहकथनं नाम षड्विंशोऽध्यायः ॥२६॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः २७ ॥  NEXT>>  श्लोक संख्या– ९०

॥ ताम्रगौर्यामस्थिनिक्षेपणफलवर्णनम्– उन्मूचुकथा– चित्रबाहुकथा ॥

## ताम्रगौर्यामस्थिनिक्षेपणफलवर्णनम्

संवर्तक उवाच ॥

ताम्रगौर्यास्तु माहात्म्यं श्रोतुं कौतूहलं हि मे ॥ वर्तते मुनिशार्दूल त्वं समाख्यातुमर्हसि ॥१॥

नारद उवाच ॥

ताम्रगौर्यास्तु माहात्म्यं शृणु पापहरं परम् ॥ रहस्यमेतद्देवानामृषीणामपि सत्तम ॥२॥
अस्थिनिक्षेपणं येऽत्र ताम्रगौर्या जलेऽमले ॥ कुर्युस्ते मनुजा लोके सर्वपापविवर्जिताः ॥३॥
अस्थिनिक्षेपणं येऽत्र ताम्रगौर्या जले शुभे ॥ तावत् स्वर्गे महीयन्ते दिव्यभोगोपभोगिनः ॥४॥
पश्चाद्भूलोकमासाद्य साम्राज्यमनुभूय च ॥ पुत्रपौत्रैश्च संयुक्ताः पश्चान्मोक्षं व्रजन्ति वै ॥५॥

## उन्मूचुकथा

अत्रार्थे कथयिष्यामि इतिहासं पुरातनम् ॥ शृणुष्वैकमना विप्र संवर्तक महामुने ॥६॥
उन्मूचुर्नाम राजासीत् पुरा प्राचेतसान्तरे ॥ स सर्वराज्यमकरोत् प्रजानां द्रोहकृत् खलः ॥७॥
तस्य पापेन महता प्रजा आसन्नुपद्रुताः ॥ चमसो नाम तत्पुत्रो धर्मात्मा शंसितव्रतः ॥८॥
पितर्युपरते विप्र किञ्चित् शोकसमन्वितः ॥ स संस्कारं पितुः कुर्वन् वनमायाच्च सर्त्विजः ॥९॥
ततोऽन्तरिक्षे शुश्राव पितॄणां भारतीं नृपः ॥ पित्रा तव महाभाग नृशंसेन दुरात्मना ॥१०॥
प्राप्ताः सुनरकं सर्वे पुनरावृत्तिवर्जितम् ॥ तस्मादस्मद्धितार्थाय गृहीत्वा च पितुः शवम् ॥११॥
गच्छ गोकर्णमद्यैव सभृत्यः सपुरोहितः ॥ तत्र गत्वा तु संस्कारं पितुः कुरु विधानतः ॥१२॥
अस्थिनिक्षेपणं तत्र ताम्रगौर्यां कुरुष्व भो ॥ इत्युक्त्वा पितरस्तस्य तत्रैवादर्शनं गताः ॥१३॥
तच्छ्रुत्वा चमसस्तूर्णं पितॄणां वचनं द्विज ॥ तत्रैव गतवान्राजा पितॄणां वाक्यगौरवात् ॥१४॥

तस्यास्थिसञ्चयं चक्रे ताम्रगौर्यां नृपोत्तमः ॥ तत्प्रभावात् क्षयं जग्मुः पापानि सुबहून्यपि ॥१५॥
स्वर्गं प्राप्तः क्षणादेव उन्मूचुः पितृभिः सह ॥ यावदस्थीनि जन्तूनां ताम्रगौर्यां वसन्ति हि ॥१६॥
तावत् स्वर्गान्न च्यवन्ति संवर्तक न संशयः ॥ यथा काश्यां मृतो जन्तुः स्वर्गं गच्छत्यनामयः
॥१७॥
तथा गोकर्णमरणे देवत्वं च भवेद्ध्रुवम् ॥

## चित्रबाहुकथा

नारद उवाच ॥

पुनश्च श्रूयतां विप्र आख्यानं महदद्भुतम् ॥१८॥
पूर्वगङ्गानदी सेयं प्रभावाद् द्योतिता शुभा ॥ गंङ्गा भागीरथी पुण्या त्रिषु लोकेषु विश्रुता ॥१९॥
ताम्रगौरीति विख्याता गोकर्णे पापहारिणी ॥ तस्यास्तीरे तु महति वर्तन्ते तापसाश्रमाः ॥२०॥
नित्यस्वाध्यायसंयुक्तषट्कर्मनिरतद्विजाः ॥ नित्याग्निहोत्रनिरतब्राह्मणाः सन्ति तत्र हि ॥२१॥
नित्याध्वराग्निधूमेन पवित्रितदिगन्तराः ॥ मीमांसाशास्त्रनिरतब्रह्मवृन्दैरलङ्कृताः ॥२२॥
शिष्यानुपनिषद्भाष्यान् व्याकुर्वद्भिर्द्विजोत्तमैः ॥ यमाद्यष्टाङ्गयोगज्ञसिद्धसङ्घसमन्विताः ॥२३॥
साक्षात्कृत्य शिवं स्वान्ते समाधिनिरता द्विजाः ॥ ब्रह्माहंभावमुदिता जीवन्मुक्ता महीसुराः ॥२४॥
तपोवनानि रम्याणि तपस्विनिलयानि च ॥ चम्पकाशोककादम्बपूगपुन्नागआम्रकैः ॥२५॥
पनसैर्नालिकेरैश्च फलभारविनम्रकैः ॥ सर्वर्तुफलसंयुक्तैर्वृक्षैर्नानाविधैरपि ॥२६॥
कल्पद्रुमाद्यैरपि च शोभितानि द्विजोत्तम ॥ मृगैर्नानाविधैश्चैव व्याघ्रभल्लूकसूकरैः ॥२७॥
स्वजातिवैरमुत्सृज्य अन्योन्यस्नेहसंयुतैः ॥ सङ्क्रीडद्भिर्मृगैश्चैव गोभिर्व्याघ्रैर्युतानि च ॥२८॥
लसत्कुमुदकह्लारकमलोत्पलमण्डितैः ॥ मञ्जुकूजद्विहङ्गैश्च सरोभिर्विशदोदकैः ॥२९॥
भूषितानि द्विजश्रेष्ठ चकासन्ति वनानि च ॥ तद्वनेषु च वर्तन्ते वानरा बहवस्तथा ॥३०॥
फलपक्वानि खादन्तः पादपेषु चरन्ति च ॥ तत्रैकमाश्चर्यमिदं शृणु जातं नरोत्तम ॥३१॥
स्थविरो वानरः कश्चित् वृक्षाग्रेषु च तत्र वै ॥ पर्यटन् पक्वलोभेन प्रमादात् पतितो भुवि ॥३२॥
शिलातलेऽतिमहति भग्नपादशिरोभुजः ॥ रुधिरासिक्तसर्वाङ्गो मूर्च्छामाप स वानरः ॥३३॥
मुहूर्तमात्रात् संज्ञां वै लब्ध्वा चोन्मील्य लोचने ॥ आत्मनात्मानमाश्वास्य समन्तादवलोकयन्
॥३४॥

तस्मादुत्थाय शनकैर्महतः स शिलातलात् ॥ ताम्रगौरीतटभुवं शनैर्वृक्षमथारुहत् ॥३५॥
शाखान्तरे निविष्टः स तत्र स्वाङ्गव्रणातुरः ॥ असहन् वेदनां विप्र तत्र प्राणैर्वियोजितः ॥३६॥
ततः कतिपयाहस्सु गतेषु द्विजसत्तम ॥ शिरोभागोऽपतत्तस्य ताम्रगौर्याऽमले जले ॥३७॥
शेषाङ्गं संस्थितं वृक्षशाखायामेव सुव्रत ॥ प्रक्षालितं चोत्तमाङ्गं तस्य केवलमम्भसि ॥३८॥
तेन पुण्येन महता वानरः स द्विजोत्तम ॥ कस्मिंश्चिदुत्तरे देशे चित्ररूपाख्यभूपतेः ॥३९॥
क्षेत्रे जातः कुमारोऽभूच्चित्रबाहुरिति श्रुतः ॥ मुखमात्रमभूत्तस्य कमनीयं नराकृति ॥४०॥
शेषं सर्वाङ्गमपि वै वानराकारमद्भुतम् ॥ पुत्रोत्सवो जात इति पुरोहितमुखाद्द्विज ॥४१॥
श्रुत्वा राजा चित्ररूपः सद्यश्चोत्थाय संसदः ॥ प्रविश्यान्तःपुरं शीघ्रं गत्वा तत्सूतिकागृहम् ॥४२॥
आलोकयामास तदा कुमारमुखपङ्कजम् ॥ हृष्टोऽभूच्छिष्टसर्वाङ्गं दृष्ट्वा किञ्चित् सुदुर्मनाः ॥४३॥
अलङ्घनीया नियतिर्भोक्तव्यं च पुराकृतम् ॥ अन्यथा न भवेदेवं चिन्तयित्वा स भूपतिः ॥४४॥
जातक्रियादि कर्माणि कल्पयामास तस्य वै ॥ दिनेषु गच्छत्सु ततो कुमारः स व्यवर्धत ॥४५॥
चित्ररूपः स राजर्षिश्चिन्तयामास चाकुलः ॥ राज्यादिभोगसामग्री विद्यते मयि सर्वदा ॥४६॥
न मया वंचितः कश्चिद्विधात्रा वञ्चितोऽस्म्यहम् ॥ पुत्रमेवं विधं कृत्वा विधाता मां दुनोति च
॥४७॥
मुखं यथा ससर्जास्य तथा शेषं न सृष्टवान् ॥ ईदृशस्तनयो जातः को वा भाग्यविपर्ययः ॥४८॥
रूपाकृतिभ्यां कान्त्या च पुत्रमात्मसमं गुणैः ॥ अलब्ध्वा मम राज्येन भोगैर्वा किं प्रयोजनम्
॥४९॥
ममाङ्गसम्भवस्यास्य निदानं योऽन्यथाऽऽकृतेः ॥ ज्ञात्वा सम्यङ्गरो ब्रूयाद्दास्ये तस्य यथेप्सितम् ॥५०॥
सर्वशास्त्रार्थविद्वांसं विप्रं दृष्ट्वा तदुक्तितः ॥ करिष्यामि प्रतीकारं इति सञ्चिन्त्य भूमिपः ॥५१॥
ज्योतिःशास्त्रविदो विप्रान्नानाशास्त्रेषु कोविदान् ॥ श्रौतस्मार्तार्थतत्वज्ञान् स्वाश्रमाचारवर्तिनः
॥५२॥
तान् सर्वतः समानाय्य सत्कारैः समपूजयत् ॥ भक्तिनम्रोऽब्रवीद्राजा द्विजातिजनसंसदि ॥५३॥

चित्ररूप उवाच ॥

भवन्तः सर्व एवैते ब्राह्मणा ब्रह्मरूपिणः ॥ सर्वशास्त्रपरिज्ञानविशदा विमलाशयाः ॥५४॥
अवधार्य मयोक्तं यत् प्रसादं कर्तुमर्हथ ॥ मम राज्यैश्वैर्यमिदं भोगाः सन्ति मनोरमाः ॥५५॥
तथाप्यहं पुत्रतनौ विकृतिं वीक्ष्य दुःखितः ॥ अत्र मे कारणं ब्रूत विधास्ये तां प्रतिक्रियाम् ॥५६॥

राज्ञस्तु वचनं श्रुत्वा सर्वे ते ब्राह्मणोत्तमाः ॥ आलोक्य सर्वशास्त्राणि तदर्थांश्च मुहुर्मुहुः ॥५७॥
परामृशन्तस्तद्धेतुं सम्यङ्निर्धार्य शंसितुम् ॥ न शेकुस्ते द्विजश्रेष्ठास्तदाऽभूद्दुर्मना नृपः ॥५८॥
वसनाशनपानादिविषयेष्वरतिः सदा ॥ चिन्ताकुलमना राजा सुभृशं दैन्यमास्थितः ॥५९॥
एतस्मिन्नन्तरे काले कश्चित् सिद्धवरः पुमान् ॥ यदृच्छया चरन् भूमौ तत्पुरं समपद्यत ॥६०॥
अतीतानागतान् वक्ता राज्ञे विप्रैर्निवेदितः ॥ तं दृष्ट्वा सिद्धपुरुषं राजा चाभ्यर्च्य भक्तितः ॥६१॥
सन्तोषयित्वा च सर्वज्ञमासीनं परमासने ॥ आत्मनश्चिन्तितं तस्मै विज्ञाप्यैवं स्थितो नृपः ॥६२॥
राज्ञो विज्ञापनं श्रुत्वा दौर्मनस्यं च तादृशम् ॥ वीक्ष्य सिद्धश्चिरं दध्यौ निमीलितविलोचनः ॥६३॥
ज्ञात्वा तत्कारणं विद्वानब्रवीत्तं द्विजोत्तम ॥ त्यज राजन् मनस्तापं शृणु तत्कारणं ब्रुवे ॥६४॥
गोकर्णाख्ये महाक्षेत्रे रुद्रयोन्यास्तु पूर्वतः ॥ अवतीर्णा पुण्यनदी ताम्रगौरीति विश्रुता ॥६५॥
द्विधा कृत्वा स्वमात्मानं सार्धं रुद्रेण संस्थिता ॥ एकांशेन महादेवी दिव्यस्त्रीरूपधारिणी ॥६६॥
शिवप्रीतिकरी नित्यमास्ते स्वस्य शुभे तटे ॥ अन्यांशेन नदीभूत्वा सर्वपापविनाशिनी ॥६७॥
तस्या रोधोभवे वृक्षे मृतः कश्चित् कपिर्जरन् ॥ चिराच्च्युतं तस्य शिरो निमग्नं तत्र चाम्भसि ॥६८॥
शेषाङ्गं वृक्ष एवास्ते क्षालनाच्छिरसः कपिः ॥ महत्पुण्यं प्राप्य क्षेत्रे तव जातस्तु औरसः ॥६९॥
पुत्रोभून्मुखमेवास्य नराकृति महीपते ॥ वृक्षस्थशेषाङ्गतया तव पुत्रो विरूपितः ॥७०॥
एतत्कारणमेवात्र विद्धि नान्यं नृपोत्तम ॥

नारद उवाच ॥

इत्याकर्ण्याब्रवीद्राजा महान्तं सिद्धपूरुषम् ॥७१॥

चित्ररूप उवाच ॥

सर्वज्ञोऽसि महायोगिन्नाश्चर्यं वदसि प्रभो ॥ अतः परं ममाभीष्टं यथा सिद्ध्येत् तथा कुरु ॥७२॥
तदाकर्ण्य नृपं प्राह योगी स द्विजसत्तम ॥

सिद्धोवाच ॥

शीघ्रं गच्छन्तु भवता प्रेषिता मन्त्रिणस्तव ॥७३॥
पुरोहिताश्च ये विप्रा गोकर्णं प्रति भूपते ॥ ताम्रगौर्याः समीपस्थवृक्षस्थं वानराङ्गकम् ॥७४॥
विकृष्य विक्षिपेयुस्तत् ताम्रगौर्याः शुभेऽम्भसि ॥ ततस्ते मनसोऽभीष्टं सिद्ध्येत्तत्र न संशयः ॥७५॥
इति सञ्चोदितस्तेन राजा मन्त्रिपुरोहितान् ॥ सभृत्यांच्छीघ्रगान् दक्षानाप्तांश्चैव व्यसर्जयत् ॥७६॥

राज्ञादिष्टा हि ते सर्वे गोकर्णं प्राप्य सत्तम ॥ ताम्रगौरीवृक्षगतं कपेरङ्गं समीक्ष्य च ॥७७॥
तदाकृष्याशु च प्रास्यन् तस्या एवाम्भसि द्विज ॥ सद्यः स राजपुत्रोऽभून्नृदेही भास्करो यथा ॥७८॥
तेजस्वी च यशस्वी च पितुर्नयननन्दनः ॥ राजलक्ष्मीनिवासश्च कुमारः समपद्यत ॥७९॥
तस्मिन् क्षणे चित्ररूपो बभूवानन्दनिर्भरः ॥ तन्मातरश्च सर्वास्ताः शुद्धान्तवनितास्तथा ॥८०॥
कुमारं तं परिष्वज्य परं हर्षमवाप्नुवन् ॥ तदाश्चर्यं महद्दृष्ट्वा चित्ररूपो महामनाः ॥८१॥
ननाम तं योगिवरं प्रसाद्य च पुनः पुनः ॥ गोकर्णक्षेत्रमाहात्म्यं ताम्रगौर्या विशेषतः ॥८२॥
तस्मात् सिद्धवरादेव श्रुत्वा च द्विजसत्तम ॥ अत्याश्चर्ययुतो राजा ताम्रगौरीं प्रणम्य च ॥८३॥
मनसैव च तत्क्षेत्रं प्रशशंस द्विजोत्तम ॥ ततः सिद्धवरो विप्र पूजां सङ्गृह्य भूमिपात् ॥८४॥
ययौ सिद्धवरः सोऽथ तत्पुरादिद्वजसत्तम ॥ ततः स राजा धर्मात्मा चित्ररूपो महीपतिः ॥८५॥
पुत्रे राज्यधुरं न्यस्य सस्त्रीकः सपुरोहितः ॥ गोकर्णक्षेत्रमासाद्य ताम्रगौर्यां विगाह्य च ॥८६॥
तत्र स्थितेषु तीर्थेषु स्नात्वा श्रद्धासमन्वितः ॥ महाबलं पूजयित्वा जप्त्वा पञ्चाक्षरं मनुम् ॥८७॥
स्थित्वा तु सुचिरं कालमन्ते निर्वाणमाप्तवान् ॥

नारद उवाच ॥

ताम्रगौरीजलस्पर्शमात्रेणैव द्विजोत्तम ॥८८॥
वानरोपि नरेन्द्रोऽभूत् लेभे चैवातुलां श्रियम् ॥ ताम्रगौरीजलस्नानं कांक्षते विबुधा अपि ॥८९॥
सर्वतीर्थमयी गङ्गा ताम्रगौरी न संशयः ॥ ताम्रगौर्यास्तु माहात्म्यं श्रुतमात्राघनाशनम् ॥९०॥
कथितं ते द्विजश्रेष्ठ किमन्यच्छ्रोतुमिच्छसि ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे ताम्रगौर्यां अस्थिनिक्षेपवर्णनंनाम सप्तविंशोऽध्यायः ॥२७॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः २८ ॥  NEXT>>  श्लोक संख्या– ६०

## ॥ अमृतेश्वर, विधूतपापस्थाली ॥

संवर्तक उवाच ॥

यानि यानि च तीर्थानि ताम्रगौर्यां वसन्ति च ॥ तानि पुण्यानि ते ब्रह्मन् यथावद्वक्तुमर्हसि ॥१॥

नारद उवाच ॥

अशक्यं हि मया वक्तुं सर्वं वर्षशतैरपि ॥ तस्मात् प्रधानं वक्षामि निबोध द्विजसत्तम ॥२॥
सङ्गमे ताम्रगौर्यास्तु समुद्रस्य च सत्तम ॥ विधूतपापस्थालीति स्थानं त्रैलोक्यविश्रुतम् ॥३॥
तस्याधस्तात् द्विजश्रेष्ठ गवां माताऽमृतस्रवा ॥ ब्रह्मणो मानसात्तात जाता पूर्वमनिन्दिता ॥४॥
जात मात्रेण सा देवी सुरभिस्तं पितामहं ॥ प्रणम्योवाच वचनं स्थानं मे सम्प्रदीयताम् ॥५॥
इति तस्य वचः श्रुत्वा ब्रह्मा प्रोवाच तां पुनः ॥

ब्रह्मोवाच ॥

अयि पुत्रि महाभागे पाताळे परमेश्वरः ॥६॥
पूर्वं मया समुत्पन्नः आस्ते तं याहि शोभने ॥ तं प्रार्थय वरारोहे स ते स्थानं विधास्यति ॥७॥
इति तद्वचनं श्रुत्वा पाताळं सुरभिर्ययौ ॥ सर्वदेवमयी देवी लोकानुग्रहकारिणी ॥८॥
तस्याः क्षीरेण वै विप्र क्षीराब्धिः समजायत ॥ तं निर्मथ्य सुरैर्ब्रह्मन् असुरैश्च महामुने ॥९॥
अमृतं लब्धवान् विष्णुर्दिव्यं लिङ्गं च शोभनम् ॥ देवानां प्रददौ विष्णुरमृतं द्विजसत्तम ॥१०॥
तत्पीत्वा विबुधाः सर्वे अमरा जज्ञिरे सुराः ॥ अमृतं नाम तल्लिङ्गं देवैरपि सुपूजितम् ॥११॥
तस्मात् सर्वात्मिका विप्र कामधेनुर्न संशयः ॥ सा पाताळगता देवी सुरभिर्ब्रह्मणः सुता ॥१२॥
ददर्श परमेशानं ववन्दे वृषभध्वजं ॥ तां दृष्वा शङ्करः प्रीतः सुरभिं सुरपूजिताम् ॥१३॥
उवाच देवदेवेशः प्रणतामग्रतस्थिताम् ॥

रुद्र उवाच ॥

उतिष्ठोतिष्ठ भद्रन्ते प्रीतोऽस्मि तव दर्शनात् ॥१४॥
किमिच्छसि वरारोहे तद्ददाम्यविलम्बितम् ॥ तच्छुत्वा वचनं शम्भोः सुरभिर्वाक्यमब्रवीत् ॥१५॥

सुरभिरुवाच ॥

सृष्टा हि ब्रह्मणा देव मनसा पद्मजन्मना ॥ मामुवाच स देवेशो पाताळं गच्छ शीघ्रतः ॥१६॥
मया पूर्वं समुत्पन्नो रुद्रस्त्रिभुवनेश्वरः ॥ स पाताळं गतः पुत्रि वर्तते शङ्करः स्वयम् ॥१७॥
तं गच्छ देवदेवेशं स ते स्थानं विधास्यति ॥ इति तस्य वचः श्रुत्वा नमस्कृत्वा पितामहम् ॥१८॥
आगताहं सुरगुरो त्वामद्य पुरुषोत्तम ॥ किङ्करोमि जगन्नाथ स्थानं मे सम्प्रकल्पय ॥१९॥

नारद उवाच ॥

इति तस्या वचः श्रुत्वा तामाह वृषभध्वजः ॥ अत्र स्थेयं त्वया भद्रे पाताळे सुरनन्दिनि ॥२०॥
त्वया जगदिदं देवि त्रैलोक्यं सचराचरम् ॥ रक्षितव्यं महाभागे औरसं मातृवच्छुभे ॥२१॥

सुरभिरुवाच ॥

देवदेव नमस्तेऽस्तु नमस्ते त्रिपुरान्तक ॥ कालान्तक नमस्तेऽस्तु नमस्ते शूलपाणिने ॥२२॥
त्वया सहासितुं देव इच्छामि भुवनेश्वर ॥

शङ्कर उवाच ॥

अस्योपरि महाभागे भूतळे भूतधारिणि ॥२३॥
गोकर्णमिति विख्यातं क्षेत्रं सर्वसुरार्चितम् ॥ स्थितं तत्र महाभागे तद्गन्तव्यं त्वयाऽनघे ॥२४॥
तत्र त्वं वस भद्रन्ते मया सार्धमनिन्दिते ॥ हवींषि सर्वदेवानां तत्रस्था त्वं प्रदास्यसि ॥२५॥
स्वधां पितृभ्यः कल्याणी अक्षय्यं प्रापयिष्यसि ॥ विष्णुहस्ते स्थितं लिङ्गं दिव्यं सुरगणार्चितम्
॥२६॥
अमृतोत्थं त्वया भद्रे गृहीत्वा वरवर्णिनि ॥ गोकर्णे स्थाप्य विधिवत् पूजनीयं त्वयानघे ॥२७॥
सा तथेति प्रतिज्ञाय शङ्करस्य निदेशतः ॥ विष्णुहस्ते स्थितं लिङ्गं समाधाय च भक्तितः ॥२८॥
गोकर्णक्षेत्रमासाद्य तपोवृद्धिकरं परम् ॥ तत्र पारे समुद्रस्य पश्चिमस्य मनोहरे ॥२९॥
पापस्थाल्यां दिव्यदेहा वरस्त्रीरूपधारिणी ॥ सन्नियम्येन्द्रियग्रामं चचार सुमहत्तपः ॥३०॥
सर्वौषधिरसोद्भूततरङ्गात् क्षीरसागरात् ॥ अमृतार्थं मथ्यमानात् सुरैरप्यसुरैरपि ॥३१॥
मन्दराचलमन्थानपरिवर्तनलोहितात् ॥ समुद्भूतं महल्लिङ्गं दिव्यं सर्वमयात्मकम् ॥३२॥
परितः प्रस्फुरत्कार्तस्वरबिन्दुपरिष्कृतम् ॥ आराधितं पुरा देवैर्विष्णुना प्रभविष्णुना ॥३३॥
प्रतिष्ठाप्य यथान्यायममृतेश्वर नामकम् ॥ चिराय पूजयामास त्रिसन्ध्यं रुद्रसिद्धये ॥३४॥
दिव्यं वर्षसहस्रन्तु वायुभक्षा बभूव ह ॥ घोरेण तपसा तस्यास्तुष्टः स भगवान् हरः ॥३५॥
आविर्बभूव तल्लिङ्गात् विष्णुना सह शङ्करः ॥ तौ दृष्ट्वा देवदेवेशौ ववन्दे सुरभिर्द्विज ॥३६॥
नमस्कृत्वा तदा देवौ स्थिता प्राञ्जलिरग्रतः ॥ तामूचतुर्जगन्नाथौ किमिच्छसि शुभे वद ॥३७॥
वरं दद्वस्तव शुभे यद्यपि स्यात् सुदुर्लभम् ॥ इति प्रवादिनौ तौ च देवदेवौ पिनाकिनौ ॥३८॥
सा प्रणम्य वरं वव्रे विरम्य सदभीप्सितम् ॥ स्वदेहात्तस्य सा देवी पयसो देवयोग्यताम् ॥३९॥
तल्लिङ्गपूजकानां च महतीं श्रियमेव च ॥ शिवस्य विष्णोः सान्निध्यं भार्याभ्यां सह सर्वदा ॥४०॥
सिद्धिमिच्छामि देवेशौ परां युष्मत्प्रसादतः ॥ स्थानमेतत् सुरश्रेष्ठौ वां प्रसादान्महेश्वरौ ॥४१॥
सर्वत्र पूज्यं भवतु त्रैलोक्योत्तमतां व्रजेत् ॥

देवौ ऊचतुः ॥

सिद्धिर्भवतु ते भद्रे नौ प्रसादाद्वरानने ॥४२॥
स्थानमेतन्महत्पुण्यं त्रैलोक्ये विश्रुतं भवेत् ॥ पश्चादिदं महाभागे पितृस्थाली भविष्यति ॥४३॥
अत्र दत्तं हुतं वापि जप्तं वा सुरनन्दिनि ॥ अक्षय्यपुण्यफलदं भवत्येव न संशयः ॥४४॥
आवां स्वभार्यासंयुक्तौ वसावोऽत्रैव भामिनि ॥ लिङ्गमेतत् पूजकानां सर्वाभीष्टप्रदं भवेत् ॥४५॥
इति दत्वा वरं देवौ शिवविष्णू द्विजोत्तम ॥ सान्निध्यं चक्रतुस्तत्र लिङ्ग एव सदा मुने ॥४६॥

नारद उवाच ॥

सुरभिस्तत्र वै विप्र सिद्धिं प्राप्य तपोधना ॥ आस्ते तत्रैव भद्रन्ते अधस्तात् सुरनन्दिनी ॥४७॥
गोबिलं नाम तत्रैव समुद्रे वरुणालये ॥ बिलेन तेन वै भद्रा प्रविष्टा सुरभिर्द्विज ॥४८॥
सुतलं नाम पातालं सर्वभोगसमन्वितम् ॥ तत्रास्तेऽद्यापि सुरभिरधस्ताद्गोबिलेऽमले ॥४९॥
बिलेन तेन विप्रेन्द्र आगच्छति दिवानिशम् ॥ आगत्यागत्य तत्क्षेत्रं रसैरात्मभवैर्द्विज ॥५०॥
क्षीरादिभिर्महाभागा प्लावयिष्यति सर्वतः ॥ मध्यन्दिने दिवा सा तु अर्धरात्रे च रात्रिषु ॥५१॥
तदहोरात्रमभवत् नृणां संवत्सरं द्विज ॥ मध्यन्दिनं च विषुवस्तुला चैवार्धरात्रकम् ॥५२॥
तस्मिन् काले द्विजश्रेष्ठ पापस्थाल्यां समाहितः ॥ देवान् पितॄन् समुद्दिश्य ब्राह्मणेभ्यः प्रयच्छति ॥५३॥
सुवर्णं रौप्यमथवा वस्त्रं रत्नमजाविकम् ॥ गोमहिष्यन्नदानं च गजकन्यादिकं च यत् ॥५४॥
यद्यदिच्छति वै विप्र तत्तद्देयं न संशयः ॥ तस्मिन् काले द्विजश्रेष्ठ देयं स्वल्पमथापि वा ॥५५॥
यत्प्रियं मनसः पुत्र तदेवाक्षय्यमेष्यति ॥ दातव्यमत्र विधिना कामं क्रोधं विवर्जयेत् ॥५६॥
तत्फलं न हि मे शक्तिर्वक्तुं संख्यातुमेव वा ॥ तद्दानं मेरुणा तुल्यं तज्जलं सागरोपमम् ॥५७॥
दातारमुपतिष्ठन्ति यथाकामं सुरालये ॥ सा धेनुः कामधुक् भूत्वा दातारमुपतिष्ठते ॥५८॥
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठन्ति तारकाः ॥ तावत् स्वर्गे महाभागाः क्रीडन्ते चाप्सरोगणैः ॥५९॥
सर्वभोगाननुप्राप्य विष्णुलोकं व्रजन्ति ते ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे अमृतेश्वरकामधेनुवरप्रदानं नाम अष्टाविंशोऽध्यायः ॥२८॥

## ॥ पितृस्थाली,पितृस्थालीश्वर – पितृस्थालीमाहात्म्यं – धर्मगुप्तकथा ॥

### पितृस्थाली,पितृस्थालीश्वर

संवर्तक उवाच ॥

विधूतपापस्थालीति नाम तस्याः सुशोभनम् ॥ पितृस्थालीति भगवन् किमर्थं तद्वद प्रभो ॥१॥

नारद उवाच ॥

शृणु विप्र यथा तस्या नामनिर्वचनं महत् ॥ कामधेनुस्तु सुरभिस्तस्याधस्ताद्बिलेन वै ॥२॥

एत्यायाति महाभागा पुण्या सर्वरसाश्रया ॥ सुधोद्भवा गवां माता श्रुतमात्राघनाशिनी ॥३॥

घ्राणवातेन तं देशं पावयन्ती मनोहरा ॥ श्वासानिलस्य संस्पर्शादेनांसि च हतानि वै ॥४॥

दूरं गच्छन्ति विप्रर्षे प्रवाते शुष्कपर्णवत् ॥ भूमेः स्थालीति स्थालीत्वात् नाम तस्याभिधीयते ॥५॥

धूतपापा हि मनुजाः पापिष्ठास्तत्रगाः पुनः ॥ तस्माद्विधूतपापा सा स्थाली वै द्विजसत्तम ॥६॥

विधूतपापस्थालीति तद्वदन्ति मनीषिणः ॥ पितृस्थालीति यत्तस्यास्तच्छृणुष्व महामते ॥७॥

ब्रह्मा जगत्पतिः पूर्वं सन्ध्यारूपी बभूव ह ॥ तेन रूपेण स पितॄन् सृष्टवानब्जसम्भवः ॥८॥

पितृभिः सह तद्रूपं ब्रह्मा तस्मिन् व्यसर्जयत् ॥ सा सन्ध्या सह पुत्रैस्तु तत्र तेपे महत्तपः ॥९॥

अर्यमादिभिरुग्रेण तपसाराधितः शिवः ॥ दिव्यं वर्षसहस्रं वै प्राणायामपरायणा ॥१०॥

सङ्गमे ताम्रगौर्यास्तु समुद्रस्य च सत्तम ॥ सन्ध्या लिङ्गं संविधूतपापस्थालीश्वराभिदम् ॥११॥

संस्थाप्य पूजयामास पितृभिः सह शोभना ॥ वायुभक्षा निराहारा समाननिरता ह्यभूत् ॥१२॥

तस्यास्तपःप्रभावेण तुतोष परमेश्वरः ॥ तामाह गत्वा भगवान् सन्ध्यां पुत्रसमन्विताम् ॥१३॥

यत्तेऽभिलषितं देवि वरं ब्रूहीति सादरम् ॥ सा ददर्श महादेवं पार्वत्या सहितं शिवम् ॥१४॥

प्रणम्य शिरसा देवं देवी वचनमब्रवीत् ॥ सिद्धिमिच्छामि भगवन् पुत्रैः सह महेश्वर ॥१५॥

तव प्रसादात् कामारे स्थानमेतत् सुरोत्तम ॥ उत्तमोत्तमतामेतु द्वितीयोस्तु वरो मम ॥१६॥

सिद्धिर्भवतु ते भद्रे त्वत्पुत्राणां सुदुर्लभा ॥ स्थानमेतन्महाभागे सर्वपापहरं भवेत् ॥१७॥

पितृस्थालीति भद्रन्ते अद्यप्रभति शोभने ॥ पितॄणाञ्च परं क्षेत्रं मत्प्रसादाद्भविष्यति ॥१८॥

लिङ्गमेतद्वरारोहे सर्वपापहरं भवेत् ॥

### पितृस्थालीमाहात्म्यं

सञ्जपन् रुद्रगायत्रीं लिङ्गमर्चन्ति ये जनाः ॥१९॥

तेषामभीप्सिता सिद्धिर्भवत्येव न संशयः ॥ अत्र दत्तं हुतं वापि पितॄनुद्दिश्य शोभने ॥२०॥

अमृतन्नाम तद्देवि पितृणामक्षयं भवेत् ॥ दश पूर्वान् दश परान् आत्मानं चापराजितान् ॥२१॥
ते स्वर्गे स्वपितृन् देवि स्थापयिष्यन्ति वै स्थिरम् ॥ माघे कृष्णचतुर्दश्याममायां वा विशेषतः
॥२२॥
पिण्डं तिलोदकं वा यः प्रणम्य च प्रयच्छति ॥ तस्य वै पितरः सर्वे तृप्ता निर्वाणमाप्नुयुः ॥२३॥

ये पिशाचत्वमायान्ति लोके स्वकृतकर्मणा ॥ तेषामपि विधानेन श्राद्धं यः कुरुते सुतः ॥२४॥
तेन पुण्येन महता पितरः सपितामहाः ॥ पिशाचत्वं विमुक्त्वाशु तृप्तिं गच्छन्ति शाश्वतीम् ॥२५॥
इति दत्वा वरं तस्या भगवान् वृषभध्वजः ॥ समस्तभूतसहितस्तस्मिन् लिङ्गे त्रिलोचनः ॥२६॥
क्रीडत्यहर्निशं तत्र पर्वत्या सह शङ्करः ॥ तत्र गत्वा तु यः स्नाति नरो भक्तिसमन्वितः ॥२७॥
अग्निष्टोमस्य यज्ञस्य फलं विन्दति मानवः ॥ अत्र दत्तं हुतं जप्तं एकं कोटिर्भविष्यति ॥२८॥
सन्ध्याकाले तु यः सन्ध्यां तत्र गत्वा करोति च ॥ तस्यैकवर्षं विपेन्द्र सन्ध्यालोपो भवेद्यदि ॥२९॥
तत्सम्पूरयते विप्र पितृस्थाली न संशयः ॥ एकं वा भोजयेद्विप्रं तत्रस्थो यः समन्त्रकम् ॥३०॥
तेनान्नेन द्विजश्रेष्ठ पितरस्तत्पितामहाः ॥ तृप्तिं यास्यन्ति परमां यावन्मन्वन्तरं दिवि ॥३१॥
पितरः पितृलोकस्था वदन्त्याशापरायणाः ॥ अस्माकमन्वये कश्चित् कदा खलु गमिष्यति ॥३२॥
पितृस्थालीं प्रियोऽस्माकं गयां वा पुरुषोत्तमः ॥ पिण्डं तिलोदकं तत्र अस्माकं यः प्रयच्छति
॥३३॥
तेन स्मस्तारिताः सर्वे तृप्तिं यायाम शाश्वतीम् ॥ एवं परस्परं विप्र वदन्त्याशापरायणाः ॥३४॥
तेषां पितृणां विप्रर्षे य आशां पूरयेदिह ॥ स यास्यति परं स्थानं पुनरावृत्तिवर्जितम् ॥३५॥
तस्माद्गोकर्णमासाद्य पितृस्थाल्यां समाहितः ॥ पिण्डं तिलोदकं चैव विधिना स्वपितृन् प्रति ॥३६॥

यो ददाति द्विजस्तेन ह्युद्धृताः पितरः खलु ॥ यावन्तश्च तिला मर्त्यैर्गृहीताः पितृकर्मणि ॥३७॥
तावद्वर्षसहस्राणि पितरः स्वर्गवासिनः ॥ देवाश्च पितरो यस्मात् पितृस्थाल्यां वसन्ति हि ॥३८॥
आवाहनं विसर्गञ्च तेषां तत्र ततो न हि ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥३९॥
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ॥ अजातदन्ता ये केचिद्ये च गर्भे प्रपीडिताः ॥४०॥
अग्निविद्युच्चोरहता व्याघ्रदंष्ट्रिभिरेव च ॥ उद्बन्धनमृता ये च पतिता ह्यात्मघातिनः ॥४१॥
आत्मविक्रयिणश्चोरा ये तथाऽयाज्ययाजकाः ॥ अग्निदा गरदाश्चैव गोपाश्चैव स्ववंशजाः ॥४२॥

असिपत्रवने ये च कुम्भीपाके च ये गताः ॥ रौरवेप्यन्धतामिस्रे कालसूत्रे च ये गताः ॥४३॥
रसविक्रयिणो ये च ये चान्ये पापरोगिणः ॥ जात्यन्तरसहस्रेषु भ्राम्यन्ते ये स्वकर्मभिः ॥४४॥
ये तु पक्षिमृगादीनां कीटवृक्षादिवीरुधाम् ॥ योनीः शतास्त्वसंख्याताः संख्यातानामशोभनाः ॥४५॥

प्रापिता यमलोकन्तु सुघोरैर्यमकिङ्करैः ॥ ये बन्धवो बान्धवा ये येन्यजन्मनि सौहृदः ॥४६॥
येपि चाज्ञातनामानो ये चापुत्रा स्वगोत्रजाः ॥ कृतघ्नाश्च गुरुघ्नाश्च ये च मित्रद्रुहस्तथा ॥४७॥
स्त्रीबालघातका ये च ये च विश्वासघातकाः ॥ विषेण च मृता ये वै ये वै शृङ्गिभिराहताः ॥४८॥

अनाथाः कृपणा दीना मानुष्यं प्राप्तुमक्षमाः ॥ तेषां समाहितो भूत्वा पितॄणां तृप्तये द्विज ॥४९॥
पितृस्थाल्यां पिण्डदानं कुर्यादेव न संशयः ॥ प्रयान्ति स्वर्गतिं ते वै स्वर्गिणो मुक्तिमाप्नुयुः ॥५०॥
एतान्मन्त्रान्समुच्चार्य यः कुर्यात् पितृतर्पणम् ॥ श्राद्धं पिण्डप्रदानञ्च स विधिज्ञ इहोच्यते ॥५१॥
कामप्रदानि तीर्थानि त्रैलोक्ये यानि कानि च ॥ तानि सर्वाणि सेवन्ते ताम्रगौर्यां न संशयः ॥५२॥
पितृस्थालीं समासाद्य यः पितॄनुद्धरिष्यति ॥ स कुलीनः स चोदारो वंशजः स प्रकीर्तितः ॥५३॥
स एव धन्यः स त्वाढ्यः सर्वेषां स च बुद्धिमान् ॥ स श्रेष्ठः सर्वभूतानां मातेव हितकारकः ॥५४॥

## धर्मगुप्तकथा

नारद उवाच ॥

अत्रार्थे कथयिष्यामि इतिहासं पुरातनम् ॥ संवर्तक महाबुद्धे श्रृणुष्वैकमना भव ॥५५॥
चन्द्रिकानगरे पूर्वमासीद्वैश्यो महागुणी ॥ धर्मगुप्त इति ख्यातो धर्मवानमितप्रभः ॥५६॥
पित्रार्जितेन वित्तेन वाणिज्यं कृतवान् द्विज ॥ गजानश्वानश्वतरान् दृष्ट्वा क्रीत्वा महाधनी ॥५७॥
श्रीगन्धरोचनायुक्तमुपकेशान् शलारकान् ॥ शस्त्राणि पिप्पलीं द्राक्षां खर्जूरं नागकेशरम् ॥५८॥
सिन्धूरं रामठं चैव लवङ्गं पट्टमेलकम् ॥ उशीरादीनि द्रव्याणि पट्टवस्त्राणि यानि च ॥५९॥
तानि सर्वाणि सङ्क्रीत्य विक्रयामास शास्त्रतः ॥ क्रीत्वा तत्र बहुद्रव्यं पुनर्द्वीपान्तरं गतः ॥६०॥
तत्र स्थितानि वस्तूनि सङ्गृह्य पुनरागतः ॥ चन्द्रिकानगरे विप्र प्रायस्तद्विक्रयं कृतम् ॥६१॥
द्वैगुण्येनैव मौल्येन स्वजातिविहितेन च ॥ रसद्रव्याणि यानीह मधुमांसानि यानि च ॥६२॥

कन्दमूलफलानीह हरिद्रादीनि यानि च ॥ तानि सर्वाणि संक्रीत्य विक्रयामास शास्त्रतः ॥६३॥
मुक्ताप्रवालवैढूर्यपद्मरागादिकान् मणीन् ॥ धान्यानि तिलमुख्यानि मधुतैलं घृतं दधि ॥६४॥
पद्मक्रमुकजम्बीरनालिकेरादिकान्यपि ॥ नागवल्लीदलानीह फलपुष्पाणि यानि तु ॥६५॥
स्वर्णं रजतकं ताम्रं कांस्यं लोहं कटादिकम् ॥ विक्रयामास विधिना धर्मगुप्तो महागुणी ॥६६॥
दिक्षु प्रसिद्धिमगमद्बहुद्रविणसञ्चयात् ॥ पुत्रदारसमायुक्तो न व्ययं कृतवानसौ ॥६७॥
पित्रोर्मृतदिने प्राप्ते न श्राद्धं कृतवान् द्विज ॥ वैधृतौ च व्यतीपाते रविसंक्रमणेषु च ॥६८॥
अर्धोदये महापुण्ये न वृषं महिषीं तथा ॥ गृहागताय शान्ताय याचकाय द्विजातये ॥६९॥
न भैक्ष्यं धान्यमुष्टिं वा शाकं वा ह्युपदंशनम् ॥ न दत्तवान् स्थलं चापि ताम्बूलं वा पयः क्वचित् ॥७०॥
द्रव्यलोभेन महता न व्ययं कृतवानसौ ॥ पुत्रमित्रकलत्राद्यैस्तत्पत्नीभिः स्वभृत्यकैः ॥७१॥
नवरत्नैः स्वर्णरौप्यैर्वस्त्राद्यैः पेटिकायुतैः ॥ धान्यैर्नानाविधैश्चैव पशुभिश्च समन्ततः ॥७२॥
गृहं तदीयं सम्पूर्णं बलिभिक्षादिवर्जितम् ॥ देशेभ्योऽतिथयो गत्वा निराशा भोजनेच्छया ॥७३॥
शपन्ति तं दिवारात्रं पिशाचोऽयं भविष्यति ॥ सर्पो रक्षति निक्षेपं यद्वत् सोऽयं तथा वणिक् ॥७४॥

इत्युक्त्वा तं प्रयान्ति स्म प्रत्यहं द्विजपुङ्गवाः ॥ एवं बहुतिथे काले गृहं दग्धं हुताशनात् ॥७५॥
व्याधिताः पुत्रपौत्राश्च पत्नीदुहितरस्तथा ॥ सर्वे पञ्चत्वमगमन् धनं नष्टं तदा ह्यभूत् ॥७६॥
कुष्ठव्याधियुतो वैश्यः कृमिभिर्दूषितो वणिक् ॥ तदा गृहाद्विनिष्क्रम्य स वैश्यो विपिनं गतः ॥७७॥
वृक्षमूलमुपाश्रित्य क्षुत्तृष्णापरिपीडितः ॥ अस्तङ्गते दिनकरे तत्रोवास सुदुःखितः ॥७८॥
तत्र दृष्ट्वा महाव्याघ्रो भक्षयामास तं द्विज ॥ तेन दोषेण महता पिशाचत्वमवाप्तवान् ॥७९॥
स ह्यारण्ये महाघोरे निर्जने न्यवसद् द्विज ॥ तत्र स्थितान् भूतसङ्घान् भक्षयामास नित्यशः ॥८०॥
एवं कालेषु गच्छत्सु कदाचिद्द्विजसत्तम ॥ तीर्थयात्राप्रसङ्गेन कुत्सो ब्राह्मणपुङ्गवः ॥८१॥
यदृच्छया चरन् भूमौ तं देशं समपद्यत ॥ तं दृष्ट्वा धर्मगुप्तस्तु कुत्सं ब्राह्मणपुङ्गवम् ॥८२॥
मुदा परमया युक्तो विप्रस्यान्तिकमागमत् ॥ दोर्भ्यां विप्रं समाश्लिष्य क्षणं तत्र स्थितो द्विज ॥८३॥

तस्य स्पर्शनमात्रेण तत्क्षणात् द्विजसत्तम ॥ पापहानिरभूत्तस्य जाता जातिस्मृतिर्द्विज ॥८४॥
विप्रं त्यक्त्वा तदा वैश्यः प्रणिपत्येदमब्रवीत् ॥ कृतार्थोऽस्मि महाभाग त्वदङ्गस्पर्शनात् द्विज ॥८५॥

मामुद्धर महाभाग दयां कृत्वा मयि द्विज ॥ इति श्रुत्वा तु वैश्यस्य वचनं करुणान्वितम् ॥८६॥
तमाह वैश्यं धर्मात्मा कुत्सो ब्राह्मणपुङ्गवः ॥ ब्रूहि कस्त्वं घोररूप किमर्थं चेह तिष्ठसि ॥८७॥
भवता किं कृतं पूर्वमीदृशीं योनिमागतः ॥

॥ धर्मगुप्त उवाच ॥

अहं वैश्यो धर्मगुप्तश्चन्द्रिकानगरे स्थितः ॥८८॥
पित्रार्जितेन वित्तेन वाणिज्यं कृतवानहम् ॥ बहुद्रव्यं मया प्राप्तं न व्ययं कृतवानहम् ॥८९॥

प्रदत्तं विप्रमुख्याय नाणुमात्रमपि द्विज ॥ तेन दोषेण महता पिशाचत्वमवाप्तवान् ॥९०॥
त्वदङ्गस्पर्शमात्रेण जाता जातिस्मृतिर्मम ॥ मामुद्धर दयालो त्वं त्वामहं शरणं गतः ॥९१॥
इत्युक्तो धर्मगुप्तेन कुत्सो ब्राह्मणपुङ्गवः ॥ उवाच प्रणतं वैश्यं पैशाचीं योनिमागतम् ॥९२॥
वैश्य भीतिं त्यज त्वान्तु उद्धरिष्यामि वै क्षणात् ॥ याहि सार्धं मया वैश्य गोकर्णं क्षेत्रमुत्तमम्
॥९३॥
तत्र गत्वा मया सार्धं पितृस्थाल्यां समाहितः ॥ श्राद्धं कृत्वा विधानेन प्रापयिष्ये गतिं तव ॥९४॥
इत्युक्त्वा तं समादाय कुत्सो ब्राह्मणपुङ्गवः ॥ गोकर्णक्षेत्रमासाद्य पितृस्थाल्यां समाहितः ॥९५॥
वैश्येन सह धर्मात्मा स्नानं कृत्वा तु सङ्गमे ॥ वैश्यनाम्ना कुशग्रन्थिं कृत्वा स्थाप्य शुभे स्थले
॥९६॥
स्नात्वा श्राद्धं च विधिना कृतवान् द्विजसत्तमः ॥ तेन पुण्येन महता मुक्तिमाप सुदुर्लभाम् ॥९७॥

नारद उवाच ॥

कुत्सोपि ब्राह्मणो विप्र यथाकामं जगाम ह ॥

---

पितृस्थाली महाभाग सर्वपापहरा शुभा ॥९८॥
तत्रस्थो रुद्रगायत्रीं यो जपेद्विधिपूर्वकम् ॥ चतुर्विंशतिसाहस्रं तूष्णीं दीक्षासमाहितः ॥९९॥
जन्मप्रभृति यत्पापं ज्ञानतोऽज्ञानतोपि वा ॥ तन्नश्यति न सन्देहो नात्र कार्या विचारणा ॥१००॥
यः सकृत्सङ्गतो वेश्यां कामतोऽकामतोपि वा ॥ स तत्र रुद्रगायत्रीं जपन् मासेन शुद्ध्यति ॥१०१॥
यस्तु मासं वसेत् पापी सह चैव तनूजया ॥ स संवत्सरजप्तेन मन्त्रेणानेन शुद्ध्यति ॥१०२॥
ब्रह्महा गुरुतल्पी वा सुरापी वा द्विजोत्तम ॥ तस्मिन्रुद्रस्य गायत्रीं जप्त्वा शुद्धिमवाप्नुयात् ॥१०३॥

य इदं पठते नित्यं शृणुयाद्वा समाहितः ॥ सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥१०४॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे पितृस्थालीपिशाचमोक्षवर्णनंनाम एकोनत्रिंशोऽध्यायः ॥२९॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ३० ॥  NEXT>>  श्लोक संख्या– ९१

## ॥ सरस्वती – गायत्री,सावित्रीतीर्थवर्णनम् ॥

### सरस्वतीतीर्थं

नारद उवाच ॥

तस्माद्दक्षिणतः किञ्चिदाश्रमं श्रमनाशनम् ॥ सरस्वत्याश्रमं विप्र पुण्यं द्विजनिषेवितम् ॥१॥
देवी सरस्वती तत्र सिद्धिमाप परां द्विज ॥ घोरेण तपसा देवी बह्माणं पर्यतोषयत् ॥२॥

संवर्तक उवाच ॥

सरस्वत्याश्च विप्रर्षे जन्म कर्म च विस्तरात् ॥ तस्या देव्याः प्रभावं च यथावद्वक्तुमर्हसि ॥३॥

नारद उवाच ॥

शृणु तस्याः प्रभावञ्च सम्भवं च द्विजोत्तम ॥ सर्वपापहरां विप्र कथां कथयतो मम ॥४॥
ब्रह्मा प्रजापतिः पूर्वं स्वपतः श्रीधरस्य च ॥ नाभिपद्मोद्भवस्तात चतुराननभूषितः ॥५॥
बद्धपद्मासनो मौनी ध्यानमास्ते पितामहः ॥ ध्यायतस्तस्य देवस्य जिह्वाग्रादगलद्रसः ॥६॥
तमोष्टाभ्यां विरिञ्चस्तु दधार रसमुत्तमम् ॥ गृहीत्वा तं रसं राजन् पातुकामः प्रजापतिः ॥७॥
आकृष्य कण्ठदेशे तु रसं रसविदां वरः ॥ न शशाक द्रवीकर्तुं कर्ता लोकस्य सत्तमः ॥८॥
ततो विदारयामास वक्त्राकाशं खगध्वजः ॥ तस्मान्मुखाद्बभूवाशु शुद्धवर्णा सरस्वती ॥९॥
ऊर्ध्वश्रवाकाशगता देवी दिव्यस्वरूपीणी ॥ वाणी तं वरदं देवं प्रदक्षिणमवर्तत ॥१०॥
तां दृष्ट्वा चकमे देवः पद्मयोनिः प्रजापतिः ॥ कामाभिभूतो भगवान् तामाहेदं द्विजोत्तम ॥११॥
द्विधा त्वं विभजात्मानं मन्नियोगादनिन्दिते ॥ रसनाया रसादेव जातासि मम मानदे ॥१२॥
सरसात् रसनास्वादात् तपनात्तापनादपि ॥ सरस्वतीति ते नाम लोके ख्यातिं गमिष्यति ॥१३॥
दिव्यस्त्रीरूपिणी भूत्वा भज मामेव भामिनि ॥ एकांशेन नदी भूत्वा सर्वपापहरा भव ॥१४॥

व्यक्ताव्यक्तस्वरूपेण सर्वभूतेष्वनिन्दिते ॥ वस भद्रे मम प्रीत्या मन्नियोगाद्वरानने ॥१५॥
इति तद्वचनं श्रुत्वा वाणी वाक्पतिमब्रवीत् ॥ तथा देव त्वद्वशाहं भविष्यामि सुरोत्तम ॥१६॥
इत्युक्त्वा साऽमरगुरुं एकांशेन द्विजोत्तम ॥ दिव्यस्वरूपिणी भूत्वा ब्रह्माणं पर्यवर्तत ॥१७॥
अपरेण जगत्सर्वं पावयन्ती मनोहरा ॥ सर्वभूतेषु वै वत्स व्यक्ताऽव्यक्ताऽनुवर्तते ॥१८॥
त्यक्त्वा देहं पुनर्देवी दक्षस्य दुहिताऽभवत् ॥ सावित्र्या सह धर्मज्ञा योगैश्वर्याभिकांक्षिणी ॥१९॥
तपः सुघोरं गोकर्णे सावित्र्या सह सुव्रत ॥ चचाराब्दायुतं विप्र सङ्गृह्यात्मानमात्मना ॥२०॥
लिङ्गं दिव्यं प्रतिष्ठाप्य अमृतेश्वरपूर्वतः ॥ अर्चमाना दिवारात्रं लिङ्गं तद्धि वरानना ॥२१॥
एवं सम्पूजयन्त्यास्तु व्यतीयुर्बहुवत्सराः ॥ तस्यास्तपःप्रभावेण ब्रह्मा लोकपितामहः ॥२२॥
तुतोष भगवान् ब्रह्मा दर्शयामास वै वपुः ॥ सापि तं देवदेवेशं दृष्ट्वा लोकपितामहम् ॥२३॥
ववन्देऽभ्येत्य शिरसा वाणी भक्त्या प्रजापतिम् ॥ तामाह भगवान् ब्रह्मा किमिच्छसि शुभे वद ॥२४॥
दातास्मि ते वरं भद्रे यद्यपि स्यात् सुदुर्लभम् ॥

सरस्वत्युवाच ॥

वरदो यदि देवेश वरार्हा यदि चाप्यहम् ॥२५॥
सिद्धिमिच्छामि देवेश त्वत्तः कमलसम्भव ॥ सिद्धाहं सर्वभूतेषु चरिष्ये शाश्वतीः समाः ॥२६॥
तीर्थे स्नात्वा मदीये तु तल्लिङ्गं पूजयन्ति ये ॥ वाक्पटुत्वं तु भवतु त्वत्प्रसादात् सुरेश्वर ॥२७॥

ब्रह्मोवाच ॥

यदिच्छया पूजयन्ति तत्तद्भवतु निश्चितम् ॥ सर्वभूतस्य भद्रन्ते जिह्वायां वस भामिनि ॥२८॥
व्यक्ताव्यक्ता महाभागे ज्ञाताज्ञाता तथैव च ॥ ये त्वां भजन्ति कल्याणि भक्त्या शुद्धेन चेतसा ॥२९॥
तेषामभीप्सितं सर्वं भविष्यति वरानने ॥ सरस्वतीकुण्डमिति तीर्थं ख्यातं भविष्यति ॥३०॥
मासि चाश्वयुजे पक्षे दशम्यां ये नरोत्तमाः ॥ स्नात्वा तीर्थे त्वदीये तु त्वल्लिङ्गं पूजयन्ति च ॥३१॥

मुच्यन्ते सर्वपापेभ्यः प्रज्ञावन्तो भवन्ति च ॥ वाक्पटुत्वं भवेत्तेषां सर्वाभीष्टं भविष्यति ॥३२॥
इत्युक्त्वा भगवान् विप्र ब्रह्मा लोकपितामहः ॥ ययौ स सिद्धमार्गेण सह सिद्धैः प्रजापतिः ॥३३॥

सरस्वती च ब्रह्माणं उपतस्थे द्विजोत्तम ॥ यत् पृष्टं कथितं तत्ते किमन्यच्छ्रोतुमिच्छसि ॥३४॥

## गायत्री,सावित्रीतीर्थे

संवर्तक उवाच ॥

कथं तत्रैव ब्रह्मर्षे सावित्री सुरपूजिता ॥ ब्रह्माश्रितब्राह्मणानां माता सिद्धा कथं मुने ॥३५॥

उत्पन्ना च कथं देवी गायत्र्याख्या कथं ह्यभूत् ॥ सावित्री सा कथं देवी वेदगर्भा सुराग्रणीः ॥३६॥

नारद उवाच ॥

श्रुणु विप्र कथामेतां सर्वपापहरां शुभाम् ॥ ब्रह्मा जगत्पतिः पूर्वं चतुराननभूषितः ॥३७॥

नाभिपद्माज्जगद्योनेः पद्मनाभस्य पद्मभूः ॥ बभूव स तदा विप्र जन्म चाचिन्तयत् स्वकम् ॥३८॥

नाभ्यगच्छद्यदा जन्ममातरं पितरं तथा ॥ अव्यक्तजन्मा भगवान् चिन्तयोत्कण्ठमानसः ॥३९॥

निगृह्य सर्वद्वाराणि संयम्यात्मानमात्मनि ॥ ध्यानमास्ते जगन्नाथः सुचिरं द्विजसत्तम ॥४०॥

ध्यायतस्तस्य देवस्य मुखात् पूर्वादजायत ॥ ऋग्वेदश्चाङ्गसहितः सरहस्यः सलक्षणः ॥४१॥

मुखाद्दक्षिणतः साम पाश्चिमाद्यजुरययौ ॥ अथर्वोत्तरतो यस्तु सगुह्यः समजायत ॥४२॥

मुखेभ्यस्तस्य देवस्य चतुर्भ्यो द्विजसत्तम ॥ अजायन्त पुरा वेदाः पुनरेकत्वमागताः ॥४३॥

विलोड्य वेदं तं ब्रह्मा बहुशः परमेश्वरः ॥ वेदोदधौ मथ्यमाने बभूव वरवर्णिनी ॥४४॥

सावित्री सर्वधर्मज्ञा सर्वाभरणभूषिता ॥ गायत्री चापि विप्रेन्द्र सर्वावयवसुन्दरी ॥४५॥

सज्योतिषा सप्रणवा सरहस्या सहारणिः ॥ शाखाभिः सहिता देवी ब्रह्माणं पर्यवर्तत ॥४६॥

प्रदक्षिणं तमावृत्य ननाम शिरसा तदा ॥ तां दृष्ट्वा देवदेवेशो गायत्रीं प्राह सत्तम ॥४७॥

गायन्तं त्रायमाणत्वाद्दुःखसंसारबन्धनात् ॥ गायत्री चेति ते संज्ञा लोके ख्याता भविष्यति ॥४८॥

गोकर्णं याहि सुभगे तपश्चर सुदुश्चरम् ॥ मन्त्रियोगकरी पश्चात् मद्वशा तिष्ठ भामिनि ॥४९॥

इति तस्य वचः श्रुत्वा गायत्री द्विजसत्तम ॥ बह्माणं तं नमस्कृत्य गोकर्णक्षेत्रमागमत् ॥५०॥

आग्नेय्यां रुद्रयोन्यास्तु तीर्थं कृत्वा सुनिर्मलम् ॥ अध्यास्ते सा तपस्यन्ती गोकर्णे सुचिरं द्विज ॥५१॥

नारद उवाच ॥

ततो दृष्ट्वा तु सावित्रीं प्रीतिमानभवद्विधिः ॥ तामाह देवः सावित्रीं यथा तच्छृणु पार्थिव ॥५२॥

ब्रह्मोवाच ॥

मत्तो वेदाः समुत्पन्ना चत्वारः कमलेक्षणे ॥ एकीभूताः पुनस्ते वै ततोहं सारकांक्षया ॥५३॥
विलोड्याहं च वेदं तु लब्धवान् त्वां शुचिस्मिते ॥ सारभूतासि कल्याणि सर्वदा सर्ववस्तुषु ॥५४॥

सर्ववेदेषु सारत्वात् सावित्रीति बुधा जगुः ॥ माता त्वमसि कल्याणि ब्राह्मणानां वरानने ॥५५॥
मन्नियोगकरी नित्यं मयि वर्तस्व शोभने ॥ मैवं करिष्ये देवेश इत्युक्त्वा चान्तरधीयत ॥५६॥
ततश्चुकोप स ब्रह्मा सवित्र्यै परमेश्वरः ॥ शशाप देवीं सावित्रीं शरीरं ते विनश्यतु ॥५७॥
त्यक्त्वा शरीरं सा देवी वायुभूता चचार ह ॥ ततो गोकर्णमासाद्य रुद्रयोन्यास्तु दक्षिणे ॥५८॥
दिव्यवर्षसहस्रं सा ततः स्वायम्भुवान्तरे ॥ तीर्थं कृत्वा सुविमलं चचार सुचिरं तपः ॥५९॥
ततस्तं देशमासाद्य परमेष्ठी मुदान्वितः ॥ गायत्रीं चापि सावित्रीं वरं ब्रूहीत्युवाच ह ॥६०॥

ततः प्रणम्य गायत्री सावित्री च पितामहम् ॥ ऊचतुस्तं सुरश्रेष्ठ सिद्धिं देहि वरं विभो ॥६१॥

दर्शनं तव देवेश सर्वसिद्धिकरं परम् ॥ त्वद्दर्शनं देवदेव देवानामपि दुर्लभम् ॥६२॥
कर्ता त्वं सर्वभूतानां हर्ता पाता तथैव च ॥ त्वमेव सर्वं जानासि सर्वज्ञश्च यतो भवान् ॥६३॥
त्वया ततमिदं सर्वं भूतं भव्यं भवन् तथा ॥ ब्रह्मा त्वं लोककर्तृत्वे पाता त्वं विष्णुसंज्ञया ॥६४॥
त्वया संह्रियते देव अन्ते रुद्रस्वरूपिणा ॥ प्रभुस्त्वं सर्वदेवानां सर्वभूतात्मको ह्यसि ॥६५॥
त्वं पिता सर्वदेवानां त्वं माता सुरसत्तम ॥ पितामहोसि सर्वस्य तथैव प्रपितामहः ॥६६॥
परंब्रह्म परंज्योतिः पवित्रं परमं भवान् ॥ पराणां परमं त्वं हि वदन्ति ज्ञानबृंहिताः ॥६७॥
ये त्वां भजन्ति देवेश ते सिद्धिं प्राप्नुवन्ति वै ॥ त्वां यजन्ति महात्मानो ज्ञानिनः पुरुषोत्तम ॥६८॥

त्वां न जानन्ति देवेश अज्ञा वर्षशतैरपि ॥ यावत्त्वां देवदेवेश न जानन्ति नरा भुवि ॥६९॥
तावत्ते घोरसंसारे भ्रमन्ति च पुनः पुनः ॥ क्रमेणेष्ट्वा देवदेवान् कृत्वा कर्मक्षयं विभो ॥७०॥
भूत्वा योनिमुखे देव चतुराशीतिलक्षके ॥ तप्तं यदा त्वयि विभो बुद्धिः सम्परिवर्तते ॥७१॥
तदायं मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ शरणं भव नौ देव श्रान्तयोर्भवसागरे ॥७२॥
सिद्धिमिच्छावो भगवन् पुनरावृत्तिवर्जिताम् ॥

ब्रह्मोवाच ॥

सिद्धिर्भवतु वां देव्यौ मत्प्रसादाद्यथेप्सितम् ॥७३॥
प्रीतोऽस्मि वां महाभागे स्तोत्रेणानेन सुव्रते ॥ पुनर्ददामि वां भद्रे ब्रूतं तस्माद्यदिच्छथः ॥७४॥
कृतार्थे स्थो महाभागे मत्प्रसादादसंशयः ॥

गायत्रीसावित्र्यावूचतुः ॥

तीर्थं नावाश्रमं चेदं त्वत्प्रसादात्सुरोत्तम ॥७५॥
पूज्यं भवतु त्रैलोक्ये अर्चनीयं सुरैरपि ॥ अत्र नौ त्वां च देवेश ये यजन्ति नरोत्तमाः ॥७६॥
सिद्धिर्भवतु तेषां वै द्वितीयोस्तु वरो ध्रुवम् ॥

ब्रह्मोवाच ॥

तीर्थमेतद्धि गायत्रि मत्प्रसादादनिन्दिते ॥७७॥
सर्वपापहरं चास्तु ब्रह्मज्ञानप्रदं भवेत् ॥ ख्यातं नाम्ना तवैतच्च सर्वसिद्धिकरं भवेत् ॥७८॥
इति दत्वा तु गायत्र्यै सवित्रीं प्रत्यभाषत ॥ त्वां पूजयन्ति ये देवि मया सार्धमनिन्दिते ॥७९॥
तेषां त्रिजन्मचरितमल्पं वा यदि वा बहु ॥ पापञ्च क्षयमायातु मत्प्रसादादसंशयः ॥८०॥
पुण्यं भवतु तेषां वै सर्वयज्ञोद्भवं शुभम् ॥ अत्रस्थो यस्तु सावित्रि सदा त्वज्जपतत्परः ॥८१॥
एकोनत्रिंशत्साहस्रं ऋषिश्छन्दसदैवतम् ॥ महापातकयुक्तो वा पुनः संस्कारकोपि वा ॥८२॥
एकोनविंशल्लक्षं यो ब्राह्मणो वरवर्णिनि ॥ आवर्तयति त्वां देवि मनसा मामनुस्मरन् ॥८३॥
तेषामभीप्सितं सर्वं यद्यपि स्यात् सुदुर्लभम् ॥ मत्प्रसादात् प्रिये सत्यं भविष्यति न संशयः ॥८४॥

अनर्हा ये तु भद्रन्ते वर्णसङ्करकारकाः ॥ अशक्यं च भवेत्तेषां मन्त्रोच्चारणमत्र वै ॥८५॥
गाथा वा गीतिका वापि तद्भविष्यति शोभने ॥ इति दत्वा वरं ताभ्यां ब्रह्मा चान्तरधीयत ॥८६॥

नारद उवाच ॥

किञ्चित् सरस्वतीतीर्थात् प्राच्यां दिशि द्विजोत्तम ॥ सावित्र्या च कृतं तीर्थं वर्तते द्विजपुङ्गव ॥८७॥

तस्मात् किञ्चित् पूर्वदिशि गायत्रीतीर्थमुत्तमम् ॥ तीर्थानामुत्तमं तीर्थं ब्राह्मणानां विशेषतः ॥८८॥

सावित्र्या च कृते तीर्थे गायत्रीतीर्थ उत्तमे ॥ स्नातानां मनसोऽभीष्टं भवत्येव न संशयः ॥८९॥
य इदं पुण्यमाख्यानं शृणोति श्रद्धया नरः ॥ सर्वपापैर्विमुच्येत त्वचं जीर्णमिवोरगः ॥९०॥

इह भुक्त्वा महाभोगानन्ते ब्रह्मपुरं व्रजेत् ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे गायत्रीसावित्रीसरस्वतीतीर्थवर्णनं नाम त्रिंशोऽध्यायः ॥३०॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ३१ ॥  NEXT>>  श्लोक संख्या– ४७

## ॥ नागतीर्थ,नागेश्वरमहिमानुवर्णनम् ॥

नारद उवाच ॥

शृणु चान्यन्महाभाग तीर्थानामुत्तमोत्तमम् ॥ नागतीर्थमिति ख्यातं नागानां कामदं शुभम् ॥१॥
किञ्चित् सरस्वतीतीर्थाच्छरपाते स्थितं महत् ॥ प्राच्यां दिशि महाभाग संवर्तक महामते ॥२॥
काद्रवेयाः पुरा तात तपस्तेपुः सुदुश्चरम् ॥ शप्ता मात्रा पुरा नागास्ते मोक्षार्थं द्विजोत्तम ॥३॥

संवर्तक उवाच ॥

नागाः किमर्थं देवर्षे शप्ता मात्रा महाबलाः ॥ उत्पन्नाश्च कथं ते वै कथं मोक्षमुपागताः ॥४॥

नारद उवाच ॥

शृणु पुण्यां कथामेतां सर्वकिल्बिषनाशिनीम् ॥ कद्रुर्नाम महाभागा विनता च द्विजोत्तम ॥५॥
दक्षस्य कन्ये द्वे विप्र प्रदत्ते कश्यपाय च ॥ कद्रौ जज्ञुर्महाभागा शेषाद्याः पन्नगोत्तमाः ॥६॥
द्वौ पुत्रौ विनतायाश्च जज्ञाते पक्षिसत्तमौ ॥ महाबलौ महावीर्यौ विख्यातौ गरुडारुणौ ॥७॥
नागाः सहस्रं विप्रेन्द्र कद्रुपुत्रा महाबलाः ॥ दश तेषां प्रधानाश्च तान् शृणष्व महामते ॥८॥
अनन्तो वासुकिस्तक्षो कम्बलाश्वतरौ तथा ॥ सुमुखो धृतराष्ट्रश्च पिण्डिको गुळिकस्तथा ॥९॥
धनञ्जयश्च दशमः प्रधानास्ते प्रकीर्तिताः ॥ तयोर्भगिन्योर्विप्रेन्द्र मिथो भेदो ह्यजायत ॥१०॥
द्वेषः सापत्निको विप्र बद्धवैराय जायते ॥ द्वेषाभिभूता नागानां माता मत्सरिणी पुरा ॥११॥
मेरुपृष्टे विनतया चचार सहसा शुभा ॥ ददृशाते चरन्तं ते उच्चैश्रवसमन्तिके ॥१२॥
कुन्देन्दुशङ्खप्रतिमं चरन्तं स्वेच्छयागतम् ॥ दृष्ट्वा कद्रुरुवाचेदं विनतां च द्विजोत्तम ॥१३॥
श्वेतवाजिरयं भद्रे कृष्णबालोऽतिशोभनः ॥ मथ्यमानेऽमृते जातः पूर्वं सुरगणार्चितः ॥१४॥
अथ तामाह विनता अश्वराजं विलोक्य वै ॥ शुक्लबालो महानेष दृश्यते चाभिनन्दिते ॥१५॥
सर्वश्वेतो हि कल्याणि पूर्णचन्द्र इव स्थितः ॥

कद्रुरुवाच ॥

कृष्णबालमिदं भद्रे अश्वरत्नमनिन्दिते ॥१६॥

सन्देहो यदि ते भद्रे दृश्यतां किं विलम्बसे ॥ विनतापि द्विजश्रेष्ठ तामाहेदं विनिश्चिता ॥१७॥

एहि यत्तेऽभिलषितं तदस्तु पणमावयोः ॥

कद्रुरुवाच ॥

यद्यश्वराजो भगिनि श्वेतबालो भवेदयम् ॥१८॥

तव दासी भविष्यामि नीचकर्मवशानुगा ॥ यद्ययं कृष्णबालो वै अश्वराजः शुचिस्मिते ॥१९॥

दासीभूत्वा मम वशे मत्कर्म कुरु भामिनि ॥ ते तथेति प्रतिज्ञाय श्वो द्रक्ष्या इति जग्मतुः ॥२०॥

आश्रमं पुण्यशीलस्य काश्यपस्य महात्मनः ॥ ततश्चिन्तापरा कद्रुर्जेष्यामि विनतां कथम् ॥२१॥

निश्चित्य मनसा पुत्रानिदमाह विषोल्बणान् ॥ अनन्तादीन् कामबलानाहूयानृतमानसा ॥२२॥

कृष्णा भूत्वाश्वराजस्य बालाग्रे वसतानघाः ॥ श्वः प्रभाते दन्दशूका मन्त्रियोगान्महाबलाः ॥२३॥

तच्छ्रुत्वा विह्वला भीता अनृतं पन्नगोत्तमाः ॥ तामाहुर्मातरं ते वै न कुर्मो वचनं तव ॥२४॥

असत्यं न करिष्यामो यथेच्छसि तथा कुरु ॥ ततश्चुकोप नागानां माता पुत्रान्छशाप च ॥२५॥

अलङ्घनीयं पुत्रैस्तु मातृवाक्यमिति श्रुतिः ॥ युष्माभिर्लङ्घितं तच्च तस्माच्छापं ददामि वः ॥२६॥

जनमेजयस्य राजर्षेः सर्पसत्रं भविष्यति ॥ तस्मिन् वैश्वानरे सर्वे पतिताः क्षयमेष्यथ ॥२७॥

इति मातृवचः श्रुत्वा दन्दशूका विषोल्बणाः ॥ दशप्रधाना गोकर्णं तपश्चर्तुं समाययुः ॥२८॥

इतरे दन्दशूकास्तु अश्वबालं च वेष्टिताः ॥ गोकर्णक्षेत्रमासाद्य प्रधाना दश नायकाः ॥२९॥

कृत्वाश्रमपदं तत्र तीर्थञ्च विमलोदकम् ॥ लिङ्गं तत्र प्रतिष्ठाप्य तपश्चक्रुः समाहिताः ॥३०॥

वायुभक्षा निराहारा ब्रह्मध्यानपरायणाः ॥ दिव्यवर्षसहस्रं तु तपो घोरं समाचरन् ॥३१॥

तेषां तपःप्रभावेण ब्रह्मा प्रत्यक्षतां गतः ॥ सह रुद्रेण भगवान् विष्णुना च द्विजोत्तम ॥३२॥

सङ्गम्य तानाह विभुर्ब्रह्मा नागानिदं वचः ॥ नागा वृणीध्वं दास्यामि युष्माकं यदभीप्सितम् ॥३३॥

इति ब्रह्मोदितं श्रुत्वा नागा वचनमब्रुवन् ॥ सिद्धिमिच्छामो भगवन् तपसा महता वयम् ॥३४॥

तां नो देहि महाभाग मग्नानां भवसागरे ॥ मात्रा शप्ता वयं ब्रह्मन् तन्मोक्षं नो प्रसादय ॥३५॥

तीर्थमेतत् सुरश्रेष्ठ अस्माकं करुणाकर ॥ अस्मन्नाम्ना प्रसिद्धं तु भूयाद्वै कमलासन ॥३६॥

लिङ्गमेतत् पूजकानां सर्वाभीष्टप्रदं भवेत् ॥ इति तेषां वचः श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥३७॥

सिद्धिर्वो भविता नागा सिद्धा यूयं भविष्यथ ॥ मातृशापोऽपि न भविता मत्प्रसादान्न संशयः ॥३८॥
तीर्थमेतन्महाभागा लिङ्गं युष्माभिरर्चितम् ॥ सर्वसिद्धिकरं चास्तु मत्प्रसादान्न संशयः ॥३९॥

नारद उवाच ॥

इति दत्वा वरं देवो नागानां प्रपितामहः ॥ देवैः सार्धं जगामाशु ब्रह्मलोकं द्विजोत्तम ॥४०॥
नागतीर्थे नरो यस्तु स्नात्वा तल्लिङ्गमर्चयेत् ॥ यद्यदिच्छति वै कामं स चाप्नोति न संशयः ॥४१॥
श्रावणे मासि शुक्ले तु पञ्चम्यां नागतीर्थके ॥ स्नात्वा तु विधिना देवं सर्पसूक्तेन चार्चयेत् ॥४२॥
पितृशापेन मुक्तः स्यान्मातृशापात्तथैव च ॥ उभयोः पक्षयोश्चैव पञ्चम्यां नागतीर्थके ॥४३॥
स्नानं विधाय विधिना तल्लिङ्गं पूजयेच्च यः ॥ नागसूक्तं जपन्नेव श्रद्धाभक्तिसमन्वितः ॥४४॥
उपचारैः षोडशभिर्मन्त्रं पञ्चाक्षरं जपेत् ॥ एवं यः कुरुते भक्त्या वत्सरं मुनिपुङ्गव ॥४५॥
सर्पशापाद्विमुक्तः स मातृशापात्तथैव च ॥ पितृशापाद्विमुक्तस्तु दीर्घायुः सन्ततिं लभेत् ॥४६॥

सूत उवाच ॥

नागेश्वरस्य माहात्म्यं श्रोतॄणां पापनाशनम् ॥ पठतां चैव मर्त्यानां मातृशापाद्भयं न हि ॥४७॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे नागेश्वरमहिमानुवर्णनं नाम एकत्रिंशोऽध्यायः ॥३१॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ३२ ॥  NEXT>>  श्लोक संख्या–७४॥

अगस्त्यतीर्थवर्णने–अगस्त्यतपोवर्णनं,गरुडेन शतशृङ्गानयनम् ॥

## अगस्त्यकथा

नारद उवाच ॥

शृणु चान्यत् द्विजश्रेष्ठ तीर्थं त्रैलोक्यविश्रुतम् ॥ अगस्त्यतीर्थमिति च अगस्त्येन कृतं पुरा ॥१॥
सर्वपापप्रशमनं क्षिप्रसिद्धिकरं नृणाम् ॥ नागतीर्थात् पूर्वदिशि स्थितं मुनिनिषेवितम् ॥२॥
रहस्यं तत्र जानन्ति ज्ञात्वा नार्चन्ति पापिनः ॥ तस्मिन् स्नातः सर्वतीर्थे स्नातो भवति मानवः ॥३॥
पापकञ्चुकमुत्सृज्य राजते नात्र संशयः ॥ यथा जीर्णत्वचं त्यक्त्वा राजते वायुभोजनः ॥४॥

नारदेनेरितां श्रुत्वा अग्निपुत्रो महाकथाम् ॥ भूयः प्रणम्य पप्रच्छ नारदं मुनिसत्तमः ॥५॥

## अगस्त्यजन्म तस्य तपश्च

संवर्तक उवाच ॥

अगस्त्यस्य च मे शंस जन्म कर्म च सत्तम ॥ तस्य तीर्थस्य चोत्पत्तिं विस्तरात् कथयस्व मे ॥६॥

नारद उवाच ॥

शृणु तस्य महाबुद्धे चरितं पुण्यकर्मणः ॥ अगस्त्यस्य द्विजश्रेष्ठ सर्वपापहरं शुभम् ॥७॥

ब्रह्मणो मानसः पुत्रो अगस्त्यो लोकविश्रुतः ॥ निधिः स तपसां वत्स सत्यवादी जितेन्द्रियः ॥८॥

पुरा विवादे देवानां त्यक्त्वा क्षेत्रं महामुनिः ॥ वायुभूतः शरीरार्थी चचाराकाशगः पुरा ॥९॥

ततो ददर्श मित्रं च वरुणं च महामतिः ॥ तौ विप्रौ तपसा दग्धकिल्बिषेणान्तरात्मना ॥१०॥

तोषयामास विप्रेन्द्र घोरेण तपसा मुनिः ॥ तपोवनमिति ख्यातं देवानां पावकात्मज ॥११॥

अत्र देवाश्च ऋषयस्तपसा सिद्धिमाप्नुयुः ॥ तौ दृष्ट्वा सहसा विप्र तत्रागस्त्यो महामुनिः ॥१२॥

योषां मायामयीं विप्र तपसा निर्ममे प्रभुः ॥ सा दिव्यरूपिणी विप्र त्रैलोक्यानन्ददायिनी ॥१३॥

कान्ता कामरतिप्रख्या सर्वाभरणभूषिता ॥ सूक्ष्माम्बरधराऽकाशात्तपोवनमवातरत् ॥१४॥

प्रभया तद्वनं तस्या बभासे भास्करप्रभम् ॥ मत्तेभगमना मत्ता विचिन्वन्ती च पादपान् ॥१५॥

गायन्ती च हसन्ती च तद्वनं विचचार ह ॥ तां मित्रावरुणौ दृष्ट्वा विस्मयोत्फुल्ललोचनौ ॥१६॥

निरीक्ष्य सुप्रसन्नां तां कन्दर्पवशमागतौ ॥ ततो वायुर्महाभाग तस्या वस्त्रं सुशोभनम् ॥१७॥

आकृष्याकाशमार्गेण शनैस्तां तु चक र्ष च ॥ ततो विशालजघना विभ्रती रूपमुत्तमम् ॥१८॥

वस्त्रार्थं परिबभ्राम वियत्यनुपमा द्विज ॥ तां दृष्ट्वा विचरन्तीं तौ मेघे सौदामिनीमिव ॥१९॥

कामाभिभूतौ तौ देवौ विकारमुपजग्मतुः ॥ तस्या रूपेण महता मोहितौ मुनिसत्तमौ ॥२०॥

अक्षोभ्यौ केनचिद्ब्रह्मन् तया क्षोभमुपागतौ ॥ रूपेण तेनाप्सरस ऋषेस्तस्य तपोबलात् ॥२१॥

तयोः शुक्रं प्रचस्कन्द वीर्यवद्देवयोस्तदा ॥ तद्दृष्ट्वा क्लिन्नमनसौ व्रीडयाऽधोमुखौ मुनी ॥२२॥

गृहीत्वा कलशे वीर्यं निदधाते द्विजोत्तम ॥ जग्मतुस्तौ द्विजश्रेष्ठ गङ्गाधारं प्रति प्रभो ॥२३॥

तत्र कृत्वा यथान्यायं स्नानं तौ सुरसत्तमौ ॥ समाप्य नित्यकर्माणि आश्रमं पुनरागतौ ॥२४॥

तावत्तत्कलशाज्जातो अगस्त्यो भगवानृषिः ॥ वसिष्ठश्च महातेजा बभूव तदनु द्विज ॥२५॥

तौ प्रेक्ष्य मित्रावरुणौ विस्मयं जग्मतुः परम् ॥ तयोः कर्माणि चक्राते वसिष्ठागस्त्ययोस्तदा ॥२६॥

गर्भाधानादि भद्रन्ते चौलोपनयनादिकम् ॥ तयोर्ज्येष्ठो महातेजा मैत्रावरुणिरात्मवान् ॥२७॥

अगस्त्यस्तपसा युक्तो विभावसुसमप्रभः ॥ सिद्धिकामस्तपस्तेपे घोरमुद्दिश्य शङ्करम् ॥२८॥
तमागत्याह सा नारी पुत्रस्त्वं मे तपोधन ॥ कामयानस्य मां विप्र वरुणस्य महामते ॥२९॥
जातोसि तस्माद्विप्रर्षे माताहं तव सुव्रत ॥ देहि मह्यं वरान् विप्र यथाकामं चराम्यहम् ॥३०॥
तस्यास्तद्वचनं श्रुत्वा अगस्त्यो भगवानृषिः ॥ तामब्रवीत् स्वजननीं ब्रूहि मत्तः किमिच्छसि ॥३१॥

स्त्री उवाच ॥

नाम मे देहि भगवन् स्थानं मे सम्प्रकल्पय ॥ रूपौदार्यगुणैर्ब्रह्मन्न मत्तोभ्यधिका भवेत् ॥३२॥

अगस्त्य उवाच ॥

अलं जातासि कल्याणि तपसा महता मम ॥ तस्मादलम्बुसानाम्ना लोके ख्यातिं गमिष्यसि ॥३३॥
इन्द्रलोकं गता भद्रे मत्प्रसादादनिन्दिते ॥ यथाकामं यथाजोषं चरतात् शाश्वतीः समाः ॥३४॥
रूपौदार्यगुणैस्त्वं वै लोके ख्यातिं गमिष्यसि ॥ स्वर्गौकसां च भद्रन्ते चित्तप्रमथिनी भव ॥३५॥
स्वर्लोकसारभूता त्वं मत्प्रसादाद्भविष्यसि ॥

नारद उवाच ॥

इति तस्यै वरं दत्वा भगवान् कुम्भसम्भवः ॥३६॥
चचार तस्मिन् ब्रह्मर्षिस्तपो घोरं महामते ॥ तपोवने पुण्यतमे सिद्धिकामः पुरा द्विज ॥३७॥
वायुभक्षो निराहारो वर्षाणामयुतं मुनिः ॥ तीर्थं तत्र विधायैव लिंगं संस्थाप्य निर्मलम् ॥३८॥

---

संवर्तक उवाच ॥

तपोवनं नाम मुने श्रुतं ते वदतोनघ ॥ तत्प्रभावं च वदतु तस्मिन् पुण्यफलं तथा ॥३९॥
प्रमाणं तस्य भगवन् यथावद्वक्तुमर्हसि ॥ तस्मिन् तपोवने सिद्धान् वद मे द्विजसत्तम ॥४०॥

नारद उवाच ॥

शृणु पुत्र महापुण्यं श्रुतमात्राघनाशनम् ॥ तपोवनमिति ख्यातं त्रैलोक्ये चोत्तमोत्तमम् ॥४१॥
शतशृङ्गमिति ख्यातं हिमवच्छिखरं महत् ॥ ब्रह्मादिवसतिः ह्येषा मध्ये हिमवतः स्थिता ॥४२॥
पश्चिमेन तु कैलासशृङ्गं शिवनिकेतनम् ॥ पूर्वभागेऽस्य विप्रर्षे विष्णोः स्थानमनुत्तमम् ॥४३॥
इन्द्रनीलमिति ख्यातं शिखरं हिमवच्छिरः ॥ तयोर्मध्यगतो विप्र शतशृङ्गे महागिरिः ॥४४॥
चम्पकाशोकपुन्नागमन्दारैः पारिजातकैः ॥ सर्वर्तुकुसुमैर्वृक्षैः फलभारविनम्रकैः ॥४५॥
देवैश्च ऋषिसङ्घातैर्गन्धर्वैर्गुह्यकैस्तथा ॥ चारणैरप्सरोभिश्च देवस्त्रीभिस्तथैव च ॥४६॥

किन्नरैर्नागकन्याभिरुरगैश्च विभूषितः ॥ उद्यानशतसङ्कीर्णो नानाधातुभिरन्वितः ॥४७॥
मृगैर्नानाविधैश्चैव नानापक्षिभिरन्वितः ॥ शतशृङ्गो गिरिवरः पुण्यतीर्थसमन्वितः ॥४८॥
तस्योपरिष्टाद्गरुडः सुपर्णः पपतां वरः ॥ आदाय नागराजानं सुमुखो दुर्मुखं बली ॥४९॥
तत्सानुविटपालोकी अधोदृष्टिमपातयत् ॥ अधोमुखात्तु गरुडान्नागस्तस्मिन् पपात ह ॥५०॥
दुर्मुखं पतितं दृष्ट्वा वैनतेयो महाबलः ॥ क्रोधात्तदनु भद्रन्ते शतशृङ्गमुपागमत् ॥५१॥
तमागतमभिप्रेक्ष्य दुर्मुखो भुजगोत्तमः ॥ विवेशाधोमुखस्तस्मिन् पर्वते भयपीडितः ॥५२॥
सार्धयोजनविस्तारे प्रविवेशाहिराडसौ ॥ गरुत्मानपि विप्रर्षे क्रोधमाहारयद्भृशम् ॥५३॥
क्रोधाभिभूतः खगराट् सार्धयोजनमुच्छ्रितम् ॥ उत्पाट्य शतशृङ्गं तु गरुडः पततां वरः ॥५४॥
सनागराजमादाय जगाम नभसा द्रुतः ॥ ऋषयस्तत्र विप्राश्च शृङ्गे हिमवतः शुभे ॥५५॥
सब्रह्मकाः सहस्त्राणां चतुर्दश समासते ॥ सन्ति द्विकोटितीर्थानि सन्ति वै ब्राह्मणोत्तमाः ॥५६॥
तैः सर्वैः सहितं शृङ्गमादायाकाशमागमत् ॥ ततो बुबोध भगवान् ब्रह्मा लोकगुरुः स्वयम् ॥५७॥
स तत्कर्म सुपर्णस्य ज्ञात्वा क्रोधवशं गतः ॥ त्रैलोक्यभारं भगवानात्मन्याधाय सत्वरम् ॥५८॥
दधानं शतशृङ्गं तं पीडयामास वै द्विजम् ॥ तस्मिन् काले स गरुडो गोकर्णस्योपरि स्थितः ॥५९॥
भारार्तो विह्वलः पक्षी ररासे च रुरोद च ॥ अधो विसार्य दृष्टिं स ददर्श तपसां निधिम् ॥६०॥
अगस्त्यमाश्रमे तस्मिन् तपस्यन्तं तपोवने ॥ दृष्ट्वा तमाह गरुडः शरणं भव मेऽनघ ॥६१॥
भारार्ते मयि विप्रर्षे दयां कुरु तपोनिधे ॥ प्रसीद भगवन् विप्र नमोस्तु ऋषिसत्तम ॥६२॥
त्वन्नो धाता विधाता च लोकानां द्विजसत्तम ॥ तपसा धार्यते सर्वं त्वयैव पुरुषोत्तम ॥६३॥
समुद्रे मज्जमानं मां तपसोद्धर्तुमर्हसि ॥ ततस्तद्वचनं श्रुत्वा अगस्त्यो भगवानृषिः ॥६४॥
मा भैरित्याह तं विप्र तपसा दग्धकिल्बिषः ॥ तद्वाक्याह्लादनं प्राप्य किञ्चिदुच्छ्वसितः खगः ॥६५॥
तमाह विप्रं विप्रर्षे श्रूयतामिति सादरम् ॥ मयाऽज्ञात्वा च ब्रह्मर्षे कृतमेतदसाम्प्रतम् ॥६६॥
हिमवच्छिखरं विप्र शतशृङ्गमिति प्रभो ॥ अज्ञानादथ दर्पाद्वा क्रोधाद्बाल्याच्च सुव्रत ॥६७॥
उत्पाटितं मया तस्माद्ब्रह्मर्षिशतसंयुतम् ॥ सब्रह्ममिदं ब्रह्मन्न शक्नोम्यपकर्षितुम् ॥६८॥
अवतारयैतद्भगवन् मां विशोकं कुरु प्रभो ॥ इति श्रुत्वा स भगवान् अगस्त्यो मुनिसत्तमः ॥६९॥
मज्जमानं सगरुडं शिखरं वीक्ष्य सुव्रत ॥ ध्यात्वा मुहूर्तं ब्रह्मर्षिर्ज्ञात्वा तत्कारणं मुनिः ॥७०॥
शम्भोर्मनोगतं सर्वं तस्मादानीतवान् खगः ॥ विशोकं गरुडं विप्रः करिष्यामीति चिन्तयत् ॥७१॥
अवतारयामास मुनिः शिखरं गरुडाद्वशी ॥ अगस्त्यस्तु महातेजा रुद्रयोन्यास्तु दक्षिणे ॥७२॥

निधायाम्भोनिधौ तस्मिन् मोक्षयामास काश्यपिम् ॥ गरुडं मोचयित्वा तु अगस्त्यो भगवानृषिः ॥७३॥
स्वयं तपश्चरन्नेव आस्ते मुनिवरस्तदा ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे अगस्त्यतपोवर्णनं,शतशृङ्गनयनं नाम द्वात्रिंशोऽध्यायः ॥३२॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ३३ ॥  NEXT>>  श्लोक संख्या–५२

## ॥ अगस्त्यतीर्थवर्णने ब्रह्मतीर्थ(कमण्डलु तीर्थ)–गरुडतीर्थ,गरुडमूर्ति–तपोवन–कोटितीर्थ–विशालबिल माहात्म्यवर्णनम् ॥

### ब्रह्मतीर्थ(कमण्डलु तीर्थ)

नारद उवाच ॥

तं दृष्ट्वा भगवान् ब्रह्मा कर्म चान्यैः सुदुष्करम् ॥ कृतं गरुडमालोक्य विस्मयोत्फुल्ललोचनः ॥१॥
वीक्षां चक्रे तदा ब्रह्मा भगवान् पद्मसम्भवः ॥ ततो ददर्श पार्श्वस्थमगस्त्यं तपसां निधिम् ॥२॥
अनेन मुक्तो गरुडः शिखरं चावतारितम् ॥ शक्तोऽसौ तपसा कर्तुं सर्वं संहर्तुमेव वा ॥३॥
इति मत्वा विरिञ्चस्तु किञ्चित् कोपसमन्वितः ॥ ध्यानमास्ते चिरं विप्र किमेतदिति चिन्तयन् ॥४॥
ततो ज्ञात्वा यथावृत्तं भवितव्यं हि तत्तथा ॥ प्रसन्नमूर्तिर्ब्रह्मा तु गरुडं वाक्यमब्रवीत् ॥५॥

ब्रह्मोवाच ॥

तुष्टोऽस्मि ते पक्षिराज साध्वेतत् कृतवानसि ॥ गोकर्णे सह रुद्रेण वसाम्यत्र यथासुखम् ॥६॥
ध्यातो रुद्रेण मनसा शतशृङ्गगमे द्विज ॥ निमित्तमात्रस्त्वं वत्स तस्मात्तुष्टोऽस्मि सुव्रत ॥७॥

गरुड उवाच ॥

अपराधं कृतमिदमज्ञानात् प्रपितामह ॥ बाल्याद्दर्पाच्च मोहाच्च तस्मात्त्वं क्षन्तुमर्हसि ॥८॥
वरं ददासि चेन्मह्यं वृणोमि वितराद्य वै ॥

ब्रह्मोवाच ॥

वृणीष्व पुत्र तुष्टोऽस्मि धैर्येण तव पक्षिप ॥९॥
त्रैलोक्यभारमुद्वोढुं त्वदृते नास्ति कश्चन ॥

गरुड उवाच ॥

त्रैलोक्यभारं भगवन् यदि ह्येतत् सुरोत्तम ॥१०॥
तव प्रसादाद्देवेश सोढुमिच्छाम्ययत्नतः ॥ भूतेषु कश्चिद्भगवन् स्थावरेषु चरेषु च ॥११॥
न मत्तोऽन्योधिको देव बलवीर्यपराक्रमैः ॥ भवेदेतद्वरं देव मम त्वं दातुमर्हसि ॥१२॥

ब्रह्मोवाच ॥

त्रैलोक्यभारं गरुड मत्प्रसादादयत्नतः ॥ वहिष्यसि खगश्रेष्ठ बलवीर्यपराक्रमैः ॥१३॥
अधिको भव सर्वेभ्यो मत्प्रसादान्महाबल ॥ वायोर्विकारस्त्वं पुत्र तस्मात् पक्षधरः परः ॥१४॥
वाहनार्थं महाविष्णोर्निमित्तस्त्वं मया पुरा ॥ ध्वजश्च तस्य देवस्य भवान् भवितुमर्हति ॥१५॥
स एक एव भगवान् विश्वरूपधरो हरिः ॥ हितार्थं सर्वदेवानां वरमन्यद्ददामि ते ॥१६॥
नाक्रमिष्यन्ति वै पुत्र आयुधानि तनुं तव ॥ इति तस्मै वरं दत्वा ब्रह्मा ब्रह्मर्षिभिः सह ॥१७॥
तपो घोरं समास्थाय शतशृङ्गेऽवसत् प्रभुः ॥ रुद्रेण सह सङ्गम्य भगवान् लोकभावनः ॥१८॥
मूर्ध्नि तत्पर्वतेन्द्रस्य सत्यलोकं गतस्तदा ॥ कमण्डलुं निधायात्र सर्वतीर्थमयं द्विज ॥१९॥
(ब्रह्मकुण्डं)

---

## गरुडतीर्थ,गरुडमूर्ति

नारद उवाच ॥

गरुडोऽपि द्विजश्रेष्ठ वरं प्राप्य पितामहात् ॥ स्वनाम्नि तीर्थे स्नात्वा तु स्वमूर्तिं स्थाप्य तत्र तु ॥२०॥
अगस्त्यमभिवाद्याथ यत्र विष्णुस्ततो गतः ॥ तदेतद्भुवि विख्यातमाश्रमं गारुडं मुने ॥२१॥
तीर्थं पक्षिपतेस्तत्र गारुडं नाम विश्रुतम् ॥ क्षिप्रं सिद्धिकरं तद्वै आयुर्वर्धनमुत्तमम् ॥२२॥
तत्रस्थो यो द्विजश्रेष्ठ गायत्रीं गरुडस्य तु ॥ चतुर्लक्षं जपेद्यस्तु तूष्णीं दीक्षासमन्वितः ॥२३॥
महासिद्धिर्भवेत्तस्य अणिमादिर्न संशयः ॥ अगस्त्यतीर्थाद्वायव्यदिशि किञ्चित् द्विजोत्तम ॥२४॥
चत्वारिंशत्पदे तच्च स्थितं वह्निशरीरज ॥ गारुडं तन्महातीर्थं सिद्धेः साधनमुत्तमम् ॥२५॥
शतशृङ्गं स्थापयित्वा कृत्वा तीर्थं महत्तरम् ॥ तत्रैव विधिवत्स्नात्वा गरुडः पततां वरः ॥२६॥

स्वमूर्तिं स्थापयित्वा तु विष्णुसान्निध्यमागमत् ॥

अगस्त्योपि महातेजा स्वनाम्ना तीर्थमुत्तमम् ॥२७॥
विधाय लिङ्गं संस्थाप्य वरदेश्वरनामकम् ॥ बहुकालं तपः कृत्वा सिद्धिं प्राप्य महेश्वरात् ॥२८॥
यथाकालं स गोकर्णे स्थितवान् मुनिसत्तमः ॥

## तपोवनं

सूत उवाच ॥

तपोवनं पुण्यतमं देवानां विश्रुतं महत् ॥२९॥
आब्रह्मतीर्थाद्ब्रह्मर्षे गङ्गाधारान्तमिष्यते ॥ शतशृङ्गस्य भद्रन्ते तटं पूर्वोत्तरं द्विज ॥३०॥
तपोवनं पुण्यतमं देवगन्धर्वसेवितम् ॥

## कोटितीर्थं

तीर्थकोटिस्तु तत्रैव एकस्था भवति द्विज ॥३१॥
भयात्पतङ्गराजस्य एकीभूतं पुरातनम् ॥ तदेतद्दृश्यते ब्रह्मन् शतशृङ्गोत्तरे तटे ॥३२॥
कोटितीर्थमिति ख्यातं तीर्थकोट्युद्भवं मुने ॥ तस्मिन्स्नातः सर्वतीर्थे स्नातो भवति मानवः ॥३३॥
दशाश्वमेधावभृथेन तुल्यं वदन्त्याप्ताः कोटितीर्थं द्विजाग्र्याः ॥
स्नानात् पुण्यं पुण्यकृतां वरिष्ठं स्नाता अस्मिन्नाकपृष्ठं व्रजन्ति ॥३४॥ (कोटितीर्थमाहात्म्यं)

नारद उवाच ॥

गिरेः शृङ्गवतः पुत्र तटे दक्षिणपश्चिमे ॥ अपरं कोटि विप्रर्षे तीर्थानां पावकात्मज ॥३५॥
भयात् पतङ्गराजस्य समुद्रं प्रविवेश ह ॥ शतशृङ्गं गिरिवरं नाकपष्ठं विदुर्बुधाः ॥३६॥
ब्रह्मलोक इति प्रोक्तो ब्रह्मावासं च तं विदुः ॥ ध्यातो रुद्रेण मनसा शतशृङ्गगमे मुने ॥३७॥
रुद्राज्ञया विप्रवर सारभूतानि सर्वतः ॥ आगतानि द्विजश्रेष्ठ बहुना कथितेन किम् ॥३८॥
तस्माच्छ्रेष्ठतमं लोके गोकर्णमभिधीयते ॥ गोकर्णे च द्विजश्रेष्ठ शृङ्गवानुत्तमोत्तमः ॥३९॥

## विशालबिल

गिरेरधस्तात्तत्रैव विशालं नाम वै द्विज ॥ बिलं विबुधराजस्य विश्वकर्मा चकार ह ॥४०॥
क्रीडत्यहर्निशं तत्र सह सिद्धैः सुरेश्वरः ॥ मासमेकं सुरश्रेष्ठ वसत्याखण्डलः प्रभुः ॥४१॥
आगत्य विषुसङ्क्रान्त्यां सह देवैर्महर्षिभिः ॥ स्नात्वा सर्वेषु तीर्थेषु रुद्रपूजापरायणः ॥४२॥

आश्विने मासि विप्रर्षे सह गन्धर्वराक्षसैः ॥ सहाप्सरोभिर्भगवान् बिले तस्मिन् महायशाः ॥४३॥
क्रीडित्वा तत्र भद्रन्ते उषित्वा च द्विजोत्तम ॥ कार्तिके मासि भगवान् पुनर्गच्छेद्यथेप्सितम् ॥४४॥
यावदास्ते सुरपतिस्तावत् त्रैलोक्यमत्र च ॥ यथास्थानं यथाजोषं गोकर्णे वसति द्विज ॥४५॥
तस्मादश्वयुजो मासः श्रेष्ठस्तत्तीर्थसेवने ॥ तुलाकार्तिकमासं च तन्मासादधिकं विदुः ॥४६॥
तुलागते भास्करे च सुरासुरसपन्नगाः ॥ स्नातुमायान्ति गोकर्णे स्नात्वा यान्ति कृतार्थताम् ॥४७॥
इन्द्रः सर्वसुरैः सार्धमागत्य विषुसङ्क्रमे ॥ गोकर्णस्थेषु तीर्थेषु स्नात्वा मासं वसेद्बिले ॥४८॥
स्नात्वा कार्तिकपौर्णम्यां पुनर्गच्छेद्यथासुखम् ॥ तस्माद्गोकर्णयात्रायां विषुयुक्कार्तिको वरः ॥४९॥
भोगार्थं देवराजस्य निर्मितं विश्वकर्मणा ॥ गोकर्णे तद्बिलश्रेष्ठं सिद्धचारणसेवितम् ॥५०॥
विशालं नाम भद्रन्ते सर्वभोगसमन्वितम् ॥ य इदं पठते नित्यं शतशृङ्गगमं द्विज ॥५१॥

शृणोति श्रद्धया युक्तो सर्वभोगसमन्वितः ॥ बलवान् बुद्धिसम्पन्न अन्ते मुक्तिं स विन्दति ॥५२॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे शतशृङ्गविशालबिलमहात्म्यवर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥३३॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ३४ ॥  NEXT>>  श्लोक संख्या–४९

॥ गोगर्भ– अगस्त्यतीर्थ,वरदेश्वरवर्णनम् ॥

## गोगर्भ

नारद उवाच ॥

संवर्तक महाबुद्धे शृणु चान्यत् द्विजोत्तम ॥ यत्र भूम्या तपस्तप्तं गोगर्भमिति विश्रुतम् ॥१॥
यत्र प्रवेशमात्रेण न पुनर्गर्भभाङ्नरः ॥ शतशृङ्गगिरेर्मूर्ध्नि स्थितं तत्रैव शोभनम् ॥२॥

संवर्तक उवाच ॥

कुतो भूम्या तपस्तप्तं वद कारुण्यतो मुने ॥३॥

नारद उवाच ॥

यदा क्षत्रियदायादा निहताः पृथिवीतले ॥ तदा भार्गवरामेण यज्ञार्थं याचितो मुनिः ॥४॥
कश्यपः परमोदारस्तदा यज्ञमकारयत् ॥ ततो भार्गवरामोऽसौ तस्मै सर्वां वसुन्धराम् ॥५॥

प्रददौ कश्यपायैव सर्वस्वं दक्षिणां द्विज ॥ तां भूमिं कश्यपो ब्रह्मन् ब्राह्मणेभ्यः पृथक् पृथक् ॥६॥

संविभज्य ददौ सर्वां यथायोग्यं महामुनिः ॥ अराजका तदा चासीत् सर्वा भूमिर्महामुने ॥७॥
अराजकत्वाल्लोकस्तु यथेच्छं परिवर्तितः ॥ बभूवातितरां लोके अधर्मो लोकनाशनः ॥८॥
यदा भूमिरधर्मं तत् सोढुं नाक्षमतानघ ॥ तदा गोकर्णमासाद्य शतशृङ्गस्य मूर्धनि ॥९॥
अधोभागं प्रविश्यैव प्राणायामपरायणा ॥ ब्रह्मा कमण्डलुं पूर्वं स्थापयामास यत्र वै ॥१०॥
तस्मादीशानतो देशे चचार सुचिरन्तपः ॥ भूमित्वं कश्यपश्चक्रे तदा सर्वधरात्मकम् ॥११॥
दिव्यवर्षसहस्रं तु सर्वं दध्रे महामुनिः ॥ तपस्यन्त्यां ततो भूम्यां तस्यै तुष्टो महेश्वरः ॥१२॥
आविर्बभूव देवेशः पार्वत्या सह शङ्करः ॥ ततो भूमिं समीक्ष्यैव वरं ब्रूहीत्यभाषत ॥१३॥
तुष्टोस्मि तपसा भद्रे भक्त्या च नियमेन च ॥ किं तेऽभीष्टं मम ब्रूहि तद्ददाम्यविलम्बितम् ॥१४॥
इति शर्वेरितं श्रुत्वा वाक्यं भूमिस्तदा द्विज ॥ तं प्रणम्य धरा देवी स्तोतुं समुपचक्रमे ॥१५॥

भूमिरुवाच ॥

नमस्ते विष्णुमित्राय लोकपालार्थिताय च ॥ नमस्त्रिशूलहस्ताय त्रिनेत्राय त्रिमूर्तये ॥१६॥
जगन्नाथ नमस्तेस्तु भक्तप्रिय नमोस्तु ते ॥ इति स्तुत्वा तदा देवी वाक्यमेतदुवाच तम् ॥१७॥

वरं ददासि चेन्मह्यं वरार्हा यदि चाप्यहम् ॥ तर्हि वृणोम्यहं त्वत्तः सिद्धिं चानन्यदुर्लभाम् ॥१८॥
अराजकमिदं विश्वं यथापूर्वं कुरु प्रभो ॥ इदं मम तपस्थानं गोगर्भमिति विश्रुतम् ॥१९॥
अत्र प्रवेशमात्रेण नराणां पार्वतीपते ॥ न पुनर्गर्भवासश्च यथा भूयात्तथा कुरु ॥२०॥

शङ्कर उवाच ॥

सिद्धासि पूर्वमेव त्वं मत्प्रसादाद्वरानने ॥ राजन्वती भव शुभे काश्यपीति प्रथा भवेत् ॥२१॥
इदं तव तपस्थानं त्वन्नाम्ना विश्रुतं भवेत् ॥ अत्र प्रवेशनान्नृणां न भवेद्गर्भसंस्थितिः ॥२२॥
पापिष्ठाश्चापि मुच्यन्ते किं पुनः सुजना नराः ॥ अत्र स्थित्वा नरो यस्तु गायत्रीं लक्षकृज्जपेत्
॥२३॥
भूमिलाभो भवेत्तस्य वाञ्छितार्थं च विन्दति ॥ इति दत्वा वरं देव्यै शङ्करो लोकभावनः ॥२४॥
पार्वत्या प्रमथैः सार्धं तत्रैवादर्शनं गतः ॥ भूमित्वं प्राप्य सा देवी यथापूर्वं द्विजोत्तम ॥२५॥

शिवान्निरामयं लब्ध्वा काश्यपीति प्रथामगात् ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥२६॥

## वरदेश्वर,अगस्त्यतीर्थयोः वर्णनम् ॥

संवर्तक उवाच ॥

अगस्त्यो भगवान् ब्रह्मन् किमकार्षीद्विजोत्तमः ॥ वसिष्ठश्च महातेजास्तन्मे विस्तरतो वद ॥२७॥

संवर्तकस्य तु वचः श्रुत्वा वै नारदो मुनिः ॥ तं प्रश्नं कथयामास वह्निजाय महामुनिः ॥२८॥

नारद उवाच ॥

शृणु विप्र प्रवक्ष्यामि वसिष्ठागस्त्ययोर्महत् ॥ चरितं सर्वपापघ्नं समासेन मयेरितम् ॥२९॥

ब्रह्मचर्यव्रते युक्तो अगस्त्यो द्विजसत्तमः ॥ तपश्चचार घोरं स तपोवनगतः प्रभुः ॥३०॥

रुद्रं प्रति महाभागः सुचिरं द्विजसत्तमः ॥ ततस्तुतोष भगवान्नीलकण्ठोऽम्बिकान्वितः ॥३१॥

आविर्बभूव तं विप्रं वरं ब्रूहीति चाब्रवीत् ॥ अगस्त्योऽपि महातेजा महादेवं प्रणम्य च ॥३२॥

आह तं वै वरं मेऽद्य दर्शनं ते सुरोत्तम ॥ त्वद्दर्शनमपुण्यानां स्वप्नेष्वपि च दुर्लभम् ॥३३॥

त्वत्पाददर्शनाकांक्षी तपश्चरितवानहम् ॥ दर्शनाद्देवदेवेश कृतार्थोस्मि न संशयः ॥३४॥

इतो हि मे देवदेव वरमन्यन्न विद्यते ॥ यद्यन्योस्ति मम विभो तद्भवाननुचिन्तय ॥३५॥

शङ्कर उवाच ॥

अमोघं दर्शनं सिद्धिर्मदीयं ब्राह्मणोत्तम ॥ तस्माद्ददामि ते विप्र वृणीष्व वरमुत्तमम् ॥३६॥

अगस्त्य उवाच ॥

धर्मे रतिर्दमे सत्ये दाने तपसि च प्रभो ॥ त्वत्पादयुगले चैव अचला भक्तिरस्तु मे ॥३७॥

यावदिच्छाम्यहं देव जीवितुं सुरसत्तम ॥ तावन्न भविता मृत्युर्वरमेतद्वृणोम्यहम् ॥३८॥

शङ्कर उवाच ॥

एते गुणास्त्वयि विभो उपपन्नाः स्वभावतः ॥ मत्प्रसादाद्विशेषेण सर्वमुक्तं भविष्यति ॥३९॥

पुनस्त्वं ब्रूहि विप्रेन्द्र वरं दास्ये तवानघ ॥ प्रीतश्चाहं तव मुने भक्त्या चानन्यपूर्वया ॥४०॥

अगस्त्य उवाच ॥

यद्येवं देवदेवेश प्रसन्नश्चेद्भवान् मम ॥ सर्वज्ञत्वं वृणे देव प्राकाश्यं सर्ववस्तुषु ॥४१॥

तीर्थमेतत् सुरश्रेष्ठ लिङ्गञ्च मम शङ्कर ॥ लोके श्रेष्ठं भवतु वै सर्वसिद्धिकरं तथा ॥४२॥

शङ्कर उवाच ॥

त्वया कृतमिदं तीर्थं लिङ्गञ्च मुनिसत्तम ॥ सर्वसिद्धिप्रदं चास्तु मत्प्रसादान्न संशयः ॥४३॥
अत्र स्नात्वा यथान्यायं आर्द्रासु मुनिसत्तम ॥ आश्विने च विशेषेण त्वल्लिङ्गं पूजयन्ति ये ॥४४॥

यद्यदिच्छन्ति मनुजास्तद्ध्रुवं प्राप्नुवन्ति ते ॥ इति दत्वा वरं तस्य भगवान् लोकभावनः ॥४५॥
सर्वभूतैः सह विभुस्तस्मिन् लिङ्गे लयं गतः ॥ तदा प्रभृति तल्लिङ्गं वरदेश्वरसंज्ञकम् ॥४६॥
अगस्त्यतीर्थात् सविधे नैर्ऋत्यां दिशि संस्थितम् ॥ अगस्त्योऽपि महातेजा योगैश्वर्यमवाप्य च ॥४७॥
यथाकामं च ब्रह्मर्षिर्जगाम तपसां निधिः ॥ य इदं पुण्यमाख्यानं शृणोति श्रद्धया नरः ॥४८॥
सर्वान् कामानवाप्नोति इह लोके परत्र च ॥४९॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे गोगर्भ,वरदेश्वरवर्णनं नाम चतुस्त्रिंशोऽध्यायः ॥३४॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ३५ ॥  NEXT>>  श्लोक संख्या–५१

॥ उपक्रमः – निमेः कथा – वसिष्ठाश्रम,वसिष्ठेश्वर,वसिष्ठकुंडोत्पत्तिः ॥

## वसिष्ठेश्वरकथोपक्रमः

संवर्तक उवाच ॥

वसिष्ठस्य च देवर्षे जन्म कर्म च पौर्विकम् ॥
ब्रह्मणो मानसः पुत्र इति पूर्वं मया श्रुतम् ॥ इदानीं त्वन्यथा जातं कथितं भवता मम ॥१॥
तत्सर्वं विस्तराद्ब्रह्मञ्छ्रोतुमिच्छामि कथ्यताम् ॥

नारद उवाच ॥

शृणु तस्य महत्पुण्यं चरितं ब्राह्मणस्य च ॥२॥
ब्रह्मणो मानसः पुत्रो वसिष्ठो नात्र संशयः ॥ तेजसा तत्समो विप्र तपसा च दमेन च ॥३॥
लोकानुग्रहकृच्छान्तः क्षमया पृथिवी समः ॥ तेजसा भास्करसमो गाम्भीर्ये वरुणोपमः ॥४॥
कोपे कालानलसमो योगानामीश्वरः प्रभुः ॥ हिमवन्तं समागम्य तपः कुर्वन्नुवास सः ॥५॥
इक्ष्वाकुर्मनुजश्रेष्ठः पौत्रः सूर्यस्य वीर्यवान् ॥ वरयामास तेजस्वी वसिष्ठं गुरुमात्मनः ॥६॥

शुश्रूषया द्विजश्रेष्ठ नृपस्य प्रददौ प्रभुः ॥ वेदान् साङ्गोपनिषदान् सर्वशास्त्राणि चैव हि ॥७॥
ब्रह्मविद्याञ्च विप्रर्षे प्रसन्नोऽध्यापयत्तदा ॥ अवाप्य विद्यामिक्ष्वाकुर्वरमन्यमयाचत ॥८॥
मदन्वये जनिष्यन्ति ये नृपाः पृथिवीश्वराः ॥ तेषां पुरोधास्त्वं विप्र गुरुश्च भव मानद ॥९॥

---

## निमेः कथा

नारद उवाच ॥

तथा करिष्य इत्युक्तो मुनिना स नृपस्तदा ॥ तदन्वये शुद्धमतिरभवत् पार्थिवोत्तमः ॥१०॥
निमिर्नाम महातेजा राजा परमधार्मिकः ॥ शापं ददौ स्वगुरवे तत्याज तत्कलेवरम् ॥११॥
त्यक्त्वा शरीरं भगवान् वसिष्ठोपि महातपाः ॥ ब्रह्मलोकं जगामाशु सह राज्ञाथ सत्तमः ॥१२॥

संवर्तक उवाच ॥

किमर्थं स्वगुरुं ब्रह्मन् शप्तवान्राजसत्तमः ॥ किङ्कृतं तस्य राजर्षेर्वसिष्ठेन महात्मना ॥१३॥

नारद उवाच ॥

इक्ष्वाकुवंशप्रभवो राजा परमधर्मिकः ॥ निमिर्नाम महातेजा मृगयामगमद्वशी ॥१४॥
व्यायामखिन्नो राजा तु स्वगृहं पुनरागमत् ॥ हत्वा मृगान् बहुविधानटव्यां विचचार ह ॥१५॥
क्षुत्तृड्भ्यां स महातेजाः पीडितः पुरुषर्षभः ॥ श्रमार्तः शयने दिव्ये सुष्वाप नरपुङ्गवः ॥१६॥
निद्रयापहृतज्ञानो मृतकल्पो बभूव ह ॥ तावद्वसिष्ठो भगवान् तत्पुरं समुपागमत् ॥१७॥
द्वारदेशं समागम्य द्वास्थं वचनमब्रवीत् ॥ गच्छ द्वास्थ ममादेशाद्राजानं पृथिवीपतिम् ॥१८॥
ब्रूहि तं दर्शनाकांक्षी वसिष्ठो द्वारि तिष्ठति ॥ तथेत्युक्त्वा ततो द्वास्थस्तद्गृहं प्रविवेश ह ॥१९॥
प्रविश्य दृष्ट्वा शयने दृढनिद्रामुपागतम् ॥ तत्पार्श्वस्थैः सह तदा मन्त्रयित्वा विनिर्गतः ॥२०॥
कृताञ्जलिपुटो भूत्वा द्वास्थो मुनिमुवाच ह ॥ निद्रयापहृतज्ञानो राजा शेते महामुने ॥२१॥
मुहूर्तं क्षम्यतामत्र प्रतिबुद्धो भवेदसौ ॥ ततश्चुकोप भगवान् वसिष्ठस्तपसां वरः ॥२२॥
नाश्रमं प्रतिगन्तासि नमोस्तु द्विजसत्तम ॥ पुनः पुनरमेयात्मा मा गच्छत्वित्यभाषत ॥२३॥
तदश्रुत्वा मुनिश्रेष्ठो राजानं पृथिवीपतिम् ॥ क्षम्यतामिति तैरुक्तोप्यशपद्राजसत्तमम् ॥२४॥
मामवज्ञाय दुर्बुद्धे दर्शनेप्सुमुपागतम् ॥ निद्रां निषेवसे यस्मादशरीरो भविष्यसि ॥२५॥
इत्युक्त्वा प्रययौ विप्रो वसिष्ठो गतकल्मषः ॥ ततः प्रबुद्धो राजर्षिर्निमिः सत्यपराक्रमः ॥२६॥
अस्वस्थ इव राजेन्द्रो गुरुशापप्रपीडितः ॥ तस्य तत्कथयामास शापं कोपञ्च सत्तम ॥२७॥
वसिष्ठस्य महाबुद्धिरमात्यप्रवरो नृपम् ॥ तच्छ्रुत्वा राजशार्दूलो गुरोः शापमकारणम् ॥२८॥

निद्रयापहृतज्ञानं मृतकल्पमसौ गुरुः ॥ अनागसमनर्हं च शापाय कृतनिश्चयः ॥२९॥
यस्मादनर्हते शापं दत्तं द्विजवर त्वया ॥ तस्मात्तवापि ब्रह्मर्षे क्षेत्रं नाशमुपेष्यति ॥३०॥
इत्युक्त्वा नरवरः सोऽथ तदा त्यक्त्वा कलेवरम् ॥ अशरीरो वायुभूतो ब्रह्माणं समुपागमत् ॥३१॥
वसिष्ठोपि महातेजास्त्यक्त्वा क्षेत्रं महामते ॥ ब्रह्माणमभिचक्राम शरीरार्थी द्विजोत्तमः ॥३२॥
तं दृष्ट्वा भगवान् ब्रह्मा वायुभूतं द्विजोत्तमं ॥ चिन्तयामास स तदा कथमेतौ करिष्यतः ॥३३॥
अवसिष्ठो ह्ययं लोको नश्यते नात्र संशयः ॥ इति मत्वा वसिष्ठं तु विरिञ्चः प्राह बुद्धिमान् ॥३४॥
गच्छ त्वं विप्रशार्दूल ख्यातं पुण्यतमं महत् ॥ तपोवनमिति ख्यातं गोकर्णे वरुणाश्रमम् ॥३५॥
मित्रेण सार्धं तस्मिन् स घोरे तपसि वर्तते ॥ तत्र गत्वा त्वमपि वै तस्य विप्रस्य चोदरम् ॥३६॥
प्रविश्य पुत्र देहं च समाप्नुहि ममाज्ञया ॥ इत्युक्त्वा तं पद्मयोनी राजानं प्रत्यभाषत ॥३७॥
मत्तः किमिच्छसि राजन् ब्रूहि तद्वितराम्यहम् ॥

निमिरुवाच ॥

नेच्छामि भगवन् क्षेत्रमनित्यमतिचञ्चलम् ॥३८॥
चक्षुषोः सर्वमर्त्यानां वसेयं शाश्वतीः समाः ॥ त्वत्प्रसादाद्देवदेव वरमेतद्वृणोम्यहम् ॥३९॥
साक्षिवत् सर्वभूतेषु विचरामीति मे मतिः ॥ ततो ब्रह्मा वरं तस्मै तदैव प्रददौ विभुः ॥४०॥
तदा प्रभृति राजर्षिर्मर्त्यानां नेत्रयोः स्थितः ॥ तदारभ्य नरा राजन् बभूवुः सनिमेषकाः ॥४१॥
तस्मान्मनुष्याद्देवाश्च भेदयुक्तास्तदाऽभवन् ॥

---

## वसिष्ठाश्रम वसिष्ठेश्वर वसिष्ठकुंड

नारद उवाच ॥

वसिष्ठोपि महातेजा अगस्त्येन सह द्विज ॥४२॥
तपश्चचार सुचिरं तपोवनगतः प्रभुः ॥ ततो देहं च सम्प्राप्य वरुणान्मुनिसत्तमात् ॥४३॥
पुनश्चचार सुचिरं तपो घोरं महामुनिः ॥ तपोवने पुण्यतमे प्राणायामपरायणः ॥४४॥
लिङ्गं तत्र प्रतिष्ठाप्य तीर्थं कृत्वा सुनिर्मलम् ॥ ततो रुद्रेण तुष्टेन तपसा तस्य धीमतः ॥४५॥
अगस्त्यस्य यथा दत्तं तथा तस्यापि सुव्रत ॥ योगैश्वर्यादिसिद्धिं च इच्छावासं महीतले ॥४६॥
अवाप्य शम्भोर्मुनिपो यथाकामं जगाम ह ॥ दक्षिणेऽगस्त्यतीर्थात्तु शरपाते द्विजोत्तम ॥४७॥
वसिष्ठस्याश्रमं पुण्यं तस्य शृङ्गवतस्तटे ॥ तीर्थं श्रेष्ठं महापुण्यं वसिष्ठं कुण्डमुच्यते ॥४८॥

वसिष्ठेश्वरसंज्ञं तल्लिङ्गं तत्रैव तिष्ठति ॥ रहस्यं तत्र जानन्ति मनुष्याः पापकर्मिणः ॥४९॥
तत्र स्नात्वा नरो भक्त्या वसिष्ठेशं समर्चयेत् ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥५०॥
यत्पृष्टं कथितं सर्वं किमन्यच्छ्रोतुमिच्छसि ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे वसिष्ठाश्रममहिमानुवर्णनंनाम पञ्चत्रिंशोऽध्यायः ॥३५॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ३६ ॥  NEXT>>  श्लोक संख्या–६५

## ॥ विश्वामित्रकथा–विश्वामित्रोत्पत्तिः ॥

### विश्वामित्रकथोपक्रमः

संवर्तक उवाच ॥

विश्वामित्रः कथं ब्रह्मन् ब्राह्मण्यं समुपागतः ॥ कोऽसौ राजर्षिवर्यश्च विश्वामित्रो महाशयः ॥१॥
राजा भूत्वा महातेजा ब्राह्मण्यं प्राप्तवान् कथम् ॥ कस्य वंशे समुत्पन्नः कथं सिद्धिमुपागतः ॥२॥

नारद उवाच ॥

श्रूयतामभिधास्यामि कथां पुण्यां द्विजोत्तम ॥ ब्रह्मणो मानसः पुत्रो कुशिको नाम वीर्यवान् ॥३॥
पालनार्थं भुवः सृष्टः सृष्टिकर्त्रा स्वयम्भुवा ॥ स पालयामास जगत् त्रैलोक्यं सचराचरम् ॥४॥
तस्य पुत्रो महानासीत् कुशनाभिरिति श्रुतः ॥ स पालयामास ततो पितर्युपरते सति ॥५॥
तस्याप्यभूद्गाधिरिति पुत्रः पुत्रवतां वरः ॥ पालयामास सुचिरं सप्तद्वीपां वसुन्धराम् ॥६॥
धर्मेण नरशार्दूलो यथासृष्टं स्वयम्भुवा ॥ आधयो व्याधयो नासन् तथा जन्तोर्भयं महत् ॥७॥
अगाधबुद्धेर्गाधेस्तु ब्रह्मोत्तरमवर्धत ॥ अधर्मेषु रतिः क्वापि नासीद्राजनि शासति ॥८॥
रञ्जनात् सर्वभूतानां राजनाम्ना प्रतीयते ॥ साम्राज्यमकरोद्राजा सम्राडिति तथोच्यते ॥९॥
कन्याकुब्जेति विख्याता नगरी तस्य धीमतः ॥ अनपत्यः स राजेन्द्रस्तपो घोरमतप्यत ॥१०॥
अमात्यप्रवरे तस्मिन्राजभारं समर्प्य च ॥ गत्वा तपोवनं घोरं तपस्यन्तं नृपोत्तमम् ॥११॥
यदृच्छयागतो ब्रह्मन् दूर्वासास्तं ददर्श ह ॥ उद्धृत्य बाहुं भद्रन्ते पादाङ्गुष्ठेन संस्थितम् ॥१२॥
तमुवाच महामन्युर्दूर्वासा मुनिपुङ्गवः ॥ क्षुधितोस्मि महाराज भोजनं मे प्रदीयताम् ॥१३॥
उष्णं नवमिदनीं मे प्रयच्छाहारमुत्तमम् ॥ इत्युक्तः स महाराजः प्रणिपत्य कृताञ्जलिः ॥१४॥

स्वागतं तेऽस्तु ब्रह्मर्षे ह्यपनेष्यामि ते क्षुधाम् ॥ आहारेणेति दिव्येन तमुक्त्वा पुरुषोत्तमः ॥१५॥
मृण्मयं पात्रमादाय भिक्षां देहीत्युवाच ह ॥ वृक्षराजं महास्कन्धमश्वत्थं ब्राह्मणोत्तम ॥१६॥
ततोश्वत्थान्महाभागा कन्या दिव्यस्वरूपिणी ॥ निर्गत्याहारमादाय दिव्यं तस्मै प्रदाय च ॥१७॥
दत्वा भैक्षं नृपायाथ तस्मिन्नेव विवेश सा ॥ तेनान्नेन स राजर्षिर्भोजयामास तं द्विजम् ॥१८॥
भुक्त्वा यथेष्टं भगवान् दूर्वासा ब्राह्मणोत्तमः ॥ तुतोष तस्य नृपतेस्तपसा च दमेन च ॥१९॥
बुध्या च विप्रशार्दूलो वरं ब्रूहीत्यभाषत ॥ ततो गाधिस्तं प्रणम्य अपुत्रोऽस्मि द्विजोत्तम ॥२०॥
प्रयच्छ पुत्रं ब्राह्मण्यं पितृपिण्डप्रदायकम् ॥ इत्युक्तस्तेन दूर्वासा ध्यानमास्ते महामुनिः ॥२१॥
ध्यात्वा चिरमुवाचेदं राजानं मुनिसत्तमः ॥ पुत्रस्ते भविता राजन् ध्रुवं राज्यं च पालयेत् ॥२२॥
सत्या मदीया राजेन्द्र वाणी नास्त्यत्र संशयः ॥ कन्यारत्नञ्च भद्रंते कुमारस्ते भविष्यति ॥२३॥
पुत्रस्ते राजशार्दूल विष्णुतुल्यो भविष्यति ॥ इत्युक्त्वा तं नृपवरं दूर्वासा मुनिपुङ्गवः ॥२४॥
उन्मत्तवेषस्तस्मात्तु तत्रैवान्तरधीयत ॥ गाधिश्चागत्य नगरीं पालयामास मेदिनीम् ॥२५॥
कथयामास राजेन्द्रो दूर्वासवचनं तदा ॥ अमात्येभ्यश्च देव्यै च यथावृत्तं तपोवने ॥२६॥

ततः कालेन महता कन्याकुब्जेऽप्सरोपमा ॥ अजायत विचित्राङ्गी कन्या कमललोचना ॥२७॥
तां कन्यां देवगर्भाभां दृष्ट्वा गाधिरनन्दत ॥ सत्या वाणीति तां दृष्ट्वा सोत्यन्तं राजकुञ्जरः ॥२८॥
नाम तस्याश्चकाराथ गिरा सत्यवतीति वै ॥ तं गत्वा प्रार्थयामास रुचिको भृगुनन्दनः ॥२९॥
तमाह गाधिर्धर्मात्मा शुल्कैर्देया सुता मम ॥ तमपृच्छद्रुचीकस्तु शुल्कं शुल्कवतां वरः ॥३०॥
ततो गाधिर्विचिन्त्यैवं रुचीकं वाक्यमब्रवीत् ॥ एकतः श्यामवर्णानां कुन्देन्दुसमवर्चसाम् ॥३१॥
सहस्रं वाजिमुख्यानां मनोमारुतरंहसाम् ॥ मह्यं प्रयच्छ विप्रेन्द्र कन्याशुल्कार्थमीप्सितम् ॥३२॥
रुचीकस्त्वेवमुक्तः स गत्वा वरुणसन्निधिम् ॥ एकतः श्यामवर्णानां गोक्षीरसमवर्चसाम् ॥३३॥
सहस्रं वाजिमुख्यानां मह्यं देहीत्ययाचत ॥ तथेत्युक्त्वा ददौ तस्मै प्रचेता यादसां पतिः ॥३४॥
आनीयाश्वांश्च तान् दिव्यान्रुचिकः पुनरागमत् ॥ धर्मेणोद्वाह्य तां कन्यां रुचिकस्तपतां वरः ॥३५॥
आश्रमं प्रतिचक्राम तया सार्धं द्विजोत्तम ॥ ततो रुचिकः सुप्रीतस्तया सह सुमध्यया ॥३६॥
अवसन्मुनिशार्दूलः पौलोम्या मघवानिव ॥ श्रुत्वा विवाहं पुत्रस्य भृगुः प्रीतोऽभ्ययात्सुतम् ॥३७॥
तमागतमभिप्रेक्ष्य पितरं पितृवत्सलः ॥ प्रत्युत्थाय तया सार्धं शिरसा ह्यनमद्गुरुम् ॥३८॥
उत्थापयामास गुरुः स्नुषया सहितं सुतम् ॥ स्नुषां दृष्ट्वा स भगवान् सुप्रीतेनान्तरात्मना ॥३९॥

तामब्रवीद्भृगुः पुत्रीं वरं ब्रूहीति सादरम् ॥ प्रसन्नचेतसं ज्ञात्वा श्वशुरं सा शुचिस्मिता ॥४०॥
मनसा चिन्तयामास पुत्रं मातुस्तथात्मनः ॥ वरमेतदिति ज्ञात्वा लज्जयाधोमुखी स्थिता ॥४१॥
चिन्तितं तदभिज्ञाय भृगुस्तां प्रत्यभाषत ॥ पुत्रस्ते भविता भद्रे तथा मातुस्तवानघे ॥४२॥
ऋतुस्नाता तु भवति माता च तव भामिनि ॥ आलिङ्गेतां पृथग्वृक्षं साऽश्वत्थं त्वमुदुम्बरम् ॥४३॥
मत्प्रसादादसंदिग्धं द्वयोः पुत्रौ भविष्यतः ॥ इत्युक्त्वा भगवान् तां च पुत्रप्रीत्या भृगुस्तदा ॥४४॥
यथागतं जगामाऽथानुज्ञाप्य स भृगुः सुतम् ॥ तेनोक्तं यत्तथा ते वै न चक्रातेऽन्यथा ह्यभूत्
॥४५॥
ततो गर्भः समभवत् कालेन महता द्विज ॥ ततः पुनरमेयात्मा भृगुरायात्तदाश्रमम् ॥४६॥
दृष्ट्वा रुचिकः पितरमायान्तं सूर्यवर्चसम् ॥ प्रत्युत्थाय सपत्नीकः शिरसा तमवन्दत ॥४७॥
भृगुस्तु भार्यां पुत्रस्य दृष्ट्वा प्रीतोभवत्तदा ॥ तामाहेदं स भगवान् विपर्यासः कृतस्त्वया ॥४८॥
आलिङ्गने यथा भद्रे मयोक्तं न कृतं त्वया ॥ तस्मात्तव सुतो भद्रे क्षत्राचारो भविष्यति ॥४९॥
भ्राता तव महाभागे क्षत्रियोपि चरेत्तपः ॥ ब्रह्माचारो भवेत् पुत्रि ब्राह्मणश्च भविष्यति ॥५०॥
इत्युक्ता भृगुणा सा तु श्वशुरं प्रत्यभाषत ॥ तव पौत्रो महाभाग त्वत्प्रसादादनिन्दितः ॥५१॥
ब्रह्माचारो भवेत्तात वरमेतद्वृणोम्यहम् ॥ तच्छ्रुत्वा भगवान् प्राह स्नुषां तां कमलेक्षणाम् ॥५२॥
पुत्रस्ते मत्प्रसादेन ब्रह्माचारो भविष्यति ॥ पौत्रस्तव महाभागे क्षत्राचारो भवेदिति ॥५३॥
इत्युक्त्वा प्रययौ विप्रः स्वमाश्रममनिन्दितः ॥ गाधिस्त्वरक्षत्तं गर्भं पुत्रजन्मसमुत्सुकः ॥५४॥
अजायत ततस्तस्यां विश्वामित्रः प्रतापवान् ॥ आदित्य इव तेजस्वी कामदेव इवापरः ॥५५॥
गाधिस्तु दृष्ट्वा पुत्रस्य मुखं पूर्णशशिप्रभम् ॥ हर्षेण महताविष्टो निधिं दृष्ट्वा यथाऽधनः ॥५६॥
सूतके वर्तमानं तं वागुवाचाशरीरिणी ॥ अयं तव सुतो राजन् चक्रवर्ती भविष्यति ॥५७॥
प्रभया तव पुत्रस्य त्रैलोक्यं प्रभविष्यति ॥ तेजसा तस्य राजेन्द्र देवासुरमहोरगाः ॥५८॥
गन्धर्वाप्सरसश्चैव मनुष्याः पशवस्तथा ॥ बिभेष्यन्ति महाराज इत्युक्त्वा विरराम ह ॥५९॥
तच्छ्रुत्वा राजशार्दूलः प्रीतिमानभवत्तदा ॥ पालयामास च पुनः सह पुत्रेण मेदिनीम् ॥६०॥
जाते कुमारे विप्रेन्द्र त्रैलोक्यं सचराचरम् ॥ येन मित्रमभूत् पुत्र विश्वं कौशिकसूनुना ॥६१॥
नाम तस्याकरोद्राजा विश्वामित्रेति सोप्युत ॥ गाधिस्तु दृष्ट्वा तनयं समर्थं राज्यपालने ॥६२॥
अभिषिच्य स्वराज्ये तं तपोवनमियात् स्वयम् ॥ तमागतं राज्यमथ विश्वामित्रः प्रतापवान् ॥६३॥
पालयामास पृथिवीं द्वितीय इव भास्करः ॥ दशवर्षसहस्राणि राज्यं कृत्वा महामनाः ॥६४॥

विरोधमगमद्राजा वसिष्ठेन महात्मना ॥ ततो ब्राह्मण्यमगमत् किमन्यच्छ्रोतुमिच्छसि ॥६५॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे विश्वामित्रोत्पत्तिवर्णनं नाम षट्त्रिंशोऽध्यायः ॥३६॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ३७ ॥  NEXT>>  श्लोक संख्या–५१

॥ विश्वामित्रकथा– वसिष्ठाश्रमगमनं – वसिष्ठेन सत्कारः ॥

## वसिष्ठाश्रमगमनं

संवर्तक उवाच ॥

किं निमित्तमभूद्वैरं विश्वामित्रवसिष्ठयोः ॥ महात्मनोश्च ब्रह्मर्षे श्रोतुमिच्छामि तत्वतः ॥१॥

नारद उवाच ॥

शृणु विप्र महत्पुण्यं चरितं तस्य धीमतः ॥ विश्वामित्रस्य भद्रन्ते सर्वकिल्बिषनाशनम् ॥२॥

स पालयामास चिरं सप्तद्वीपां वसुन्धराम् ॥ प्रजारक्षणधर्मेण साक्षाद्धर्म इवापरः ॥३॥

तेजसादित्यसदृशः क्षमया पृथिवीसमः ॥ पराक्रमे विष्णुसमः कोपेऽन्तकसमप्रभः ॥४॥

अश्विनाविव रूपेण ज्ञाने रुद्र इवापरः ॥ तस्य धर्मरतस्यासीत् पृथिवी वशवर्तिनी ॥५॥

तेजसा तस्य नृपतेर्देवासुरमहोरगाः ॥ भीतास्तिष्ठन्ति वशागाः किङ्करा इव नित्यशः ॥६॥

एवं साम्राज्यमकरोद्विश्वामित्रः प्रतापवान् ॥ स कदाचिन्महातेजा मृगयामगमद्वशी ॥७॥

हिमवन्तं गिरिवरं समग्रबलवाहनः ॥ नानाधातुसमाकीर्णं नानाद्रुमलताकुलम् ॥८॥

मृगैर्नानाविधैर्जुष्टं सिद्धचारणसेवितम् ॥ तं गन्धर्वाप्सरोभिश्च सुरकिन्नरसेवितम् ॥९॥

ऋषिभिर्ब्रह्मकल्पैश्च सेवितं वनमुत्तमम् ॥ तस्मिन् स राजा धर्मात्मा मृगयाव्यसनाकुलः ॥१०॥

मृगान्नानाविधान् विध्वा मेध्यान् क्षत्रियपुङ्गवः ॥ उन्मत्त इव राजेन्द्रो गिरौ तस्मिन् व्यधावत ॥११॥

ततः स राजा विप्रर्षे क्षुधया पीडितो भृशम् ॥ तृषया च नृपश्रेष्ठो व्यायामेन च पीडितः ॥१२॥

आश्रमं प्रतिचक्राम वसिष्ठस्य महात्मनः ॥ पादे तु शतशृङ्गस्य रम्यं मुनिनिषेवितम् ॥१३॥

पुण्यतीर्थैः समाकीर्णं ब्राह्मणैश्च समावृतम् ॥ प्रशान्तमृगभूयिष्ठं पक्षिभिश्च निषेवितम् ॥१४॥

गजाः सिंहैः सह विभो रमन्ते तत्र तत्र हि ॥ ततो व्याघ्रैर्मृगा विप्र मार्जारैः सह मूषकाः ॥१५॥

शान्तानि सर्वभूतानि वने तस्य तपोनिधेः ॥ फलपुष्पान्वितैर्वृक्षैरुपेतं पुण्यगन्धिभिः ॥१६॥

तमाश्रमं नृपवरः प्रविवेश यदृच्छया ॥ तदा शिष्यैः परिवृतो वसिष्ठो द्विजसत्तमः ॥१७॥
शिष्यानध्यापयन्नास्ते विभावसुसमप्रभः ॥ तमभ्यगच्छद्राजेन्द्रो विश्वामित्रो महामनाः ॥१८॥

---

## वसिष्ठेन सत्कारः

ववन्दे शिरसाभ्येत्य ब्रह्माणं वासवो यथा ॥ तमाशीर्भिर्नृपश्रेष्ठमभिनन्द्येदमब्रवीत् ॥१९॥

वसिष्ठ उवाच ॥

स्वागतं ते महाराज आस्यतां सह मन्त्रिभिः ॥ आसनञ्च ददौ तस्मै सपर्यां चार्घ्यपूर्विकाम् ॥२०॥
कुशलं ते महाराज सर्वत्रेति तमब्रवीत् ॥ ततः स राजा सुप्रीतः पूजितो मुनिना भृशम् ॥२१॥
तमुवाच ततो हृष्टः सुप्रीतेनान्तरात्मना ॥

विश्वामित्र उवाच ॥

सर्वत्र कुशलं ब्रह्मन् दर्शनात्तव सुव्रत ॥२२॥
एवं परस्परं तौ तु सम्भाष्येदं द्विजोत्तम ॥ गोष्ठीभिरनुकूलाभिश्चिरं तुतुषतुश्च तौ ॥२३॥

ततः श्रान्तमभिज्ञाय विश्वामित्रं तपोनिधिः ॥ आमन्त्रयामास तदा सबलो भुज्यतामिति ॥२४॥
तच्छ्रुत्वा कौशिको राजा विस्मयोत्फुल्ललोचनः ॥ क्षत्तृड्भ्यां च भृशं राजा पीडितो वाक्यमब्रवीत्
॥२५॥
बलैर्नानाविधैर्ब्रह्मन् युक्तोऽहं केवलो न च ॥ हस्त्यश्वयुक्ता बहुला सेना मम दुरत्यया ॥२६॥
ततोऽशक्यं भोजयितुमनुज्ञां देहि मे प्रभो ॥ तच्छ्रुत्वा मुनिशार्दूलो विश्वामित्रस्य भाषितम् ॥२७॥
स्थीयतां राजशार्दूल भोजयिष्याम्यहं क्षणात् ॥ इत्युक्त्वाहूय सुरभिं नन्दिनीमिदमब्रवीत् ॥२८॥
प्रियोतिथिरसौ राजा ममाश्रममुपागतः ॥ सबलस्यास्य भद्रन्ते देहि भोजनमुत्तमम् ॥२९॥
यथाकामं यथाजोषं यथाप्रीतिर्यथासुखम् ॥ षड्रसैः सहितं देवि तस्यान्नं सम्प्रदीयताम् ॥३०॥
तथेत्युक्त्वा तु तं देवी कामधेनुर्दुदोह वै ॥ प्रासादपङ्क्तीर्विविधाः स्वर्णप्राकारतोरणाः ॥३१॥

हस्तिशालाश्वशालाश्च सभा मण्टपिकास्तथा ॥ ग्रहाणि तेषां सर्वेषां अनुरूपाण्यनेकशः ॥३२॥
कल्पयामास विविधा निमेषात् सुरभिस्तदा ॥ तेषु सर्वेषु च पुनस्त्रीरत्नान्यनुरूपशः ॥३३॥
गृहेषु कारयामास रत्नानि विविधानि च ॥ अपूपानि विचित्राणि घृतकुण्डानि भागशः ॥३४॥

गैप्यसौवर्णपात्रेषु सम्भृतानि दधीनि च ॥ सुरासम्पूर्णपात्राणि सौवर्णानि क्वचित् क्वचित् ॥३५॥
षड्रसैः समुपेतानि सम्पूर्णान्यन्नसञ्चयैः ॥ गन्धमाल्याद्यलङ्कारैर्भोज्यैर्नानाविधैरपि ॥३६॥
यथार्हं बुभुजुस्ते तु विश्वामित्रचमूजनाः ॥ हस्त्यश्वोष्ट्रास्तथाश्वाश्च यथाकामं च जक्षिरे ॥३७॥
मनुष्याश्च यथाकामं दिव्यस्रक्चन्दनोक्षिताः ॥ स्नात्वा विलिप्य विधिवदलङ्कृत्य यथार्हतः ॥३८॥
दिव्यवस्त्रानुसंवीता दिव्यान्नं बुभुजुस्तदा ॥ एकैकस्य चतुः कन्याः कन्यापरिचरास्तथा ॥३९॥
भुक्त्वा पीत्वा चमूरेवं यथाकामं यथासुखम् ॥ यथा सुकृतिनः स्वर्गभोगान् भुंजन्त्यनामयाः ॥४०॥
कर्मानुरूपं विप्रेन्द्र तथा ते बुभुजुस्तदा ॥ अभिप्रेतान् रसान् पीत्वा मत्ता नृत्यं प्रचक्रमुः ॥४१॥
पुनश्च पूर्ववद्भुक्त्वा सुप्रीतेनान्तरात्मना ॥ विस्मयं परमं जग्मुः किमेतदिति सैनिकाः ॥४२॥
ऊचुः परस्परं विप्र न यास्यामो गृहान् वयम् ॥ स्थास्यामोऽत्रैव सुचिरं स्वर्गोयं न तपोवनम् ॥४३॥

सिद्धा वयं न गच्छाम इत्याहुः सैनिकास्तदा ॥ नासीत् स्वपुत्रदारेषु स्पृहा तेषां द्विजोत्तम ॥४४॥
ततस्तत्रैव तत्रैव भुक्तं पीतं यथासुखम् ॥ तत्क्षणात्तद्बलं सर्वं तृप्तमासीत् द्विजोत्तम ॥४५॥
ततः स राजा विप्रर्षे मुमुदे मघवानिव ॥ स्नात्वा दिव्याम्बरधरो दिव्यगन्धानुलेपनः ॥४६॥
दिव्यस्त्रीभिः परिवृतो दिव्यान्नं बुभुजे नृपः ॥ ततः स भोगान् भुक्त्वा तु यथाकामं यथासुखम् ॥४७॥
सुखोपविष्टः शयने परार्घ्यास्तरणे तदा ॥ ततः सूता मागधाश्च वन्दिनश्च पृथग्विधाः ॥४८॥
स्तुवन्तो मधुरैर्वाक्यैस्तन्त्रीलयसमन्वितैः ॥ उपातिष्ठन्त राजानं शक्रं देवगणा इव ॥४९॥
ततो नृत्तैश्च गानैश्च मुमुदे स नृपोतमः ॥ वनं चैत्ररथं प्राप्य मोदते मघवान् यथा ॥५०॥
ततस्तां रजनीं तत्र सभृत्यबलवाहनः ॥ अवसद्राजशार्दूलः स्वर्गे सुकृतिनो यथा ॥५१॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे विश्वामित्रवसिष्ठाश्रमप्रवेशनिवासो नाम सप्तत्रिंशोऽध्यायः ॥३७॥

## ॥ विश्वामित्रकथा–वसिष्ठविश्वामित्रविरोधः युद्धं विश्वामित्रपराजयश्च– विश्वामित्रेश्वरः विश्वामित्राश्रमं विश्वामित्रतीर्थं च ॥

### वसिष्ठविश्वामित्रविरोधः युद्धं विश्वामित्रपराजयश्च

नारद उवाच ॥

व्यपनीय निशां तां तु सुखं सुप्तोत्थितो नृपः ॥ कृत्वा चावश्यकं कर्म वसिष्ठं पुनरागमत् ॥१॥
अभिवाद्योपसंहृत्य इदं वचनमब्रवीत् ॥ कामधेनुरियं ब्रह्मन् रत्नभूता मता मम ॥२॥
अयुतेन गवां बह्मन् ममैनां दातुमर्हसि ॥ योग्या ममैषा ब्रह्मर्षे दातुमर्हसि सुव्रत ॥३॥

वसिष्ठ उवाच ॥

न देया गौर्नृपश्रेष्ठ होमधेनुरियं मम ॥ अग्नीनामतिथीनां च हविर्भूता हि नन्दिनी ॥४॥
अयुक्तं तव राजेन्द्र ब्रह्मस्वं याचितुं विभो ॥ दाता त्वं ब्राह्मणेभ्यो वै राजा त्वं रक्षिता भुवः ॥५॥

विश्वामित्र उवाच ॥

यद्येतदेवं भगवन् मौल्यं दास्याम्यहं तव ॥ राज्येन भो मदीयेन देहि गां मम मानद ॥६॥
भुंक्ष्व राज्यं मुनिवर यथाकामं यथासुखम् ॥ लोकलोकान्तरगतां पृथिवीमनुशासय ॥७॥

वसिष्ठ उवाच ॥

रज्येनापि न देया गौर्ममेयं पार्थिवोत्तम ॥ न निर्बन्धस्त्वया कार्यो गच्छ पालय मेदिनीम् ॥८॥

नारद उवाच ॥

इत्युक्तस्तेन राजासौ कोपमाहारयद्भृशम् ॥ मन्युनाऽपहृतज्ञानो वसिष्ठमिदमाह च ॥९॥
नेष्यामि गां बलाद्विप्र रत्नार्हः क्षत्रियोऽस्म्यहम् ॥ राज्यादपि गरीयेयं विप्र येनेरितं त्वया ॥१०॥
राज्येन मम किं कार्यं हृतरत्नेन सुव्रत ॥ क्षमा बलं ब्राह्मणानां बलं क्षत्रेषु तैजसम् ॥११॥
तस्मान्नेष्यामि गां विप्र यथेच्छसि तथा कुरु ॥ इत्युक्त्वा कौशिको राजा अगृह्णात्तां पयस्विनीम् ॥१२॥
क्षमाऽस्माकं बलमिति तूष्णीमास्ते महामुनिः ॥ ततो गृहीत्वा तां क्रूराः कशादण्डप्रतोदनैः ॥१३॥
बध्वा रज्वा दृढं धेनुं वसिष्ठस्य महामुनेः ॥ विश्वामित्राज्ञया मर्त्या निश्चक्रमुर्वनाद्बहिः ॥१४॥
पाषाणैर्लगुडैर्दण्डैः पीडिता सुरभिर्भृशम् ॥ हुंकारैर्भर्त्सयित्वा तानाश्रमं पुनरागमत् ॥१५॥
क्रोधरक्तेक्षणा देवी वसिष्ठस्याग्रतः स्थिता ॥ उवाच च मुनिं धेनुः किमर्थं तेजसा प्रभो ॥१६॥

अनागसीं द्विजश्रेष्ठ तव शुश्रूषणे रताम् ॥ केन दोषेण भगवन् त्यक्ष्यसे मामनिन्दिताम् ॥१७॥
इति तस्यास्तु वचनं श्रुत्वा मेरोरिवाचलः ॥ वसिष्ठः प्राह तां धेनुं मम मन्युर्न विद्यते ॥१८॥
क्षमा बलं ब्राह्मणानां दण्डं वै क्षत्रियेषु च ॥ स्वधर्मान्न चलिष्यामि क्षमासारा हि साधवः ॥१९॥
न बुद्धिपूर्वं त्यक्तासि मया त्वं वरवर्णिनि ॥ विश्वामित्रबलैः क्रूरैः बलात्त्वं नीयसे शुभे ॥२०॥
इति तेनेरितं श्रुत्वा कामधेनुरुवाच ह ॥ शक्तोसि तपसा विप्र त्रैलोक्यं सचराचरम् ॥२१॥
स्रष्टुं संहर्तुमपि च किमु ते कौशिकोल्पकः ॥ शरणं त्वां प्रपन्नास्मि न मां त्यक्तुं त्वमर्हसि ॥२२॥

वसिष्ठ उवाच ॥

न करिष्यामि भद्रन्ते तपोव्ययमनिन्दिते ॥ सञ्चितस्यापि महतस्तपसो यशसः शुभे ॥२३॥
अल्पोऽपि कोपः सुभगे तूलराशिं कृशानुवत् ॥ क्षणेन भस्मसात् कुर्यात् तस्मात्कोपं त्यजाम्यहम् ॥२४॥
तच्छ्रुत्वा सुरभिर्वाक्यं वसिष्ठस्य महात्मनः ॥ कामधेनुरुवाचेदं सुरभिः सुरपूजिता ॥२५॥

सुरभिरुवाच ॥

अस्ति चेन्मय्यनुक्रोशो न यास्यामि महाव्रत ॥ बलं चैतन्नाशयामि यदि न त्यजते भवान् ॥२६॥
अहं तां वारयिष्यामि विश्वामित्रस्य वाहिनीम् ॥ अथ तामाह भगवान् क्रियतां यदि शक्यते ॥२७॥
न त्यक्तासि मया भद्रे यथेच्छसि तथा कुरु ॥ आकर्ण्य तद्वचः पुत्र सुरभिर्लोकपूजिता ॥२८॥
विश्वामित्रबलैर्घोरैः परितः परिवारिता ॥ सन्त्यज्य भूमिं तरसा गौराकाशमुपागमत् ॥२९॥
स्थिताऽन्तरिक्षे सुरभिः कामधेनुरनिन्दिता ॥ ससर्ज योधान् विविधान्नानाप्रहरणोद्यतान् ॥३०॥
अङ्गान् शकान् पुलिन्दांश्च म्लेञ्छानाराविकांस्तथा ॥ बर्बरान् पारदांश्चैव निर्मदान् मालवानपि ॥३१॥
पुच्छतः पादतः श्चैव घ्राणतश्चक्षुषस्तथा ॥ कर्णतो रोमतश्चैव नानारूपान् द्विजोत्तम ॥३२॥
नानावेषधरास्ते वै नानाप्रहरणोद्यताः ॥ चतुर्गुणाधिका विप्र बलैर्गाधिसुतस्य तु ॥३३॥
परिवार्य बलं ते तु सौरभेया महाबलाः ॥ क्षणात्ते नाशयांचक्रुः सिंहो मृगगणानिव ॥३४॥
तद्बलं पार्थिवेन्द्रस्य विश्वामित्रावशेषितम् ॥ दुर्वाससस्तु वचनाद्भृगोश्चैव महात्मनः ॥३५॥
भावित्वाच्च विधेः पुत्र मुक्तस्तस्मादसौ नृपः ॥ हत्वा तद्वाहिनीं ते वै सौरभेया महाबलाः ॥३६॥
विजह्रुस्ते यथाकामं देहं प्राप्य मुदान्विताः ॥ सुरभिश्चापि राजेन्द्र यथापूर्वमतिष्ठत ॥३७॥
स निःसैन्यस्ततो राजा एकाकी दुर्मना भृशम् ॥ वने निर्वेदमगमद्दृष्ट्वा ब्राह्मं महद्बलम् ॥३८॥

ब्राह्मणेषु बलं मत्वा धिक्कृत्वा क्षात्रियं बलम् ॥ तपसे कृतसङ्कल्पस्त्यक्त्वा राज्यमकण्टकम् ॥३९॥
शतशृङ्गमुपागम्य हिमवच्छिखरं महत् ॥ तपस्तेपे निराहारो द्रष्टुकामो महेश्वरम् ॥४०॥
सहस्रवर्षपर्यन्तं वाय्वम्बुकृतभोजनः ॥ ततो रुद्रस्तमभ्येत्य वरं ब्रूहीत्यभाषत ॥४१॥
वव्रे वरं स राजर्षिर्यथा तच्छृणु पावके ॥ वसिष्ठं हन्तुमिच्छामि तेजसा तव शङ्कर ॥४२॥
आयुधञ्च सहायञ्च वरमेतद्वृणोम्यहम् ॥ तथेत्युक्त्वा त्रिनेत्रस्तु रौद्रं दण्डमदात् प्रभुः ॥४३॥
भूतान्नानाविधांस्तस्य ददौ साहाय्यकर्मणि ॥ रौद्रं दण्डं समादाय वृतस्तत्पार्षदैर्नृपः ॥४४॥
वसिष्ठं पुनरागच्छद्धन्तुकामोऽतिनिर्घृणः ॥ वसिष्ठस्तु महातेजा ज्ञात्वा तस्य चिकीर्षितम् ॥४५॥
ब्रह्मदण्डमुपादाय स्थितः सूर्य इवापरः ॥ ततो रुद्रगणैः सार्धं रुद्रदण्डधरः प्रभुः ॥४६॥
युयुधे सुचिरं विप्र भूतैर्नानाविधैः सह ॥ तैः क्षिप्तान्यायुधानि सर्वाणि ग्रसितानि वै ॥४७॥
ब्रह्मदण्डेन भद्रन्ते किमन्यदधिकं द्विज ॥ निर्जितानि ब्रह्मदण्डात् रुद्रभूतानि सत्तम ॥४८॥
इतस्ततः पलायन्तस्त्यक्त्वा तं कौशिकं नृपम् ॥ ततश्चुकोप मूढात्मा वसिष्ठं हन्तुमुद्यतः ॥४९॥
क्रोधेन महताविष्टो लज्जया च नृपोत्तमः ॥ रौद्रं दण्डं समादाय वसिष्ठायाक्षिपद्बलात् ॥५०॥
वसिष्ठोपि महातेजाः कृत्वा रूपान्तरं महत् ॥ भूम्यन्तरिक्षकुहरं स्वरूपेण महाद्युतिः ॥५१॥
पूरयामास भगवान् वसिष्ठो ब्रह्मतेजसा ॥ ततो विदारयामास वक्त्राकाशं महामनाः ॥५२॥
भक्षयामास तं दण्डमौर्वाग्निं वरुणो यथा ॥ ततो जज्वाल भगवान् युगान्ताग्निरिवोत्थितः ॥५३॥
ब्राह्मेण रौद्रसंवृत्तः पूरयामास रोदसी ॥ ततो देवाः सगन्धर्वाः सयक्षोरगराक्षसाः ॥५४॥
भीत्या त्यक्त्वा स्वधिष्ण्यानि स्वस्त्यस्त्वित्यब्रुवंस्तदा ॥ रुद्रदण्डं तस्य तनुं दग्ध्वा रुद्रस्य तेजसा ॥५५॥
अमोघत्वान्महाबुद्धे रुद्रं पुनरुपागमत् ॥ ततो ब्रह्मा पुनस्तस्य शरीरमकरोत् प्रभुः ॥५६॥
अभेद्यमजरं दिव्यमविनाशं प्रजापतिः ॥ ब्राह्ममेव बलं लोके ख्यापयित्वा महामुनिः ॥५७॥
निरामयः पुनरसौ यथापूर्वमतिष्ठत ॥

## विश्वामित्रेश्वरः विश्वामित्राश्रमं विश्वामित्रतीर्थं च

ततो गधिसुतः श्रीमान् मत्वा वै ब्रह्म शाश्वतम् ॥५८॥
गोकर्णक्षेत्रमासाद्य कृत्वाश्रमपदं शुभम् ॥ शतशृङ्गगिरेर्मूर्ध्नि स्थाप्य लिङ्गमनुत्तमम् ॥५९॥

तस्याधस्ताच्छुभं तीर्थं कृत्वा गाधिसुतस्तदा ॥ तपश्चचार सुचिरं वर्षाणामयुतं प्रभुः ॥६०॥
पञ्चाग्निमध्यगो मौनी निराहारो जितेन्द्रयः ॥ तपसा महता विप्र तोषयामास शङ्करम् ॥६१॥
ब्रह्माणं लोककर्तारं विष्णुं त्रिभुवनेश्वरम् ॥ आविर्बभूवुर्देवेशास्तस्माल्लिङ्गान्मनोरमात् ॥६२॥
विश्वामित्रं च राजर्षिमब्रुवंश्च तदा सुराः ॥ वरं वरय भद्रन्ते वरदाः स्मो वयं मुने ॥६३॥
दास्यामस्ते गाधिसुत यत्ते मनसि वर्तते ॥ इति श्रुत्वा गाधिसुतो प्रणयादीरितं वचः ॥६४॥
विश्वामित्रस्तदा वाक्यं नत्वा तान् विबुधेश्वरान् ॥ वव्रे वरं गाधिसुतो त्रिमूर्तिभ्यो नरोत्तमः ॥६५॥
यदि प्रसन्ना देवेशा वरार्हो यदि चाप्यहम् ॥ ब्राह्मण्यं प्रार्थये देवा ब्रह्मदण्डमनुत्तमम् ॥६६॥
तीर्थमेतत् सुरश्रेष्ठा लिङ्गञ्चास्तु मनोहरम् ॥ सर्वसिद्धिकरं भूयात् त्रैलोक्ये चोत्तमं भवेत् ॥६७॥
विश्वामित्रेरितं श्रुत्वा ब्रह्मविष्णुमहेश्वराः ॥ ददुस्तदा वरं तस्मै ब्राह्मण्यं शाश्वतं द्विज ॥६८॥
ब्रह्मदण्डमभेद्यञ्च तथा लोकेषु पूज्यताम् ॥ तीर्थमेतद्गाधिसुत लिङ्गञ्चास्तु मनोहरम् ॥६९॥
तव नाम्ना ख्यतिमेतु त्रिषु लोकेषु सुव्रत ॥ इति दत्वा वरं तस्मै तत्रैवान्तर्दधुः सुराः ॥७०॥
तपसा श्रैष्ठ्यमापन्नस्त्रैलोक्ये स महातपाः ॥ देवासुराश्च तद्भीता वशे तिष्ठन्ति किङ्कराः ॥७१॥
सृष्टिसंहारकर्तासौ मनसैव महाद्युतिः ॥ तपसा सिद्धिमापन्नः शतशृङ्गे महातपाः ॥७२॥
रुद्रप्रसादाद्गोकर्णे परां सिद्धिमुपागतः ॥ विश्वामित्राश्रमं पुण्यं ब्रह्मकुण्डस्य दक्षिणे ॥७३॥
विवस्वता सह मुनिः सावित्र्या च द्विजोत्तम ॥ रुद्रेण च जगद्धात्रा सिद्धिमाप स शाश्वतीम् ॥७४॥
विश्वामित्राश्रमं पुण्यं सर्वपापहरं शुभम् ॥ तत्र गच्छन्ति ये केचित्तेषां सिद्धिर्भविष्यति ॥७५॥
तपोवृद्धिर्भवेत्तत्र पापं तेषां व्यपोहति ॥ अयने विषुसङ्क्रान्त्यामत्र स्नात्वा नरोत्तमः ॥७६॥
पूजयित्वा तु तल्लिङ्गं सावित्रीं लक्षसङ्ख्यया ॥ जपेद्यो ब्राह्मणो लोके सर्वलोकप्रपूजितः ॥७७॥
सप्तजन्म भवेद्विप्रो वेदवेदाङ्गपारगः ॥ पापिष्ठास्तत्र गच्छन्ति विश्वामित्रस्य तेजसा ॥७८॥
क्रियालोपो भवेद्येषां प्रमादाद्द्विजसत्तम ॥ तत्पूरयति विप्रेन्द्र अश्रमं श्रमनाशनम् ॥७९॥
विश्वामित्रकथां यो वै शृणुयात् स द्विजोत्तम ॥ अश्वमेधफलं विद्यात् किमन्यच्छ्रोतुमिच्छसि ॥८०॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे विश्वामित्रवसिष्ठयुद्धब्राह्मण्यप्रापणं नाम अष्टत्रिंशोऽध्यायः ॥३८॥

## ॥ सुमित्रेश्वर, – चिन्तामणि विनायक (पट्टविनायक) – गङ्गधारोत्पत्तिकथनम् ॥

### सुमित्रेश्वर

संवर्तक उवाच ॥

गङ्गधारेति भगवञ्छ्रुतं वै वदतोऽनघ ॥ माहात्म्यं तस्य तीर्थस्य उत्पत्तिं चैव शंस मे ॥१॥

नारद उवाच ॥

शृणु पुत्र कथां दिव्यां महर्षेर्भावितात्मनः ॥ सुमित्रो नाम विप्रेन्द्रो पौलस्त्यकुलसम्भवः ॥२॥
तेजसा विद्यया चापि साक्षान्मित्र इवापरः ॥ स सर्वभोगानुत्सार्य सिद्धिमिच्छन् महामनाः ॥३॥
क्षेत्रप्रवरमासाद्य गोकर्णं लोकविश्रुतम् ॥ तपस्तेपे निराहारः शतशृङ्गतटे शुभे ॥४॥
लिङ्गं तत्र प्रतिष्ठाप्य सुमित्रेश्वरनामकम् ॥ दिव्यवर्षसहस्रं स शिवमाराधयत् प्रभुः ॥५॥
तपसा महता विप्र सुमित्रस्य महात्मनः ॥ सुरराट् क्षोभमापन्नो विघ्नं चक्रे स वासवः ॥६॥
धैर्यान्न चलितः सोऽभूत् ततस्तुष्टोऽभवद्भवः ॥ तपसा महता विप्र सुमित्रस्य महात्मनः ॥७॥
समस्तभूतसहितः साक्षात्तस्याग्रतोऽगमत् ॥ तं दृष्ट्वा देवदेवेशं सुमित्रो द्विजसत्तमः ॥८॥
ववन्दे शिरसा शम्भुं भक्त्या निश्चलया द्विजः ॥ तमुत्थाप्य महादेवो वरं ब्रूहीत्यभाषत ॥९॥
सुमित्रोपि वरं वव्रे यथा तच्छृणु पावके ॥ इह देव तपश्चर्तुं त्वया सह सुरोत्तम ॥१०॥
इच्छामि देवदेवेश वरमेतद्वृणोम्यहम् ॥ तमुवाच महादेवः कथं स्थेयं मया द्विज ॥११॥
त्वया सार्धं द्विजश्रेष्ठ त्वल्लिङ्गे च वसाम्यहम् ॥ पार्वत्या प्रियया सार्धं भूतसङ्घैः समन्वितः ॥१२॥
यद्यदिच्छसि विप्रेन्द्र मनसाऽलभ्यमप्युत ॥ तत्तत् सिध्यति ते विप्र मत्प्रसादादसंशयम् ॥१३॥
इति दत्वा वरं तस्मै तस्मिंल्लिङ्गे महेश्वरः ॥ समस्तभूतसहितो निवासमकरोत्तदा ॥१४॥
सुमित्रोपि द्विजश्रेष्ठः प्रत्यक्षीकृत्य शङ्करम् ॥ पूजयामास विधिवद्भक्त्या चानन्यया शिवम् ॥१५॥

### चिन्तामणि विनायक (पट्टविनायक)

प्रत्यक्षीकृतदेवेशं तथा सिद्धमनोरथम् ॥ तं ज्ञात्वा मुनयः सर्वे शतशृङ्गनिवासिनः ॥१६॥
आनेतुं जाह्नवीं सर्वे वसिष्ठाद्या महर्षयः ॥ परस्परं समालोच्य सुमित्रान्नान्यतो भवेत् ॥१७॥
इति निश्चित्य मनसि स्वकार्यस्य तु सिद्धये ॥ कोटितीर्थाग्निदिग्भागे सप्तसप्ततितमे पदे ॥१८॥
विनायकं प्रतिष्ठाप्य पूजयित्वा यथाविधि ॥ नत्वा स्तुत्वा विघ्नराजं भक्त्या ते मुनिपुङ्गवाः ॥१९॥
एवं सम्पूजितः सोपि गजास्यो ऋषिभिस्तदा ॥ प्रत्यक्षीभूय चोवाच ऋषीन् प्रति गजाननः ॥२०॥

तुष्टोस्मि पूजया भक्त्या स्तुत्या च नियमेन च ॥ युष्मन्मनोगतं सर्वं मया ज्ञातं द्विजा हृदि ॥२१॥
सुमित्राख्यो मुनिवरस्तपसाराध्य शङ्करम् ॥ सान्निध्यं तस्य चावाप सर्वदा मुनिपुङ्गवाः ॥२२॥
गच्छध्वं तं मुनिवरं स वः कार्यं विधास्यति ॥ युष्माभिः पूजितं ये मां पूजयन्ति नरा भुवि ॥२३॥
तेषामिष्टार्थलाभञ्च दास्याम्येव न संशयः ॥ इत्युक्त्वा वचनं तेभ्यस्तत्रैवान्तर्दधे विभुः ॥२४॥
एवं सम्पूज्य ऋषयश्चिन्तामणिविनायकम् ॥ सुमित्रान्तिकमाजग्मुर्वसिष्ठाद्या महर्षयः ॥२५॥

---

## गङ्गाधारा

तत्र दृष्ट्वा महात्मानं सुमित्रं ज्ञानबृंहितम् ॥ इदमाहुर्द्विजश्रेष्ठा सादरं मुनिपुङ्गवम् ॥२६॥
सिद्धोऽसि तपसा ब्रह्मन् रुद्रभक्त्या महामुने ॥ मनसा वाञ्छितं यत्ते तत् सिध्यति न संशयः ॥२७॥
अस्माकमपि विप्रेन्द्र वाञ्छां कर्तुं त्वमर्हसि ॥ ततः सुमित्रस्तान् सर्वानभिवाद्येदमब्रवीत् ॥२८॥
कर्तास्मि वाञ्छितं वो वै निःशङ्कं वदतानघाः ॥ रुद्रप्रसादाद्भद्रं वः कृतमित्यवधार्यताम् ॥२९॥
ते तमूचुस्तदा विप्रं सुमित्रं ऋषिसत्तमम् ॥

ऋषय ऊचुः ॥

तपसा तव विप्रेन्द्र सन्तुष्टः शङ्करस्तव ॥३०॥
सर्वतीर्थमयी गङ्गा सर्वदेवमयी च सा ॥ पितामहस्य मनसः समुत्पन्ना सुरापगा ॥३१॥
स्मरणाद्दर्शनाच्चैव कीर्तनात् स्पर्शनादपि ॥ पापानि विप्र मुच्यन्ते देहिनां नात्र संशयः ॥३२॥
तस्मात्तामानय विभो पातालतलसंस्थिताम् ॥ हितार्थं सर्वभूतानामस्माकञ्च द्विजोत्तम ॥३३॥
आत्मनश्चैव शौचार्थं गङ्गामानीयतां शुभाम् ॥ ततस्तेषां वचः श्रुत्वा सुमित्रः प्रियदर्शनः ॥३४॥
आराधयामास तदा शङ्करं भक्तवत्सलम् ॥ ततः प्रसन्नः सम्प्राप शङ्करो भक्तवत्सलः ॥३५॥
सुमित्रो ऋषयश्चैव प्रणम्योचुर्वचस्तदा ॥ हितार्थं सर्वलोकानामस्माकं च विशेषतः ॥३६॥
पातालसंस्थिता गङ्गा ह्यत्रायाति यथा हर ॥ तथा कुरुष्व भगवन् प्रसन्नो भव शङ्कर ॥३७॥
तच्छ्रुत्वा वचनं शम्भुः सुमित्रवचनं तदा ॥ सस्मार गङ्गां भगवान् शङ्करो भक्तवत्सलः ॥३८॥
एहीति तां देवनदीं मनसाऽचिन्तयत् प्रभुः ॥ ततस्तच्चिन्तितं ज्ञात्वा गङ्गा त्रिपथगामिनी ॥३९॥
ऊर्ध्वमागत्य सहसा यत्रास्ते शङ्करः स्वयम् ॥ शतशृङ्गगिरेर्मूर्ध्नि ह्लादिनी पर्यवर्तत ॥४०॥
तां दृष्ट्वा मुनयः सर्वे गङ्गां शुद्धजलावलिम् ॥ तुष्टुवुः शङ्करं ते वै सुमित्रं च द्विजोत्तमम् ॥४१॥

वसिष्ठो कश्यपश्चैव अगस्त्यो भृगवस्तथा ॥ महातपस्विनो विप्राः शौचं चक्रुर्यथाविधि ॥४२॥
विभज्य तां च विप्रेन्द्र यथाकामं महाव्रताः ॥ धारां गृहीत्वाश्रमपदान् यथास्थानं ययुर्द्विजाः ॥४३॥

गङ्गाधारेति तामाहुर्मुनयस्तत्वदर्शिनः ॥ दृश्यादृश्येन रूपेण गोकर्णं च सुरापगा ॥४४॥
प्लावयामास सर्वत्र सर्वपापहरा शुभा ॥ तत्र स्नातः सर्वतीर्थे स्नातो भवति मानवः ॥४५॥
सप्तजन्मकृतं पापं तत्र स्नानाद्विनश्यति ॥ अग्निष्ठोमातिरात्रयोः फलं विन्दति मानवः ॥४६॥
तत्र दत्तं हुतं चैव एकं कोटिगुणं भवेत् ॥
तस्मिन् वने क्रीडति देवदेवो मुदा तया सार्धमनिन्द्यरूपः ॥
सोऽद्यापि मित्रत्वमुपेत्य तस्य स चापि सिद्धिं परमां जगाम ॥४७॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे सुमित्रेश्वरगङ्गाधारोत्पत्तिकथनं नाम एकोनचत्वरिंशोऽध्यायः ॥३९॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ४०॥  NEXT>>  श्लोक संख्या–५४

॥ हरिहरोत्पत्ति(शंकरनारायण)वर्णने–खरासुर निग्रहः ॥

शंकरनारायणकथोपक्रमः–खरासुर निग्रहः

नारद उवाच ॥

गङ्गाधारमिति ख्यातं आश्रमं पुण्यवर्धनम् ॥ सर्वदेवमयं पुण्यं सर्वतीर्थमयं शुभम् ॥१॥
अस्मिन् वसति देवेशः पार्वत्या सह शङ्करः ॥ तस्मादुत्तरतः किञ्चित् स्थानं त्रैलोक्यविश्रुतम् ॥२॥
योषिद्रूपधरस्तत्र रमते गरुडध्वजः ॥ कामिना सह शर्वेण लोककान्तेन शम्भुना ॥३॥

संवर्तक उवाच ॥

किमर्थं भगवान् विष्णुः स्त्रीरूपमुपजग्मिवान् ॥ किमर्थं तां महादेवश्चकमे पुरुषोत्तमम् ॥४॥
शंसैतत् सकलं दिव्यां परं कौतूहलं हि मे ॥ विस्तरेण मम ब्रूहि कथां श्रुतिमनोहराम् ॥५॥

नारद उवाच ॥

श्रुणु विप्र कथां दिव्यां सर्वपापहरां शुभाम् ॥ पुरा कृतयुगे तात दनोर्वंशसमुद्भवः ॥६॥
खरो नाम महावीर्यो दानवः सुमहाबलः ॥ उग्रः प्रचण्डोऽतिक्रूरश्चण्डश्चातिविभीषणः ॥७॥
शतशृङ्गगिरिं गत्वा विचचार महाबलः ॥ क्रीडावनगतां देवीं पार्वतीं स ददर्श ह ॥८॥
अदृष्ट इव तां दृष्ट्वा चकमे पुरुषाधमः ॥ गृहीतुकामस्तां पापी उपायं सोऽप्यचिन्तयत् ॥९॥
चिन्तयित्वा बहुविधं तपसे कृतनिश्चयः ॥ ततस्तपोवनं गत्वा तपस्तेपे सुदुश्चरम् ॥१०॥
उद्धृत्य बाहू भद्रन्ते पादाङ्गुष्ठेन तिष्ठतः ॥ दिव्यवर्षसहस्रान्ते तुतोष भगवान् शिवः ॥११॥
गत्वाश्रमपदं तस्य हरः खरमभाषत ॥ ददामि ते वरं ब्रूहि यद्यपि स्यात् सुदुर्लभम् ॥१२॥
तं प्रणम्याब्रवीद्देवं त्रिपुरघ्नं त्रिलोचनम् ॥ यस्य मूर्ध्नि जगन्नाथ हस्तक्षेपं करोम्यहम् ॥१३॥
स भस्मसाद्भवेत् क्षिप्रं वरमेतद्वृणोम्यहम् ॥ तथास्त्विति स तेनोक्तः शिवेनाशिवलक्षणः ॥१४॥
अभ्यधावत वेगेन भगवन्तं महासुरः ॥ ज्ञात्वा मनोगतं तस्य भगवान् वृषभध्वजः ॥१५॥
तस्माद्देशादपाक्रामन्नारायणपुरं प्रति ॥ तमागतमभिप्रेक्ष्य शङ्करं भयविह्वलम् ॥१६॥
किमेतदिति चोवाच गौरीशं गरुडध्वजः ॥ तदोवाच भवः सर्वं यथावृत्तं तपोवने ॥१७॥
तच्छ्रुत्वा व्यसृजन्मायां यया सर्वं विमोहितम् ॥ एकेनांशेन भगवान् पलायनपरोऽभवत् ॥१८॥
रुद्रेण सखिना सार्धं दिशमैन्द्रीं समाश्रितः ॥ अपरेण महाभागो ह्यंशेन धरणीधरः ॥१९॥
अधारयदमेयात्मा योषिद्रूपं मनोहरम् ॥ अन्वधावत् स दैत्येन्द्रो व्रजन्तं परमेश्वरम् ॥२०॥
ददर्श नारीं दिव्यां तां रम्यां कमललोचनाम् ॥ दृष्ट्वा मनोहरां तां तु उमाशतगुणाधिकाम् ॥२१॥
विस्मयोत्फुल्लनयनः कन्दर्पवशमागतः ॥ सुकुमारीं सुकेशां तां पूर्णचन्द्रनिभाननाम् ॥२२॥
अनौपम्येन वपुषा क्रीडन्तीं योषितां वराम् ॥ दृष्ट्वा मुमोह दैत्येन्द्रो विस्मृत्य हरपार्वतीम् ॥२४॥
तामुवाचानवद्याङ्गीं मधुरां काममोहितः ॥ का त्वं कमलपत्राक्षि किमर्थं चेह तिष्ठसि ॥२५॥
त्वां दृष्ट्वा सुभगे चाद्य वेपथुर्जायते मम ॥ दर्शनादेव सुश्रोणि त्वया मेऽपहृतं मनः ॥२६॥
मां भजस्व वरारोहे त्रैलोक्यैश्वर्यपूजितम् ॥ यथाकामं यथाश्रद्धं भोगान् भुंक्ष्व वरानने ॥२७॥
एहि सार्धं मया सुभ्र्वचिरं रमयस्व माम् ॥ हिरण्यकशिपोर्वंशे जातोऽहं लोकपूजिते ॥२८॥
नाम्ना खर इति ख्यातः सर्वत्र शुभलोचने ॥ ससुरासुरगन्धर्वाः सयक्षोरगराक्षसाः ॥२९॥
वशे तिष्ठन्ति मत्तेभगमने किमु किङ्कराः ॥ अनुरूपा ममैव त्वं तव चाहमनिन्दिते ॥३०॥
तपसा सिद्धमात्मानं मन्ये त्वां प्राप्य सुन्दरीम् ॥ आराधितो मया देवि देवः शाठ्येन तोषितः ॥३१॥

तस्मादवाप्तमधुना वरमन्यैः सुदुर्लभम् ॥ यस्य मूर्ध्नि वरारोहे निक्षिपामि करं मम ॥३२॥
स देवो दानवो वापि मनुष्यो वा शुभानने ॥ भस्मसाच्च भवेद्देवि तत्क्षणाच्च न संशयः ॥३३॥
इति शर्वेण सर्वज्ञे वरो दत्तो ममानघे ॥ दत्वा वरं स भगवान् मद्भीत्याऽदर्शनं गतः ॥३४॥
तं हत्वा पार्वतीं हृत्वा रमेयमिति मे मतिः ॥ तपोवनगतश्चाहं त्वां दृष्ट्वा लोकसुन्दरीम् ॥३५॥
त्वय्येव सर्वभावो मे प्रविष्टो गुणसागरे ॥ तस्माद्देवि मया सार्धं भुंक्ष्व भोगाननिन्दिते ॥३६॥
इति तद्भाषितं श्रुत्वा योषिद्रूपधरो हरिः ॥ प्रहस्य किञ्चिद्भगवान् लज्जायुक्तोऽब्रवीदिदम् ॥३७॥
कन्यकास्मि महाभाग प्रकृतिर्नाम नामतः ॥ मयानुरूपं भर्तारं इच्छामीह सुरोत्तम ॥३८॥
एकं प्रभुमृषिवरं प्रकृतित्वाद्वृणोम्यहम् ॥ स्थिताहमत्र सुचिरं कदा कश्चिद्वृणोति माम् ॥३९॥
सर्वैः पुरुषगुणैर्युक्तं भर्तारं वरयाम्यहम् ॥ इति तस्या वचः श्रुत्वा कामार्तः पुरुषाधमः ॥४०॥
तामुवाच महाभागे भजस्वेति पुनः पुनः ॥ न मत्तः पुरुषः कश्चिद्विद्यते ह्यधिकः शुभे ॥४१॥
युद्धे मम न तिष्ठन्ति ब्रह्मविष्णुमहेश्वराः ॥ सुरेन्द्रस्त्रिदिवं त्यक्त्वा गतः क्वापि न दृश्यते ॥४२॥
मद्वशेऽद्य प्रवर्तस्व भोगान् भुंक्ष्व यथेप्सितान् ॥ ततो नारायणः श्रुत्वा बह्वबद्धं तदीरितम् ॥४३॥
स्त्रीरूपधारी भगवान् सव्रीडमिदमब्रवीत् ॥ शर्वदत्तं वरं यत्ते तन्मह्यं यदि दास्यसि ॥४५॥
नेच्छामि त्वां महाबाहो अन्यथा पुरुषर्षभ ॥ तच्छ्रुत्वा दानवपतिः कामान्धो मृत्युमात्मनः ॥४६॥
न बुबोध ददामीति सोऽब्रवीत् कालचोदितः ॥ अददात्तद्वरं तस्यै ततस्तां पुनरब्रवीत् ॥४७॥
गान्धर्वेण विवाहेन मामुपेतुं त्वमर्हसि ॥ विवाहानां वरो भद्रे गान्धर्व इति निश्चयः ॥४८॥
मां संजीवय भद्रन्ते सन्तप्तं मदनाग्निना ॥४९॥

नारद उवाच ॥

एवमुक्त्वा स तां कन्यां जग्राहायतलोचनाम् ॥ अतिकामाभिसन्तप्तो वामाप्राप्तमनोरथः ॥५०॥
तस्य हस्तं सम्प्रगृह्य योषिद्रूपधरो हरिः ॥ कण्ठे तदनु तं विप्र दृढं वामकरेण वै ॥५०॥
गृहीत्वा तोषयामास कामार्तं दक्षिणं पुनः ॥ क्षिप्त्वा करं तु तन्मूर्ध्नि भव भस्मेत्युदाहरत् ॥५१॥
ततः क्षणेन स खरो भस्मशेषमजायत ॥ ततोन्तरिक्षगा देवाः पुष्पवृष्टिं ववर्षिरे ॥५२॥
तुष्टुवुस्ते जगन्नाथं हते तस्मिन् महासुरे ॥ देवदुन्दुभयो नेदुर्ननृतुश्चाप्सरोगणाः ॥५३॥
य इदं पुण्यमाख्यानं श्रुणोति श्रद्धया नरः ॥ सर्वान् कामानवाप्नोति दुष्टपीडां न चाप्नुयात् ॥५४॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे खरासुरनिग्रहो नाम चत्वारिंशोऽध्यायः॥ ४०॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ४१ ॥  NEXT>>  श्लोक संख्या–७७

॥ उन्मज्जनतीर्थं(जोगळे केरे), – हरिहरोत्पत्तिः(शंकरनारायण) – वैराग्य,ज्ञान,मुक्त्याख्यमंटपत्रयवर्णनम् ॥

## उन्मज्जनतीर्थं (जोगळे केरे)

नारद उवाच ॥

तमात्ममायया हत्वा देवदेवो जनार्दनः ॥ देवैर्देवर्षिभिश्चैव स्तूयमानो जगद्गुरुः ॥१॥
उपसंहृतवान् सद्यः स्त्रीरूपं पुरुषोत्तमः ॥ अपरेण महाभाग देहेन भवभङ्गकृत् ॥२॥
रुद्रेण सार्धमविशत् पातालं परमेश्वरः ॥ दिनद्वयं द्विजश्रेष्ठ स्थित्वा तस्मिन् महेश्वरः ॥३॥
श्रुत्वा हर्षनिनादं तं देवानां देवकीसुतः ॥ उवाच रुद्रं वरदं एहि पश्य हतं खरम् ॥४॥
मायया मम देवेश हतस्तव रिपुः प्रभो ॥ तस्मादुत्तिष्ठ भद्रन्ते पश्य दैत्यं निपातितम् ॥५॥
इत्युक्तो भगवान्रुद्रो विष्णुना प्रभविष्णुना ॥ वैतरण्यान्वितः सोऽथ पुनश्चोर्ध्वमुपागतः ॥६॥
यस्माद्देशादुपाक्रामत् तदुन्मज्जनमुच्यते ॥ स तदोन्मज्जने तीर्थे ह्युत्ततारोत्तमद्युतिः ॥७॥
स्थानं नारायणं विप्र प्राक्संस्थं पावनं महत् ॥ तत्पुरात् पूर्वदिग्भागे शरपाते स्थितं शुभम् ॥८॥
उन्मज्जनमिति ख्यातं तीर्थानामुत्तमोत्तमम् ॥ उन्मज्जने नरः स्नात्वा विराजति यथोडुराट् ॥९॥

---

## वैतरणी नदी

नदी वैतरणी नाम पातालतलसंस्थिता ॥ सार्धं हरिहराभ्यां वै निःसृता लोकपावनी ॥१०॥
उन्मज्जनपुरोभागे स्थित्वा तस्मान्निवर्त्य च ॥ सम्भूय सर्वतीर्थैः सा दृश्यादृश्या महानदी ॥११॥
कोटितीर्थं समासाद्य ह्लादिनी समजायत ॥ सम्भूय ताम्रगौर्यां स समुद्रं प्रविवेश ह ॥१२॥

---

## वैतरणी ह्रदं

उन्मज्जनसमीपे तु तीर्थं वैतरणीह्रदम् ॥
तत्र यः स्नाति वै भक्त्या सर्वपापैः प्रमुच्यते ॥१३॥

---

## एलावनम्

यस्मिन्सिद्धः पुरा नाग एलापुत्रो महाबलः ॥ एलावनमिति ख्यातमभितोन्मज्जनात् द्विज ॥१४॥
तत्र गत्वा तु यो मर्त्यः भक्त्या नागं प्रपूजयेत् ॥ सर्वान्कामानवाप्नोति यथानागस्तथैव सः ॥१५॥
०

---

## हरिहरोत्पत्तिः(शंकरनारायण)

संवर्तक उवाच ॥

ब्रह्मपुत्र महाभाग कथां त्वन्मुखनिःसृताम् ॥ पीत्वाहं नाधिगच्छामि तृप्तिं वै द्विजसत्तम ॥१६॥
पुनर्वद मुनिश्रेष्ठ कथां हरिहरात्मिकाम् ॥

नारद उवाच ॥

श्रूयतामभिधास्यामि कथां पुण्यां द्विजोत्तम ॥१७॥
तस्मादुन्मज्जनाद्देवौ नारायणपुरं पुनः ॥ आगतौ तौ मुदा युक्तौ सर्वलोकमहेश्वरौ ॥१८॥
ददृशाते हतं पापं खरं हरिहरौ द्विज ॥ भस्मावशेषं दनुजं दृष्ट्वा विस्मयमागतः ॥१९॥
उवाच शङ्करः शौरिं कथं पापो निषूदितः ॥ त्वया कमलपत्राक्ष सोऽवध्यो देवदानवैः ॥२०॥
तन्मे वद महाप्राज्ञ उत्कण्ठा जायते प्रभो ॥

विष्णुरुवाच ॥

रहस्यमिदमत्यन्तं न वक्तव्यं कथञ्चन ॥२१॥
तथापि तव चोत्कण्ठां विनेष्यामि शृणुष्व तत् ॥ माया मम सुरश्रेष्ठ त्रैलोक्यं मोहयिष्यति ॥२२॥
तया ततमिदं व्याप्तं व्यापिनं सचराचरम् ॥ अंशेन मम देवेश स्त्रीरूपं कृतवानहम् ॥२३॥
रूपाकारमनिर्देश्यं सर्वलोकमनोहरम् ॥ उमाशतगुणं देव रूपसौभाग्यसम्पदम् ॥२४॥
तां दृष्ट्वा चकमे रक्षः कामज्वरविमोहितः ॥ तां दृष्ट्वा पापकर्मासौ उमां त्यक्त्वा सुरोत्तम ॥२५॥
यथाकामं यथाजोषं क्रीडिष्यमीत्यभून्मतिः ॥ तद्विस्मृतं तदा तेन दृष्ट्वा तां प्रकृतिं मम ॥२६॥
तामपृच्छत दुष्टात्मा कासि कस्यासि शोभने ॥ सा तमाह महाभागा कन्यकास्मीति शङ्कर ॥२७॥
प्रकृतिर्नाम भद्रन्ते भर्तारं मृगयाम्यहम् ॥ अनुकूलं मम विभो एकप्रभुमनिन्दितम् ॥२८॥
तस्यास्तद्वचनं श्रुत्वा कामात्मा नष्टचेतनः ॥ एकप्रभुरहं भद्रे त्रैलोक्यैश्वर्यपूजितः ॥२९॥
एहि सार्धं मया भद्रे त्रैलोक्यैश्वर्यभाग्भव ॥ ममानुरूपा त्वं भद्रे तवाहं मृगलोचने ॥३०॥

भार्या भव ममेत्याह सा तथेत्यब्रवीत्तदा ॥ तव भार्या भविष्यामि यन्मयोक्तं च तच्छृणु ॥३१॥
शर्वदत्तं वरं यत्ते तन्मह्यं यदि दास्यसि ॥ इत्युक्तमात्रे तद्दतं तदा तेन दुरात्मना ॥३२॥
गृहीत्वा तद्वरं देवी सा माया मम शङ्कर ॥ तस्य मूर्ध्नि करं क्षिप्त्वा भव भस्मेत्युवाच तम् ॥३३॥
इत्युक्तमात्रे देव्या तु खरो देवरिपुस्तदा ॥ भस्मशेषमगाच्छीघ्रं तव शत्रुर्महामते ॥३४॥
शृणु चान्यन्महादेव वधे तस्य दुरात्मनः ॥ उपायः कारितोस्माभिः सम्मन्त्र्य सह दैवतैः ॥३५॥
शुकरूपेण तं गत्वा मयेदं समुदाहृतम् ॥ स्वकृंतनमिति ख्यातं मन्त्रमाथर्वणं महत् ॥३६॥
अनेन मन्त्रेण विभुमाराधय हरं खर ॥ सन्तुष्टस्तव यत् काम्यं तद्ददाति न संशयः ॥३७॥
मन्त्रेणानेन दैत्येन्द्र रुद्रोपि विलयं व्रजेत् ॥ तदा मम वचः श्रुत्वा तपश्चर्तुं प्रचक्रमे ॥३८॥
तेन मन्त्रेण देवेश यस्त्वामर्चति शङ्कर ॥ तव तुष्टिर्महादेव तस्य मृत्युर्न संशयः ॥३९॥
तत्तथा कृतवान् पापो मायया मम मोहितः ॥ वधार्थं तस्य दैत्यस्य अवध्यस्य दुरात्मनः ॥४०॥
कृतं मयैतत् सकलं नोत्कण्ठयितुमर्हसि ॥ तछ्रुत्वा वचनं तस्य भाषितं भुवनेश्वरः ॥४१॥
दर्शयस्वेति तद्रूपं शिवो विष्णुमुवाच ह ॥ तच्छ्रुत्वा देवदेवस्य भाषितं मधुसूदनः ॥४२॥
दर्शयामास तद्रूपं शङ्कराय तदा हरिः ॥ समस्ततत्वविच्चापि दृष्ट्वा तद्विस्मयं गतः ॥४३॥
अहो रूपमहो धैर्यमहो लावण्यमित्युत ॥ पुनः पुनश्च तद्रूपं दृष्ट्वाऽतीव स विस्मितः ॥४४॥
कामसन्तप्तहृदयः केशवं प्रत्यभाषत ॥ रूपेणानेन मां देव वरयस्व जनार्दन ॥४५॥
इत्युक्त्वाऽलिङ्ग्य तां देवो नरनारीश्वरोऽभवत् ॥ तौ दम्पती द्विजश्रेष्ठ क्रीडासक्तावतीव हि ॥४६॥

एकत्वमुपयातौ तौ स्त्रीपुंसौ पुरुषोत्तमौ ॥ तस्मिन्नेव पुरे देव एकमूर्तिधरौ द्विज ॥४७॥
सुप्रीतौ तौ यथाकामं वसतिं चक्रतुः स्थिराम् ॥ कामः संवर्धते तस्मिन् गतस्याद्यापि पावके ॥४८॥

गोकर्णे तत्पुरं श्रेष्ठं नाकपृष्ठसमं परम् ॥ पुरं हरिहरं नाम गोकर्णे सुरपूजितम् ॥४९॥
तस्मिन् दानानि विप्रेन्द्र दातव्यानि हितैषुणा ॥ अक्षय्यं तद्भवेत् पुत्र नात्र कार्या विचारणा ॥५०॥
तस्मिन् दानानि दत्तानि देवभोग्यानि सत्तम ॥ त्रिःसप्तकुलजैः सार्धं दाता स्वर्गमवाप्नुयात् ॥५१॥
शिवविष्ण्वोः कथा यावल्लोके सम्परिवर्तते ॥ तावत् स्वर्गान्न च्यवते दिव्यभोगसमन्वितः ॥५२॥
द्वादश्यां शुक्लपक्षस्य नक्षत्रं श्रवणं भवेत् ॥ विशेषतः श्रावणे तु मासे पुण्यप्रदं भवेत् ॥५३॥
एकादश्यामुषित्वा तु निराहारो द्विजोत्तम ॥ ततः सम्पूज्य तौ देवौ भक्त्या शक्त्या यथाविधि

।।५४।।

तयोः प्रीतिकरं कार्यं तदेवाक्षय्यमर्हति ॥ एवं यः कुरुते तत्र तस्मिन् काले द्विजोत्तम ॥५५॥

सर्वपापैर्विनिर्मुक्तो विष्णुलोके महीयते ॥ शिवसायुज्यमथवा मनसा यद्यदिच्छति ॥५६॥

नाकपृष्ठसमं लोके पुरं हरिहरं द्विज ॥ तत्र दत्तं हुतं चापि एकं कोटिर्भविष्यति ॥५७॥

## वैराग्य,ज्ञान,मुक्त्याख्यमंटपत्रयवर्णनम्

पुरे हरिहरे तस्मिन् वसति द्विजसत्तम ॥ मण्टपत्रितयं पुण्यं पवित्रं पापनाशनम् ॥५८॥

क्रमेण तेषां नामानि वक्ष्यामि शृणु पावके ॥ वैराग्यदं ज्ञानदञ्च मुक्तिदञ्च द्विजोत्तम ॥५९॥

देवयोः पुरतश्चैव रम्यं मुनिनिषेवितम् ॥ उत्तरादिक्रमेणैव प्रादक्षिण्येन संस्थितम् ॥६०॥

उत्तरस्यां स्थितं यत्तु वैराग्यं मण्टपं स्मृतम् ॥ तत्र मासमुषित्वा तु गायत्रीं वेदमातरम् ॥६१॥

यो यजेद्विधिना विप्र लक्षमेकं समाहितः ॥ ब्रह्मचर्यव्रते युक्तो उपवासपरायणः ॥६२॥

स विज्ञानमवाप्यैव विष्णुसायुज्यमाप्नुयात् ॥ देवयोः पुरतो यत्तु मण्टपं ज्ञानदं विदुः ॥६३॥

तत्र मासं वसेद्यस्तु मौनव्रतपरायणः ॥ अष्टाक्षरं जपेन्मन्त्रं विधिना च द्विजोत्तम ॥६४॥

यथाशक्ति यथाबुद्धि एकं कोटिर्भविष्यति ॥ स ज्ञानं सुमहल्लब्ध्वा विष्णुसायुज्यमाप्नुयात् ॥६५॥

ततो नैर्ऋत्यदिग्भागे स्थितं मुक्तिप्रदं द्विज ।। मण्टपं भुवि विख्यातं पुण्यात् पुण्यतरं महत् ॥६६॥

तस्मिन् मृताश्च ये केचित् पापात्मानोपि मानवाः ॥ सर्वपापविनिर्मुक्ताः प्रयान्ति परमं पदम् ॥६७॥

तत्र मासं वसेद्यस्तु ब्रह्मचर्यव्रते स्थितः ॥ सर्वपापविनिर्मुक्तः सत्यवादी जितेन्द्रियः ॥६८॥

आसप्तजन्मचरितं तस्य पापं विनश्यति ॥ मासोपवासं कुरुते नारी तस्मिन्नरोपि वा ॥६९॥

सर्वपापविनिर्मुक्तो अन्ते मुक्तिं स विन्दति ॥ यदा विरक्तः पुरुषो नारी वापि तपस्विनी ॥७०॥

प्रायोपवेशने दीक्षां कृत्वा तन्मुक्तिमण्टपे ॥ दर्भशय्यानिविष्टस्तु शृण्वन् पुण्यकथां हरेः ॥७१॥

नामसंकीर्तनं कुर्यात् सार्धं भागवतैर्जनैः ॥ ॐकारगम्यमानन्दं सर्वसाक्षिणमद्वयम् ॥७२॥

निरूपं निर्मलं शान्तं नारायणमनामयम् ॥ ध्यायन्नित्यं परं ज्योतिरास्ते यो मरणावधि ॥७३॥

काले प्राप्तेऽन्तिमे तस्य समीपं पुरुषोत्तमः ॥ आगत्य दयया तस्य स्वकरं मूर्ध्नि निक्षिपेत् ॥७४॥

ब्रह्मोपदेशं कुरुते दर्शयन् स निजं पदम् ॥ स मृतो ब्रह्मभूतात्मा परं निर्वाणमाप्नुयात् ॥७५॥

य इदं पठते नित्यं शृणोति श्रद्धया नरः ॥ तस्य त्रिजन्मचरितं पापं नश्यत्यसंशयम् ॥७६॥
कोटितीर्थाभिषेकेण यत्पुण्यं समवाप्नुयात् ॥ तत्पुण्यं लभते मर्त्यो ब्रह्मज्ञानं स विन्दति ॥७७॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखंण्डे हरिहरमण्टपत्रयवर्णनं नाम एकचत्वारिंशोऽध्यायः ॥४१॥

---

वि.सू.–
वैतरणीनद्याः उत्पत्तिस्थानं–उन्मज्जनी । तत्पूर्वभागे ह्रदः–वैतरणी ह्रदः । " उन्मज्जनपुरोभागे स्थित्वा तस्मान्निवर्त्य च " इत्युक्तत्वात् ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ४२ ॥  NEXT>>  श्लोक संख्या–६१

## ॥ एलावनं,–वैतरणीनदी–वैतरणीदुर्गा,दुर्गातीर्थानां(वैतरणीह्रद) उत्पत्ति कथनम् ॥

### एलापुत्रः एलावनम्

नारद उवाच ॥

एलापुत्रोपि नागेन्द्रो वने तस्मिन् महातपाः ॥ आराधयामास हरं भावगम्यं द्विजोत्तम ॥ १॥
तस्मिन्नुन्मज्जने स्नात्वा सहस्रपरिवत्सरम् ॥ ततः प्रीतो महादेवो शङ्करः परमेश्वरः ॥२॥
प्रत्यक्षमगमत्तस्य नागस्यामिततेजसः ॥ समस्तभूतसहितः पार्वत्या सहितो मुने ॥३॥
तं दृष्ट्वा नागराजोऽसौ शिरसा प्रणिपत्य तम् ॥ तुष्टाव देवदेवेशं भक्तिनम्रः कृताञ्जलिः ॥४॥

नाग उवाच ॥

नमो नमस्ते भुवनैककर्त्रे हर्त्रे च भूयोपि नमो नमस्ते ॥
भर्त्रे च लोकत्रयभावनाय भक्तार्तिहानौ सततोद्यताय ॥५॥
सहस्रशीर्षाय हरिप्रियाय सहस्रनेत्राय हराय शम्भवे ॥
सहस्रपादाय गुणागुणाय सहस्ररूपाय नमो नमस्ते ॥६॥
सहस्रनेत्रांघ्रिशिरोरुबाहवे त्वां वेदगुह्यं प्रवदन्ति सन्तः ॥
प्रभुः प्रभूणामपि देवदेवो जगत्त्रयक्षोभकरः सुरेशः ॥
शरण्यमाद्यं शरणं प्रपद्ये विश्वेश्वरं शूलिनमप्रमेयम् ॥७॥
अनादिबोधं पुरुषं परात्परं त्वां निर्विकारं मनसा स्मरामि ॥

योगिध्येयं योगिनामप्यगम्यं योगाधीशं योगिहृन्मध्यसंस्थम् ॥८॥
भावातीतं भावनामात्रगम्यं भावातीता योगिनस्त्वां भजन्ति ॥९॥
देवा अपि हि काङ्क्षन्ते तव सन्दर्शनं प्रभो ॥ तेषामगोचरं त्वां हि दृष्टवानस्मि शङ्कर ॥१०॥
गुह्याद्गुह्यतमं श्रेष्ठं ज्ञानगम्यं निरामयम् ॥ अव्यक्तं सर्वभूतस्थं क्षेत्रज्ञमचलं ध्रुवम् ॥११॥
भक्तप्रियं भक्तिगम्यं स्मृतमात्राघनाशनम् ॥ कीर्तयन्ति च ये त्वां वै तेभ्यो नित्यं नमो नमः ॥१२॥

श्रुत्वा नागेरितं वाक्यं शङ्करः प्राह तं पुनः ॥ वरं वरय भद्रन्ते यथा त्वं मनसेच्छसि ॥१३॥

नाग उवाच ॥

सर्वज्ञत्वं वृणे देवामरत्वं तथैव च ॥ तव प्रसादात् कामारे सिद्धिमिच्छामि शाश्वतीम् ॥१४॥

शङ्कर उवाच ॥

तथा भवतु तत्सर्वं मत्प्रसादादहीश्वर ॥ इत्युक्त्वा भगवान्रुद्रस्तत्रैवान्तरधीयत ॥१५॥
एलापत्रोपि नागेन्द्रो यथाकामं चचार ह ॥ तस्मादेलावनमिति त्रैलोक्ये विश्रुतं भवेत् ॥१६॥
चतुर्विंशति नागेन्द्रा एलापत्रादयो द्विज ॥ तस्मिन् सिद्धिं परां प्रापुः प्रभावाच्छङ्करस्य च ॥१७॥ ०

---

## वैतरणीनदी

संवर्तक उवाच ॥

कथं वैतरणी तत्र निःसृतोन्मज्जनाद्द्विज ॥ तन्ममाख्याहि भगवन्नद्यास्तस्याः कथां शुभाम् ॥१८॥

नारद उवाच ॥

श्रूयतामभिधास्यामि वैतरण्याः समुद्भवम् ॥ दुहिता धर्मराजस्य नदीनां प्रवरा हि सा ॥१९॥
सीमा सा यमलोकस्य कर्मलोकस्य चोभयोः ॥ सौम्यरूपधराऽसौम्या पापिष्ठानामनिन्दिता ॥२०॥
महात्मानः पुण्यकृतः स्वकृतैः पुण्यराशिभिः ॥ प्रेतराजपुरीं जित्वा तामुत्तीर्य व्रजन्ति हि ॥२१॥
सर्वपापहरा देवी पातालतलसंस्थिता ॥ तां शशाप पुरा देवीं वरुणो यादसां पतिः ॥२२॥

संवर्तक उवाच ॥

किमर्थं शप्तवान् देवीं वरुणो भगवान् पुरा ॥ केन दोषेण सा देवी पातालतलमास्थिता ॥२३॥

नारद उवाच ॥

सर्वासां वरुणो भर्ता नदीनां च महामते ॥ रूपौदार्यगुणैर्युक्ता महानद्यः पृथक् पृथक् ॥२४॥
भजन्ति वरुणं देवं काले काले सुशोभनाः ॥ सङ्केतमाव्रजन्ति स्म स्वे स्वे काले मनोरमाः ॥२५॥
सखीभिः क्रीडिता बाला लज्जायुक्ता मनस्विनी ॥ सखीदोषेण सा देवी सङ्केतं नागमत् पुरा ॥२६॥

ततश्चुकोप वरुणः शशाप च महानदीम् ॥ धिक्त्वां पापसमाचारे ममाज्ञा लङ्घिता त्वया ॥२७॥
तस्मात् प्रविश्य पातालं निश्चला मलिनोदका ॥ चण्डग्राहवती क्षिप्रं शोणितोदा नदी भव ॥२८॥
ततः प्रसादयामास भर्तारं सा शुचिस्मिता ॥ अज्ञानादथवा ज्ञानात् कृतं ते विप्रियं मया ॥२९॥
तव शुश्रूषणं काले न कृतं तत्क्षमस्व भो ॥ अस्य शापस्य मोक्षं मे देहि किंकरिणी ह्यहम् ॥३०॥

इत्युक्तः स तया देव्या वरुणो यादसां पतिः ॥ तामाहाभ्यर्चितः प्रीतस्तथा भूयः कृपान्वितः ॥३१॥

यदा हरिहरौ देवौ युगपद्द्रक्ष्यसे शुभे ॥ तदा मच्छापमोक्षस्ते भविष्यति वरानने ॥३२॥
इत्युक्तमात्रे पतिना पाताळमविशच्छुभा ॥ ह्लादिनी रुधिरौघेण व्रणभूताऽवसच्चिरम् ॥३३॥
निबद्धा शापरज्वा च निश्चला मलिनोदका ॥ सहस्रवर्षं विप्रेन्द्र देवावाराधितौ तया ॥३४॥
तस्यास्तुष्टौ हरिहरौ युगपद्दर्शनं गतौ ॥ तौ दृष्ट्वा सा महाभागा शिरसाऽवनता स्थिता ॥३५॥
भर्तृशापपरीताङ्गी वेपन्ती कदली यथा ॥ तां दृष्ट्वा तौ सुरवरौ कृपां चक्रतुरव्ययौ ॥३६॥
वरं ब्रूहीति तौ देवौ तामूचतुररिन्दमौ ॥ सा वव्रे शापमोक्षं वै भर्तृस्नेहं च शाश्वतम् ॥३८॥
तीर्थानां श्रेष्ठतां चैव वरमेतदयाचत ॥ तच्छ्रुत्वा वचनं तस्यास्तावब्रूतां तथास्त्विति ॥३९॥
ततः क्षणेन सा देवी निर्मला विरजांबरा ॥ सुप्रसन्ना च सुमुखी सुकुमारी मनोहरा ॥४०॥
नदीनां प्रवरा भूत्वा तीर्थानां प्रवरा च सा ॥ भर्तृभावगता भद्रा प्रसादाद्देवदेवयोः ॥४१॥
ह्रदात्तस्मान्महाभाग ऊर्ध्वस्रोता महानदी ॥ बिलेन तेन निर्गत्य ताभ्यां सह महानदी ॥४२॥
उन्मज्जनीति सा ख्याता नाम्ना सर्वत्र भामिनी ॥ प्लावयित्वा तु तं देशं कोटितीर्थं विवेश वै ॥४३॥
पुराद्धरिहराद्विप्र उत्तरेण महानदी ॥ सङ्गत्य सर्वतीर्थैः सा ताम्रगौरीं समभ्यगात् ॥४४॥
तया सङ्गम्य सा देवी समुद्रं प्रविवेश वै ॥ तस्यां स्नातस्सर्वतीर्थे स्नातो भवति मानवः ॥४५॥
गोसहस्रप्रदानस्य फलं विन्दति वै द्विज ॥ यावत् सत्यं प्रवर्तेत तावत् सा दृश्यते नदी ॥४६॥

विनश्यति यदा सत्यं तदा सा न प्रदृश्यते ॥ ०

## दुर्गा दुर्गातीर्थं च (वैतरणीवनदुर्गा)

तस्मादुन्मज्जनीतीर्थादाग्नेय्यां दिशि वर्तते ॥४७॥

दुर्गास्थानं द्विजश्रेष्ठ पवित्रं पापनाशनम् ॥

संवर्तक उवाच ॥

दुर्गा भगवती भद्रा किमकार्षीच्च तत्र वै ॥४८॥

किं प्राप सा महादेवी तन्मे वक्तुं त्वमर्हसि ॥

नारद उवाच ॥

शृणु तस्यास्तथोत्पत्तिं दुर्गाया द्विजसत्तम ॥४९॥

प्रादुर्भूता यशोदायां तां हन्तुं चकमे खलः ॥ उग्रसेनसुतः कंसः तस्मादपगता ततः ॥५०॥

गोकर्णक्षेत्रमासाद्य शतशृङ्गतटे शुभे ॥ तीर्थं मनोहरं कृत्वा तपस्तेपे मनोरमा ॥५१॥

ततः कालेन महता तुष्टौ हरिहरौ द्विज ॥ तस्याः समीपमागत्य वरं ब्रूहीत्यभाषत ॥ ५२॥

ततो दुर्गा भगवती उन्मील्य नयने तदा ॥ दृष्ट्वा हरिहरौ देवौ नत्वा स्तुत्वा जगाद तौ ॥५३॥

स्थानं मे नास्ति देवेशौ तस्मात् स्थानं प्रदीयताम् ॥ तीर्थमेतत् सुरश्रेष्ठौ त्रैलोक्योत्तमतां व्रजेत् ॥५४॥

एवमुक्ते तया देव्या ऊचतुः शिवकेशवौ ॥ विन्ध्याचलगता भद्रे वस नित्यमनिन्दिते ॥५५॥

तिष्ठैकांशेन वै ह्यत्र सर्वलोकैकपूजिता ॥ तीर्थमेतन्महादेवि त्रैलोक्योत्तमतां व्रजेत् ॥५६॥

अस्मिन् तीर्थे नरो यस्तु नवम्यां भक्तिसंयुतः ॥ आश्वीनशुक्लपक्षे तु कुरुते स्नानमुत्तमम् ॥५७॥

तव मूर्तिं पूजयति भक्त्या शक्त्या यथाविधि ॥ स सर्वदुःखनिर्मुक्तो लोके पूज्यो भविष्यति ॥५८॥

इति दत्वा वरं तस्मै तदा हरिहरौ द्विज ॥ अदर्शनगतौ तत्र विन्ध्याचलमगाच्च सा ॥५९॥

एकांशेन स्थिता तत्र शतशृङ्गतटे शुभे ॥ कथितं ते द्विजश्रेष्ठ दुर्गायाश्चरितं महत् ॥६०॥

संवर्तकमहाबुद्धे किमन्यच्छ्रोतुमिच्छसि ॥ य इदं पुण्यमाख्यानं शृणोति श्रद्धया नरः ॥

सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥६१॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे वैतरणी उत्पत्तिकथनं नाम द्विचत्वारिंशोऽध्यायः ।।४२।।

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ४३ ॥  NEXT>>  श्लोक संख्या–६४

॥ शतशृङ्गस्य पश्चिमपार्श्वस्थतीर्थानि – शतशृङ्गगिरिः – रुद्रयोनेरुत्तरदिक्स्थतीर्थानि – बिन्दुतीर्थानि ॥

## शतशृङ्गस्य पश्चिमपार्श्वस्थतीर्थानि

संवर्तक उवाच ॥

शतशृङ्गस्य भगवन् पारे पार्श्वे स्थितानि च ॥ तीर्थान्याचक्ष्व सर्वाणि प्रसादसुमुख प्रभो ॥१॥

नारद उवाच ॥

शृणु चापरपार्श्वस्थान् शतशृङ्गस्य सत्तम ॥ तीर्थानघौघप्रणुदान् पुरुषार्थप्रसाधकान् ॥२॥

एकबिन्दु रिति ख्यातं तीर्थं त्रैलोक्यविश्रुतम् ॥ दशबिन्दुश्च भद्रंते शतबिन्दु स्तथापरः ॥३॥

सहस्रबिन्दु रिति वै तीर्थं त्रैलोक्यपावनम् ॥ अन्तरिक्षचराण्येव गिरौ तस्मिन् पतन्ति च ॥४॥

तेन मार्गेण च पुनः पाताले च पतन्ति वै ॥ चन्द्रतीर्थ मिति ख्यातं सूर्यतीर्थ मतः परम् ॥५॥

अनन्ततीर्थं विप्रर्षे रामतीर्थ मतः परम् ॥ अग्नितीर्थ मिति ख्यातं वारुणं तीर्थ मेव च ॥६॥

शिंशुमार मिति ख्यातं तीर्थं सर्वसुरार्चितम् ॥ मालिनी नाम भद्रन्ते नदी पुण्यजलामला ॥७॥

तीर्थकोट्यपरं तत्र समुद्रे वरुणालये ॥ भयात् पतङ्गराजस्य द्रवरूपेण चाविशत् ॥८॥

अशक्यं परिसंख्यातुं पृथक् तस्मात् समासतः ॥ मयोच्यमानं विप्रेन्द्र प्राधान्येन निबोध तत् ॥९॥

---

## शतशृङ्गगिरिः

शतशृङ्गो गिरिवरः शतधा लवणोदधौ ॥ तदा भग्नो निपतितः क्षेत्रस्य परितस्थितः ॥१०॥

यदावतारितो भूमौ गरुडात्कुम्भयोनिना ॥ सार्धयोजनविस्तीर्णे शिवक्षेत्रे महागिरिः ॥११॥

शतशृङ्गो गिरिवरः देवर्षिगणसेवितः ॥ द्वौ भागौ तस्य शृङ्गस्य समुद्रे पतितौ द्विज ॥१२॥

दक्षिणोत्तरतस्तस्य क्षेत्रस्य द्विजसत्तम ॥ तस्याष्टनवति ब्रह्मन् पेतुः शृङ्गाणि गोश्रुतौ ॥१३॥

अस्तव्यस्ताश्च परितः भागाः शृङ्गस्य सत्तम ॥ तेषु सर्वेषु तीर्थानि असंख्यानि द्विजोत्तम ॥१४॥

तेषां नामान्यशक्यानि वक्तुं वर्षशतैरपि ॥ तस्मात् प्रधानं ते वक्ष्ये संक्षेपात्तव सुव्रत ॥१५॥

---

## रुद्रयोनेरुत्तरदिक्स्थानि तीर्थानि

रुद्रयोन्याः क्रोशमात्रे तीर्थं त्रैलोक्यविश्रुतम् ॥ चक्रतीर्थ मिति ख्यातं देवर्षिगणसेवितम् ॥१६॥
तत्रैव कापिलं तीर्थ मारण्यं तीर्थ मेव च ॥ तीर्थं वैनायकं नाम क्रोशार्धे चातिपावनम् ॥१७॥
त्रैलोक्ये यानि तीर्थानि तानि सर्वाणि पावके ॥ वसन्ति सिद्धकाम्यानि दृश्यादृश्यानि भागशः ॥१८॥

अत्रस्था ऋषयः सर्वे तपस्यन्ति सुदुश्चरम् ॥ देवताश्च महाभाग गन्धर्वाप्सरसस्तथा ॥१९॥
असुराः किन्नरा यक्षा नागाश्च द्विजसत्तम ॥ ये ये सिद्धिमभीप्सन्तस्ते ह्यत्रस्था न संशयः ॥२०॥
शिवक्षेत्रमिदं ब्रह्मन् तथा विष्णोर्न संशयः ॥ ब्रह्मलोको ह्ययं दिव्य इति विद्वद्भिरुच्यते ॥२१॥
कामक्रोधविनिर्मुक्ता ब्रह्मचर्यव्रते स्थिताः ॥ दम्भानृतविहीनाश्च सर्वदोषविवर्जिताः ॥२२॥
अहिंसका महाभागा इष्टदैवतपूजकाः ॥ मौनव्रतधरा ये वै नियता नियताशनाः ॥२३॥
जपयज्ञपरा ये तु महादानरतास्तथा ॥ अचिरात् सिद्धिमाप्स्यन्ति नात्र कार्या विचारणा ॥२४॥
वर्षाणां हि सहस्रेण सिद्धिः कृतयुगे द्विज ॥ वर्षैः सप्तशतैः सिद्धिस्त्रेतायामत्र पावके ॥२५॥
द्वापरे त्रिशतैर्वर्षैराप्नुयात् सिद्धिमुत्तमाम् ॥ युगं पश्चिममासाद्य सिद्धिः संवत्सरेण हि ॥२६॥
यथा युगानां प्रवरः कलिश्चैव द्विजोत्तम ॥ तथैव सर्वक्षेत्राणां गोकर्णं शिर उच्यते ॥२७॥
धर्मश्च भगवानत्र सिद्धः साक्षान्न संशयः ॥ सिद्धेः स्थानानि चात्रैव असंख्यानि द्विजोत्तम ॥२८॥
अदृश्या हि भविष्यन्ति युगे ते पश्चिमे द्विज ॥ कलौ युगे द्विजश्रेष्ठ धर्मः संक्षीयते यदा ॥२९॥
भवन्ति दृश्यादृश्यानि सर्वतीर्थानि सत्तम ॥ लिङ्गकोटित्रयं तत्र रुद्रयोन्यभितः स्थितम् ॥३०॥
वालुकान्तर्हितं तत्र न पश्येत कलौ युगे ॥ ऋषयोपि महात्मानो ह्यव्यक्ता विचरंत्युत ॥३१॥
आश्रमेषु महाभागाः पुण्येषु स्वेषु सत्तम ॥

---

## बिन्दुतीर्थानि (एकबिन्दुः दशबिन्दुः शतबिन्दुः सहस्रबिन्दुश्च)

संवर्तक उवाच ॥

एकबिन्दोश्च भगवन् दशबिन्दोश्च सत्तम ॥३२॥
शतबिन्दोश्च साहस्रबिन्दो रपि तथैव च ॥ उत्पत्तिं श्रोतुमिच्छामि तेषां वद महामुने ॥३३॥
प्रभावञ्च महाभाग प्रसन्नो वक्तुमर्हसि ॥

नारद उवाच ॥

शृणुष्वैकमनास्तात कथां तेषां महात्मनाम् ॥३४॥

अत्रिवंशोद्भवास्ते तु भ्रातरो मुनिपुङ्गवाः ॥ शतशृङ्गं समासाद्य ब्रह्मादिवसतिं परम् ॥३५॥

अन्विच्छन्तः परां सिद्धिं तपस्तेपुः सुदुश्चरम् ॥ मुक्तस्पृहा महात्मानो ब्रह्मज्ञानपरायणाः ॥३६॥

तटे तस्याश्रमपदं कृत्वा ते च पृथक्पृथक् ॥ अदृश्याः सर्वभूतानां दुर्गदेशं समाश्रिताः ॥३७॥

मौनव्रतधरास्ते तु तपो घोरं प्रचक्रमुः ॥ दिव्यवर्षसहस्राणि काष्ठभूता वनेऽवसन् ॥३८॥

निराहारा निर्विचेष्टा ऊर्ध्वोत्थितकरा द्विज ॥ वल्मीकभूतास्तप्यन्तस्तृणगुल्मलतावृताः ॥३९॥

तेषां तपःप्रभावेण ऋषीणां भावितात्मनाम् ॥ सज्वालाकबलोधूमस्त्रैलोक्यं समुपावृणोत् ॥४०॥

ततो देवाः सगन्धर्वा ऋषयश्च तपोधनाः ॥ ब्रह्माणमूचुर्भगवन् रक्षस्वेति पुनः पुनः ॥४१॥

ततोऽधिगम्य विप्रोत्थभयं ब्रह्मा पितामहः ॥ सुरानाह ततो ब्रह्मा गच्छध्वं त्रिपुरान्तकम् ॥४२॥

मुक्तिकामास्तपस्यन्ति अत्रिपुत्रा महाव्रताः ॥ तस्माद्याचध्वममरा रुद्रं त्रिभुवनेश्वरम् ॥४३॥

यदा प्रसन्नश्चायाति शूलधृक् सहकेशवः ॥ तदा मुक्ता भविष्यन्ति आत्रेया मुनिपुङ्गवाः ॥४४॥

ततस्ते त्रिदशाः सर्वे विरिञ्चवचनात्तदा ॥ विष्णुमाराधयामासुस्तथा रुद्रञ्च पावके ॥४५॥

ततः प्रसन्नास्ते देवा ब्रह्मविष्णुमहेश्वराः ॥ आगत्य देवैः सहितः शतशृङ्गं पिनाकधृक् ॥४६॥

तानब्रवीन्महादेवो वरं ब्रूत यथेप्सितम् ॥ मौनीवासन् महात्मानः शुष्ककाष्ट इव स्थिताः ॥४७॥

शरीरमात्रशेषास्ते न किञ्चित् प्रतिभाषिरे ॥ ततोऽपां बिन्दुभिश्चन्द्रो धाराभूतैर्द्विजोत्तम ॥४८॥

प्लावयामास भगवानन्तरिक्षगतप्रभुः ॥ देवानां जीवभूतः स इन्दुबिन्दुभिरव्ययः ॥४९॥

जीवयामास भगवान् भ्रातॄन् सोमस्तथा शनैः ॥ ततोऽमृतस्य धाराभिर्जातास्ते दिव्यदेहिनः ॥५०॥

ततस्ते भ्रातरः सर्वे दृष्ट्वा देवमुमापतिम् ॥ समस्तदेवसहितमागतं ते ववन्दिरे ॥५१॥

साष्टाङ्गं दण्डवद्भूमौ नत्वा स्तुत्वा जगद्गुरुम् ॥ कृताञ्जलिपुटा भूत्वा ऊचुस्ते गद्गदस्वनाः ॥५२॥

सिद्धिमिच्छामहे देव त्वत्प्रसादादुमापते ॥ ततस्तानाह देवेशः सम्मन्त्र्य सह दैवतैः ॥५३॥

सिद्धा यूयं महाभागा तपसा च दमेन च ॥ भूयोपि मत्प्रसादेन सिद्धिर्भवतु वो द्विजाः ॥५४॥

युष्माभिरमृतं पीतं तपसा दग्धकिल्बिषैः ॥ अधिगम्य परं ब्रह्म यथाकामं चरिष्यथ ॥५५॥

इत्युक्ते शम्भुना भूयो अत्रिपुत्रा महेश्वरम् ॥ प्रणिपत्येदमूचुस्ते ब्रह्माणञ्च हरिं तथा ॥५६॥

तीर्थानि देवदेवेश नाम्नास्माकं धरातले ॥ ख्यातिं गच्छन्तु देवेश स्नातानां मुक्तिदानि भो ॥५७॥

तेषां तद्वचनं श्रुत्वा महादेवः पिनाकधृक् ॥ अब्रवीत्तानिदं वाक्यं हर्षयन् भक्तवत्सलः ॥५८॥

युष्मत्सञ्जीवनार्थाय चन्द्रस्यामृतधारया ॥ जातान्येतानि तीर्थानि पावनानि द्विजोत्तमाः ॥५९॥

सर्वपापस्य संहारं करिष्यन्ति न संशयः ॥ आस्वर्लोकात् द्विजश्रेष्ठाः पातालावधिसत्तमाः ॥६०॥

धारा एतास्तु नित्या वै भविष्यन्ति द्विजोत्तमाः ॥ इति दत्वा वरं तेषां सह देवैरुमापतिः ॥६१॥

यथाकामं जगामाशु भगवान् भूतभावनः ॥ इति लब्ध्वा वरं ते तु महात्मानोऽत्रिसम्भवाः ॥६२॥

यथाकामं गता विप्र तपसा सिद्धिमागताः ॥ इमां पुण्यकथां विप्र ये शृण्वन्ति पठन्ति वै ॥६३॥

बिन्दुतीर्था भिषेकस्य फलं प्राप्स्यन्ति ते नराः ॥ स्नस्न

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे बिन्दुतीर्थवर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ४४ ॥  NEXT>>  श्लोक संख्या–७४

॥ गदातीर्थ – पाण्डवतीर्थ – रामतीर्थ वर्णनम् ॥

बिन्दुतीर्थानि

नारद उवाच ॥

एकबिन्दुरिति ख्यातं दशबिन्दुस्तथैव च ॥ शतबिन्दुश्च साहस्रबिन्दुश्च मुनिपुङ्गव ॥१॥

शिंशुमारादुत्तरतः क्रमादेते स्थिताः शुभाः ॥ एकबिन्दौ नरः स्नात्वा अश्वमेधफलं लभेत् ॥२॥

दशबिन्दौ नरः स्नात्वा वाजपेयफलं लभेत् ॥ शतबिन्दौ नरः स्नात्वा राजसूयफलं लभेत् ॥३॥

सहस्रबिन्दौ यः स्नाति सर्वयज्ञफलं लभेत् ॥ गवां दशसहस्रस्य दत्तस्य फलमश्नुते ॥४॥

तेषु दत्तं हुतं वापि पितॄणामक्षयं भवेत् ॥ एकं वा भोजयेत्तत्र ब्राह्मणं गुणसंयुतम् ॥५॥

समन्त्रकं द्विजश्रेष्ठ पितॄनुद्दिश्य भक्तितः ॥ तदनन्तफलं ज्ञेयं पितॄणां नात्र संशयः ॥६॥

---

गदातीर्थ

नारद उवाच ॥

ततः कालेन महता शतबिन्दुसहस्रकम् ॥ नामान्तरं पुनः प्राप्तं गदातीर्थ मिति द्विज ॥७ ॥

तेषां मुनीनां चरितं कथितं ते मया द्विज ॥ इतः परं द्विजश्रेष्ठ किमन्यच्छ्रोतुमिच्छसि ॥८॥

संवर्तक उवाच ॥

शतबिन्दुरिति ख्यातं तीर्थं मुनिनिषेवितम् ॥ नामान्तरं कथं प्राप्तं गदातीर्थमिति प्रभो ॥ ९॥

इमं प्रश्नं महाभाग वद विस्तरतो मम ॥

नारद उवाच ॥

शृणु विप्र प्रवक्ष्यामि यत्पृष्टं भवताऽनघ ॥१०॥

गदातीर्थस्य माहात्म्यं सर्वपापप्रणाशनम् ॥ पाण्डवा धर्मराजाद्याः कौरवैः सह दारुणम् ॥११॥

कृत्वा युद्धं कुरुक्षेत्रे सबलान् सहबान्धवान् ॥ निहत्य कौरवान् सर्वान् हस्तिनापुरमाविशन् ॥१२॥

कृताभिषेको धर्मज्ञः कुन्तीपुत्रो युधिष्ठिरः ॥ चतुर्भिर्भ्रातृभिः सार्धं मन्त्रिभिः पार्षदैरपि ॥ १३॥

धर्मेण पालयन्नास्ते प्रजाः पुत्रानिवौरसान् ॥ एकदा जननी कुन्ती स्वपुत्रानिदमब्रवीत् ॥१४॥

कुन्त्युवाच ॥

पुत्राः शृणुत तद्वाक्यं यदहं वच्मि साम्प्रतम् ॥ वनवासं हि कुर्वन्तः भवन्तः सर्व एव हि ॥१५॥

सस्नुः सर्वेषु तीर्थेषु कुर्वन्तो भूप्रदक्षिणम् ॥ न कृतं हि मया पुत्राः तीर्थस्नानमनुत्तमम् ॥१६॥

भुवः प्रदक्षिणं चापि तस्माद्यास्यामि पुत्रकाः ॥ इति मातृवचः श्रुत्वा भीममाह युधिष्ठिरः ॥१७॥

गृहीत्वा जननीं भीम भूप्रदक्षिणपूर्वकम् ॥ तीर्थानि दर्शय त्वं हि स्नापयस्व च तेषु वै ॥ १८॥

इति भीमो भ्रातृवाक्यं श्रुत्वा च प्रणिप्रत्य च ॥ स्वमातरं गृहीत्वा तु धौम्येन च समन्वितः ॥१९॥

महर्षिभिः परिवृतः क्षितेः कुर्वन् प्रदक्षिणाम् ॥ बदरिकाश्रममारभ्य ययौ पूर्वाच्च तीरतः ॥२०॥

दर्शयन् तत्र तीर्थानि स्नापयन् मातरं द्विज ॥ शनैर्गोकर्णमापेदे भीमः सर्वसुरार्चितम् ॥२१॥

कोटितीर्थपुरोभागे स्थितं हरिहरालयम् ॥ मात्रा सह प्रविष्टः सः भीमसेनो महाबलः ॥२२॥

तमागतं ततः श्रुत्वा गोकर्णक्षेत्रवासिनः ॥ ऋषयः सर्व एवैते ह्याजग्मुर्भीमसन्निधिम् ॥ २३॥

ततो भीमः समालोक्य ह्यागतान् मुनिपुङ्गवान् ॥ अभ्युत्थायासनं दत्वा पूजयित्वा यथाविधि ॥
२४॥

कुशलं परिपप्रच्छ तपः स्वाध्यायकर्मसु ॥ एवं सम्पूजितास्तेन ऋषयस्ते तपोधनाः ॥२५॥

आशीर्भिरभिनन्द्याथ भीमसेनं तदाऽब्रुवन् ॥ सर्वे कुशलिनो भीम वसामोऽत्राकुतोभयाः ॥२६॥

त्वदागमनमेतद्धि मात्रा सह वृकोदर ॥ ज्ञातं सर्वमशेषेण ह्यस्माभिः कुरुपुङ्गव ॥ २७॥

पञ्चक्रोशपरीमाणमेतद्गोकर्णमुच्यते ॥ क्षेत्राणां प्रवरं पुण्यं सर्वलिङ्गमयं स्मृतम् ॥२८॥

महाबलाभिधानेन आस्ते साक्षान्महेश्वरः ॥ यात्रा कृता त्वया भीम मात्रा सह यथाविधि ॥२९॥

शतबिन्दुरिति ख्यातं शतशृङ्गतटे शुभे ॥ रत्नाकरस्य सविधे तीर्थ मस्ति महोदयम् ॥ ३०॥

पाषाणेनावृतं तद्धि त्वमस्माकं प्रदर्शय ॥ इति तेषां वचः श्रुत्वा मुनीनां भरतर्षभ ॥३१॥

तथेति व्यासधौम्याद्यैर्मुनिभिः सहितो ययौ ॥ पाषाणेनावृतं दृष्ट्वा तत्तीर्थं पाण्डुनन्दनः ॥३२॥

गदामादाय स तदा ताडयामास तच्छिलाम् ॥ तद्गदापातमात्रेण अभून्मार्गस्तु तत्क्षणात् ॥३३॥

ततः सर्वैर्मुनिवरैर्मात्रा सह कुरूत्तमः ॥ स्नात्वा तत्तीर्थसलिले यथावत् द्विजपुङ्गव ॥३४॥

कृतकृत्यस्तदा भीमः श्लाघ्यमानो मुनीश्वरैः ॥ महाबलं पूजयित्वा मात्रा सह पुरं ययौ ॥३५॥

नारद उवाच ॥

तस्मा द्भीमगदातीर्थ मिति ख्यातमभूद् द्विज ॥

---

पाण्डवतीर्थवर्णनम् ॥

तस्मादुत्तरतः किञ्चित् शरपाते स्थितं शुभम् ॥३६॥

पाण्डवानामाश्रम न्तु रामतीर्थस्य पूर्वतः ॥ तीर्थं कृत्वा तु विफुलं तत्र सिद्धिमुपागताः ॥ ३७॥ युधिष्ठिरप्रभृतयः किमन्यच्छ्रोतुमिच्छसि ॥

संवर्तक उवाच ॥

कदा सिद्धिं गतास्तेऽपि पाण्डवा विमलाशयाः ॥ एतन्मे ब्रूहि भगवन् पाण्डवाश्रम सम्भवम् ॥३८॥

नारद उवाच ॥

यदा द्यूतजिताः पार्थाः कौरवेण दुरात्मना ॥ द्रौपद्या भार्यया सार्धं तदा वनमुपागमन् ॥३९॥

दुःखेन महता युक्ताः काम्यकावनमासत ॥ उवास तत्र तैः सर्वैः किञ्चित्कालं द्विजोत्तम ॥४०॥

तीर्थयात्राप्रसङ्गेन ततस्तस्माद्विनिर्गतः ॥ भ्रातृभिर्मुनिभिः सार्धं धर्मराजो युधिष्ठिरः ॥४१॥

भुवः प्रदक्षिणं कुर्वन् पूर्वाब्धितटवर्त्मना ॥ स्नात्वा तत्रत्यतीर्थेषु क्रमाद्गोकर्णमासदत् ॥४२॥

स्नात्वादौ कोटितीर्थे तु पूजयित्वा महाबलम् ॥ कृत्वाश्रमपदं तत्र रामतीर्थस्य सन्निधौ ॥४३॥

वार्षिकान् चतुरो मासानुषितो भ्रातृभिः सह ॥ तीर्थं कृत्वा सुविमलं पूजयंश्च महाबलम् ॥४४॥

ततः सर्वेषु तीर्थेषु स्नात्वा चैव यथाक्रमम् ॥ ततो द्वैतवनं प्रायाद्भ्रातृभिः सहितोऽनघ ॥४५॥

तत्रोवास यथाकामं शृण्वन् पुण्यकथां हरेः ॥ तीर्थं वै पाण्डुपुत्राणां कार्तिके शुक्लपक्षके ॥४६॥

पञ्चम्या मत्र यो स्नाति तेषां पुण्यमनन्तकम् ॥

---

रामतीर्थवर्णनम् ॥

संवर्तक उवाच ॥

रामतीर्थस्य चोत्पत्तिं सम्भवं कथयस्व मे ॥४७॥

नारद उवाच ॥